# The DHÂTURÛPA MUKTÂVALÎ

BY

P. K. DORAISAWMY IYENGAR,
Sanskrit Pandit, Hindu High School, Triplicane, Madras

## Part II.

RAO & COMPANY,
PUBLISHERS AND BOOKSELLERS, TRIPLICANE, MADRAS
1923

THE

# DHÂTURUPA MUKTÂVALI

BEING

## A HANDBOOK OF SANSKRIT GRAMMAR

*INTENDED FOR USE IN SCHOOLS AND COLLEGES*

BY

P. K. DURAISWAMI IYENGAR,
*Sanskrit Pandit, Hindu High School, Triplicane, Madras.*

SECOND EDITION.

[*Revised and enlarged from the First Edition approved by the Text Book Committee.*]

IN TWO PARTS—PART II.



MADRAS:
PRINTED AT THE LAW PRINTING HOUSE, MOUNT ROAD.
1915



**Price: Part I, Re. 1; Part II, Rs. 1-8; Parts I & II, Rs. 2-4.**
**Postage, etc., extra.**

श्रीरस्तु ।

# ॥ धातुरूपमुक्तावळी ॥

---

कैरविणीतीरविराजमानायां हिन्दुपाठशालायां गैर्वाणवाण्युपदेष्ट्रा
श्रीशैलार्यापराभिधानेन

## पि. के. दुरसाम्यय्यंगार्येण

विराचिता ।

द्वितीयेयमङ्कनावृत्तिः

भागद्वयात्मिका—द्वितीयभागः ।

चेन्नपुर्यां
ला प्रिण्टिङ् मुद्राक्षरशालायां अमुद्र्यत ।

---

१९१५



मूल्यम्—प्रथमभागस्य एकरूप्यम्.
द्वितीयभागस्य सार्धैकरूप्यम्. समुच्चित्य सपादरूप्यद्वयम्. मार्गव्ययः पृथक् ।

॥ श्रीरस्तु ॥

# धातुरूपमुक्तावळी

## CHAPTER I.

## समासकुसुमावलिः ।

### COMPOUNDS.

In Sanskrit, words are derived in five ways—and they are called समास, कृत्, तद्धित, सनादि and एकशेष.

The blending of two or more words into one is called समास or composition. The case-endings of words to be compounded are generally dropped.

षोढा समासास्संक्षेपादेकत्रिंशद्विधाः पुनः ।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥

तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः ।
सप्तधा च बहुव्रीहिः द्विगुराभाषितो द्विधा ॥

द्वन्द्वश्चतुर्विधो ज्ञेयोऽव्ययीभावस्त्रिधा मतः ।
तेषां पुनस्समासानां प्राधान्यं स्याच्चतुर्विधम् ॥

१. तत्पुरुषसमासः ।
कर्मधारयसमासः ।
द्विगुसमासः ।

२. बहुव्रीहिसमासः ।

३. अव्ययीभावसमासः ।

४. द्वन्द्वसमासः ।

एतदन्तर्गतविशेषसमासाः ।

अलुक्समासः ।
नित्यसमासः ।
गतिसमासः ।
असमर्थसमासः ।

समासार्थविवरणवाक्यस्य विग्रह इति संज्ञा ।

तत्पुरुषसमासनिरूपणम् ।

In the Tatpurusha composition prominence is given generally to the meaning of the final word.

तत्पुरुषोऽष्टविधोऽभूत्प्रथमादिविभक्तिनञ्कृतैर्भेदैः ।
उत्तरपदजनितार्थः प्रायो मुख्य इति पण्डितैः कथितः ॥

प्रथमातत्पुरुषो यथा ।

अमृतं योऽपिबद्दैत्यः तं वैकुण्ठो द्विधाऽच्छिनत् ।
राहुरुत्तरकायोऽस्य पूर्वकायोऽभवद्ध्वजः ॥

*EXAMPLES.*

| | |
|---|---|
| उत्तरं कायस्य = उत्तरकायः । | पूर्वं कायस्य = पूर्वकायः । |

द्वितीयातत्पुरुषो यथा ।

दुःखातीतो भवत्येव यदि कृष्णश्रितो जनः ।
अथवान्नबुभुक्षुस्सन् मुहूर्तसुखमश्नुते ॥

*EXAMPLES.*

| | |
|---|---|
| दुःखम् अतीतः = दुःखातीतः । | अन्नं बुभुक्षुः = अन्नबुभुक्षुः । |
| कृष्णं श्रितः = कृष्णश्रितः । | मुहूर्तं सुखम् = मुहूर्तसुखम् । |

तृतीयातत्पुरुषो यथा ।

मासावरस्त्वं खलु मासपूर्वः अहन्तु विद्यानिपुणो नितान्तम् ।
इतीव संसद्यभिमानिनां सदा परस्परं वाक्कलहो बभूव ॥

*EXAMPLES.*

| | |
|---|---|
| मासेन अवरः = मासावरः । | विद्यया निपुणः = विद्यानिपुणः । |
| मासेन पूर्वः = मासपूर्वः । | वाचा कलहः = वाक्कलहः । |

### चतुर्थीतत्पुरुषो यथा ।

गृही भूतबलिं दत्ते गोसुखं तु कृषीवलः ।
दत्ते यष्टा यूपदारु कुण्डलाष्टापदं धनी ॥

*EXAMPLES.*

भूतेभ्यः बलिः = भूतबलिः ।
गवे सुखम् = गोसुखम् ।
यूपाय दारु = यूपदारु ।
कुण्डलाय अष्टापदं = कुण्डलाष्टापदम् ।

### पञ्चमीतत्पुरुषो यथा ।

पूर्वं चोरभयं प्राप्य व्याघ्रभीतस्ततः परम् ।
सुखापेतो जनस्सम्यगरण्ये निवसेत्कथम् ॥

*EXAMPLES.*

चोरात् भयम् = चोरभयम् ।
व्याघ्रात् भीतः = व्याघ्रभीतः ।
सुखात् अपेतः = सुखापेतः ।

### षष्ठीतत्पुरुषो यथा ।

अधिकं राजपुरुषस्सेव्यस्सर्वमहान्यतः ।
वृक्षमूलमुपाश्रित्य जपतो देवपूजकात् ॥

*EXAMPLES.*

राज्ञः पुरुषः = राजपुरुषः ।
सर्वेषां महत्तरः = सर्वमहान् ।
वृक्षस्य मूलम् = वृक्षमूलम् ।
देवस्य पूजकः=देवपूजकः ।

### सप्तमीतत्पुरुषो यथा ।

प्राश्यान्नमीश्वराधीनं स्थालीपक्वं तु मानवः ।
वर्त्मन्यातपशुष्कः सन् दानशौण्डः कथं भवेत् ॥

*EXAMPLES.*

ईश्वरे अधि = ईश्वराधीनम् ।
स्थाल्यां पक्वम् = स्थालीपक्वम् ।
आतपे शुष्कः = आतपशुष्कः ।
दाने शौण्डः = दानशौण्डः ।

### नञ्तत्पुरुषो यथा ।

अज्ञानात्पापमाप्नोति पापादब्राह्मणो भवेत् ।
तस्मादिच्छन्ति तत्त्यक्तुमभावायैव पण्डिताः ॥

*EXAMPLES.*

ज्ञानस्य = अभावः अज्ञानम् । | न ब्राह्मणः = अब्राह्मणः ।

## कर्मधारयसमासनिरूपणम् ।

The Karmadharaya Samasa is that particular division of Tatpurusha Samasa in which the component words are in apposition with each other.

कविभिस्सप्तविधस्स्यादित्येवं कर्मधारयः कथितः ।
तत्पुरुषान्तर्भावात्तद्वत्प्राधान्यमीरितं चास्य ॥
विशेषणं पूर्वपदे विशेष्यं तथोभयत्रापि विशेषणं च ।
यस्योपमानं परतस्तदादौ संभावना चाप्यवधारणा च ॥

### विशेषणपूर्वपदकर्मधारयो यथा ।

नीलोत्पलानि नारीणां नयनानीव रेजिरे ।
कम्पितान्यल्पवातेन सत्सरस्सु स्थितान्यहो ॥

*EXAMPLES.*

नीलानि च तानि उत्पलानि च = नीलोत्पलानि । | अल्पश्चासौ वातश्च = अल्पवातः । सन्ति च तानि सरांसि च = सत्सरांसि ।

### विशेष्यपूर्वपदकर्मधारयो यथा ।

उद्वीक्ष्य यस्य मातङ्गान् घना इति मनीषया ।
मयूरव्यंसका हृष्टाः ननृतुस्तं नृपं भजे ॥

*EXAMPLES.*

व्यंसकाश्च ते मयूराश्च = मयूरव्यंसकाः । | खसूचिश्चासौ वैयाकरणश्च = वैयाकरणखसूचिः ।

### विशेषणोभयपदकर्मधारयो यथा ।

पुंसां स्नातानुलिप्तानामन्नं भोज्योष्णमेव हि ।
पश्यामीत्यब्रवीद्वैद्यः शास्त्रैर्निश्चप्रचं वचः ॥

*EXAMPLES.*

स्नाताश्च ते अनुलिप्ताश्च = स्नातानुलिप्ताः । भोज्यं च तत् उष्णं च = भोज्योष्णम् । निश्चितं च तत् प्रचितं च = निश्चप्रचम् ।

उपमानोत्तरपदकर्मधारयो यथा ।

रामोऽयं पुरुषव्याघ्रः संवृतः कपिकुञ्जरैः ।
हनिष्यति बलाद्युद्धे रावणं राक्षसर्षभम् ॥

*EXAMPLES.*

पुरुषो व्याघ्र इव = पुरुषव्याघ्रः ।
कपयः कुञ्जरा इव = कपिकुञ्जराः ।
राक्षसः ऋषभ इव = राक्षसर्षभः ।

उपमानपूर्वपदकर्मधारयो यथा ।

कौमुदीविशदा भाति या वाणी रतिसुन्दरी ।
लतातन्वी सदा दद्यात् सा द्राक्षामधुरां गिरम् ॥

*EXAMPLES.*

कौमुदीव विशदा = कौमुदीविशदा ।
रतिरिव सुन्दरी = रतिसुन्दरी ।
लतेव तन्वी = लतातन्वी ।
द्राक्षेव मधुरा = द्राक्षामधुरा ।

सम्भावनापूर्वपदकर्मधारयो यथा ।

तमालवृक्षैरभितः संवृतो विन्ध्यपर्वतः ।
बम्भरैस्सकलैर्दृष्टः दूराद्गजमनीषया ॥

*EXAMPLES.*

तमाल इति वृक्षः = तमालवृक्षः ।
विन्ध्य इति पर्वतः = विन्ध्यपर्वतः ।
गज इति मनीषा = गजमनीषा ।

अवधारणापूर्वपदकर्मधारयो यथा ।

मनीषासलिलैर्युक्तिरत्नैर्वाक्कल्पनोर्मिभिः ।
यशस्सरिद्भिस्सम्पन्नः भात्ययं कविसागरः ॥

*EXAMPLES.*

मनीषा एव सलिलानि = मनीषासलिलानि ।
युक्तय एव रत्नानि = युक्तिरत्नानि ।
वाक्कल्पना एव ऊर्मयः = वाक्कल्पनोर्मयः ।
यशांस्येव सरितः = यशस्सरितः ।
कविरेव सागरः = कविसागरः ।

The following according to some, is the eighth kind of कर्मधारय compound.

लुप्तमद्ध्यमपदकर्मधारयो यथा ।

देवब्राह्मण एवाहमागतश्शाकपार्थिव ।
अतो मां पालय श्रान्तं पान्थं छायातरुर्यथा ॥

*EXAMPLES.*

देवपूजकः ब्राह्मणः = देवब्राह्मणः ।
शाकप्रियः पार्थिवः = शाकपार्थिवः ।
छायाप्रधानः तरुः = छायातरुः ।

## द्विगुसमासनिरूपणम् ।

The Dwigu Samasa is that particular from of Tat-purusha in which the first member is a numeral.

स चैकवद्भाव्यनेकवद्भावीति द्विधा द्विगुः ।
अस्यापि पण्डितैरन्तर्भावस्तत्पुरुषे मतः ॥

एकवद्भावी द्विगुर्यथा ।

पञ्चवट्या समं क्षेत्रं त्रिलोक्यां न हि विद्यते ।
तत्र पञ्चगवं दत्वा जनश्श्रेष्ठपदं व्रजेत् ॥

*EXAMPLES.*

पञ्चानां वटानां समाहारः = पञ्चवटी ।
त्रयाणां लोकानां समाहारः = त्रिलोकी ।
पञ्चानां गवां समाहारः = पञ्चगवम् ।

अनेकवद्भावी द्विगुर्यथा ।

युद्धेषु विबुधाः सर्वे बाडबाश्चाध्वरेष्वपि ।
गायन्ति यं कार्यसिद्ध्यै भजे षाण्मातुरं मुदा ॥

*EXAMPLES.*

षण्णां मातॄणाम् अपत्यं पुमान् = षाण्मातुरः ।

## CHAPTER II.

# बहुव्रीहिसमासनिरूपणम् ।

Generally two or more words ending in the nominative case-affix form a compound, denoting another new thing not connoted by those words individually; and the compound is called Bahuvrihi.

सप्तभिराख्याभिर्वा विख्यातो यस्स वै बहुव्रीहिः ।
अन्यपदार्थो मुख्यः प्रायेणोक्तो बुधप्रवरैः ॥
द्वाभ्यां पदाभ्यां बहुभिः पदैर्वा संख्याभिधाय्यन्त्यपदं द्वयं वा ।
यस्याभवत्पूर्वपदे सहश्च दिगन्तराळव्यतिहारलक्ष्मा ॥

द्विपदबहुव्रीहिर्यथा ।

प्राप्ताग्निमेवमिषुमूढरथानथाश्वान् तूणीरमुद्धृतशरं च वहन् जवेन ।
रुद्रोऽपि वीरपुरुषः स पुरो बिभेद देवैश्च दत्तपशुरेव महाबलस्सन् ॥

*EXAMPLES.*

| | |
|---|---|
| प्राप्तः अग्निः यं सः = प्राप्ताग्निः । | वीराः पुरुषाः यस्मिन् सः = वीरपुरुषः । |
| ऊढः रथः यैस्ते = ऊढरथाः । | दत्तः पशुः यस्मै सः = दत्तपशुः । |
| उद्धृताः शराः यस्मात्सः = उद्धृतशरः । | महत् बलं यस्य सः = महाबलः । |

बहुपदबहुव्रीहिर्यथा ।

भस्मोद्धूळितसर्वाङ्गः दुर्वासा ऋषितल्लजः ।
यस्य प्रसादादभवत् पञ्चपुत्रधना पृथा ॥

*EXAMPLES.*

| | |
|---|---|
| भस्मो ळितं सर्वं अङ्गं यस्य सः = भस्मोद्धूळितसर्वाङ्गः । | पञ्चपुत्राःधनं यस्यास्सा=पञ्चपुत्रधना । |

संख्योभयपदबहुव्रीहिर्यथा ।

काननेऽस्मिन्नहो राजन् द्वित्रैरायासिता जनैः ।
लभ्यन्ते पञ्चषा नागाः इत्यूचुर्बलिनः प्रभुम् ॥

*EXAMPLES.*

| | |
|---|---|
| द्वौ वा त्रयो वा = द्वित्राः । | पञ्च वा षड्वा = पञ्चषाः । |

संख्योत्तरपदबहुव्रीहिर्यथा ।

ब्रह्माणः कति वा रुद्राः वद त्वमिति सङ्ख्यया ।
कुशलश्चेदेकयोक्त्या वदेदुपदशा इति ॥

*EXAMPLES.*

दशानां समीपे ये सन्ति, ते=उपदशाः । | एकादशानां समीपे ये सन्ति, ते = [उपैकादशाः ।

सहपूर्वपदबहुव्रीहिर्यथा ।

सकलास्सहसन्तानाः सकला अपि बाडबाः ।
प्रोचुः स्वस्ति महीपाय सहपुत्राय सन्ततम् ॥

*EXAMPLES.*

कलाभिस्सह वर्तन्त इति = सकलाः ।
सन्तानैस्सह वर्तन्त इति = सहसन्तानाः ।
पुत्रेण सह वर्तत इति = सपुत्रः ।

दिगन्तराळलक्षणबहुव्रीहिर्यथा ।

विद्युदुत्तरपूर्वायाममोघा मारुतो यथा ।
यदि दक्षिणपूर्वस्याम् वृष्टिर्नैव भवेत्तदा ॥

*EXAMPLES.*

उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्त- [राळम्, सा = उत्तरपूर्वा ।
दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरा- ळम्, सा = दक्षिणपूर्वा ।

व्यतीहारलक्षणबहुव्रीहिर्यथा ।

बाहूबाहवि केषांचिन्मुष्टीमुष्टयद्भुतं तथा ।
केशाकेश्यभवद्युद्धं वानराणां च रक्षसाम् ॥

*EXAMPLES.*

बाहुभिर्बाहुभिश्च गृहीत्वेदं युद्धं प्रवृत्तं [= बाहूबाहवि ।
मुष्टिभिर्मुष्टिभिश्च प्रहृत्येदं युद्धं प्रवृत्तम् [= मुष्टीमुष्टि ।
केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तम् [= केशाकेशि ।

5. लिट्=Perfect tense.
6. लुट्=First Future tense.
7. लृट्=Second Future tense.
8. लृङ्=Conditional mood.
9. लुङ्=Aorist tense.
10. आशीर्लिङ्=Benedictive mood.

These are non-conjugational tenses (आर्धधातुकरूपाणि) and they are so called because the conjugational signs are not added to roots before the personal terminations in these tenses; the tenth conjugational sign—अय—however, makes its appearance in some of these tenses.

8. The Parasmaipada singular terminations of the Present and the Imperfect tenses, and the Parasmaipada third person singular termination as well as the first person terminations in both Padas of the Imperative mood, are strong; and the remaining terminations of the conjugational tenses are weak.

## लकारार्थाः ।

## SIGNIFICATIONS OF TENSES AND MOODS.

1. वर्तमानार्थे धातोः परतः लट् भवेत् ।

The Present tense denotes what is taking place.

2. अनद्यतनभूतार्थे विवक्षिते धातोः परतः लङ् भवति ।

The Imperfect tense denotes an action which took place before the beginning of this day.

3. विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनाशीरादिष्वर्थेषु विवक्षितेषु, लोट्, विधिलिङ्, आशीर्लिङ् एते त्रयोऽपि स्युः ।

The Imperative mood denotes command, inquiry, or blessing.

The Potential mood is used when in a sentence one statement depends on another as its reason or condition. When used in independent sentences, it implies command, wish, hope, prayer, or probability.

The Benedictive mood denotes wish, and more particularly, blessing.

4. भूतानद्यतनपरोक्षार्थे विवक्षिते धातोः परतः लिट् भवति ।

The Perfect tense is used to denote an action which took place prior to the previous midnight, and of which the speaker was not a witness or to denote an action which took place long ago. It is also used to denote an action which the agent wishes to hide or did in an unconscious moment.

5. अनद्यतनभविष्यदर्थविवक्षायां लुट् भवेत् ।

The First Future tense definitely expresses some thing which is to take place at sometime in the future.

6. भविष्यत्वमात्रविवक्षायां धातोः परतः लृट् भवति ।

The Second Future tense denotes an action which will take place in future in general, and more particularly that which is to take place in the very day.

7. हेतुहेतुमद्भावादिषु अधिकार्थेषु विवक्षितेषु लृङ् सम्भवति ।

The Conditional mood is used when a person speaks of a thing which did not or will not really take place but is merely presumed. It corresponds to the English pluperfect conditional, and must, in Sanskrit, be used in antecedent and consequent clauses.

8. भूतत्वमात्रविवक्षायां लुङ् स्यात् ।

The Aorist tense is used to denote a past action generally.

9. अद्यतन denotes the day, beginning from the second half of the preceding night, and ending with the 1st half of the following night.

अनद्यतन is any time in general other than the अद्यतन day.

## लकारादेशप्रत्ययाः ।

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथान्ध्वमिड्वहिमहिङ् ।

This Sutra gives the personal terminations to be added to the roots, and they assume the forms given below in the various tenses and moods for both Padas.

### Conjugational Tenses—Terminations of the Roots of the FIRST SET.

| PARASMAIPADA. | | | ATMANEPADA. | | |
|---|---|---|---|---|---|
| PRESENT TENSE. लट् । | | | PRESENT TENSE. लट् । | | |
| मि | वस् | मस् | इ | वहे | महे |
| सि | थस् | थ | से | इथे | ध्वे |
| ति | तस् | अन्ति | ते | इते | अन्ते |
| IMPERFECT. लङ् । | | | IMPERFECT. लङ् । | | |
| अम् | व | म | इ | वहि | महि |
| स् | तम् | त | थास् | इथाम् | ध्वम् |
| त् | ताम् | अन् | त | इताम् | अन्त |
| IMPERATIVE. लोट् । | | | IMPERATIVE. लोट् । | | |
| आनि | आव | आम | ऐ | आवहै | आमहै |
| (None) | तम् | त | स्व | इथाम् | ध्वम् |
| तु | ताम् | अन्तु | ताम् | इताम् | अन्ताम् |
| POTENTIAL. विधिलिङ् । | | | POTENTIAL. विधिलिङ् । | | |
| ईयम् | ईव | ईम | ईय | ईवहि | ईमहि |
| ईस् | ईतम् | ईत | ईथास् | ईयाथाम् | ईध्वम् |
| ईत् | ईताम् | ईयुस् | ईत | ईयाताम् | ईरन् |

## Conjugational Tenses—Terminations of the Roots of the SECOND SET.

**PARASMAIPADA.**

The terminations of the roots of the 2nd set in the Present tense and the Imperfect tense are the same as those of the roots of the 1st set.

IMPERATIVE. लोट्।

| | | |
|---|---|---|
| आनि | आव | आम |
| हि | तम् | त |
| तु | ताम् | अन्तु |

POTENTIAL. विधिलिङ्।

| | | |
|---|---|---|
| याम् | याव | याम |
| यास् | यातम् | यात |
| यात् | याताम् | युस् |

**ATMANEPADA.**

PRESENT TENSE. लट्।

| | | |
|---|---|---|
| ए | वहे | महे |
| से | आथे | ध्वे |
| ते | आते | अते |

IMPERFECT. लङ्।

| | | |
|---|---|---|
| इ | वहि | महि |
| थास् | आथाम् | ध्वम् |
| त | आताम् | अत |

IMPERATIVE. लोट्।

| | | |
|---|---|---|
| ऐ | आवहै | आमहै |
| स्व | आथाम् | ध्वम् |
| ताम् | आताम् | अताम् |

The terminations of the potential of the 2nd set are the same as those of the 1st set.

## Terminations of the Roots in the Non-Conjugational Tenses.

**PARASMAIPADA.**

PERFECT. लिट्।

| | | |
|---|---|---|
| अ | व | म |
| थ | अथुस् | अ |
| अ | अतुस् | उस् |

FIRST FUTURE. लुट्।

| | | |
|---|---|---|
| तास्मि | तास्वः | तास्मः |
| तासि | तास्थः | तास्थ |
| ता | तारौ | तारः |

SECOND FUTURE. लृट्.

| | | |
|---|---|---|
| स्यामि | स्यावः | स्यामः |
| स्यसि | स्यथः | स्यथ |
| स्यति | स्यतः | स्यन्ति |

CONDITIONAL. लृङ्।

| | | |
|---|---|---|
| स्यम् | स्याव | स्याम |
| स्यः | स्यतम् | स्यत |
| स्यत् | स्यताम् | स्यन् |

## Terminations of the Roots in the Non-Conjugational Tenses.

**PARASMAIPADA.**—(*Concluded*).

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| यासम् | यास्व | यास्म |
| याः | यास्तम् | यास्त |
| यात् | यास्ताम् | यासुः |

**ATMANEPADA.**

PERFECT. लिट् ।

| | | |
|---|---|---|
| ए | वहे | महे |
| से | आथे | ध्वे |
| ए | आते | इरे |

FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| ताहे | तास्वहे | तास्महे |
| तासे | तासाथे | ताध्वे |
| ता | तारौ | तारः |

**ATMANEPADA.**—(*Concluded*).

SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| स्ये | स्यावहे | स्यामहे |
| स्यसे | स्येथे | स्यध्वे |
| स्यते | स्येते | स्यन्ते |

CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| स्ये | स्यावहि | स्यामहि |
| स्यथाः | स्येथाम् | स्यध्वम् |
| स्यत | स्येताम् | स्यन्त |

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| सीय | सीवहि | सीमहि |
| सीष्ठाः | सीयास्थाम् | सीध्वम् |
| सीष्ट | सीयास्ताम् | सीरन् |

## Terminations of the AORIST.

**[Due reference being paid to examples, these are generally the only sets of terminations in both Padas ]**

**PARASMAIPADA.**

*EXAMPLES.*

I

| | | | |
|---|---|---|---|
| अम् | व | म | अपाम् । |
| स् | तम् | त | |
| त् | ताम् | उः | |

II

| | | | |
|---|---|---|---|
| अम् | आव | आम | अपुषम् । |
| अस् | अतम् | अत | |
| अत् | अताम् | अन् | |

*EXAMPLES.*

III

| | | | |
|---|---|---|---|
| सिषम् | सिष्व | सिष्म | अग्लासिषम् |
| सीः | सिष्टम् | सिष्ट | |
| सीत् | सिष्टाम् | सिषुः | |

IV

| | | | |
|---|---|---|---|
| सम् | साव | साम | अलिक्षम् । |
| सः | सतम् | सत | |
| सत् | सताम् | सन् | |

## Terminations of the AORIST.

**PARASMAIPADA.**

*EXAMPLES.*

V

| | | | |
|---|---|---|---|
| सम् | स्व | स्म | अजैषम् । |
| सीः | स्तम् | स्त | |
| सीत् | स्ताम् | सुः | |

VI

| | | | |
|---|---|---|---|
| इषम् | इष्व | इष्म | अगादिषम् । |
| ईः | इष्टम् | इष्ट | |
| ईत् | इष्टाम् | इषुः | |

**ATMANEPADA.**

VII

| | | | |
|---|---|---|---|
| ए | आवहि | आमहि | अचकमे । |
| अथाः | एथाम् | अध्वम् | |
| अत | एताम् | अन्त | |

*EXAMPLES.*

VIII

| | | | |
|---|---|---|---|
| सि | सावहि | सामहि | अलिक्षि । |
| सथाः | साथाम् | सध्वम् | |
| सत | साताम् | सन्त | |

IX

| | | | |
|---|---|---|---|
| सि | स्वहि | स्महि | अमंसि । |
| स्थाः | साथाम् | ध्वम् | |
| स्त | साताम् | सत | |

X

| | | | |
|---|---|---|---|
| इषि | इष्वहि | इष्महि | अशङ्किषि |
| इष्ठाः | इषाथाम् | इड्ढ्वम् | |
| इष्ट | इषाताम् | इषत | |

With reference to Conjugational Tenses, mostly all the notable features about them in both Padas and Sets are given below. As regards the points worthy of note about the Non-conjugational Tenses, they are given generally under their respective heads.

10. प्रथमभागविकरणचतुष्टयानां शब्विकरणे परे विकरणनिमित्तक गुणः पदद्वितयेऽपि धातोरन्त्याचश्च उपधाभूतह्रस्वाचश्च भवति ।

In the first set (under which are comprised the 1st, the 4th, the 6th, and the 10th conjugations), the final or the penultimate short vowel of roots of the 1st conjugation in Parasmaipada and Atmanepada, takes *guna* when they are followed by the Conjugational sign.

*Examples* :—1st conj. बुध् + अ = बोध् + अ + ति = बोधति; नी + अ = ने + अ = नय् + अ = नय + ति = नयति, नयते ।

11. श्यन्विकरणे परे गुणः न भवति ।

But to the 4th conjugation, the above rule does not apply.

*Examples* :—4th conj. मुह् + य = मुह्य + ति = मुह्यति; डी+ य = डीय + ते = डीयते ।

12. शविकरणे परे च गुणः न भवति ।

Neither does the final nor the penultimate short vowel of roots of the 6th conjugation take *guna*, when they are followed by the conjugational sign.

*Examples* :—6th conj. विश् + अ + ति = विशति । कॄ + अ + ति = किरति ।

13. णिज्विकरणे परे उपधाभूताकारस्य अन्त्यानामचाञ्च वृद्धिर्भवति । उपधाभूतानाम् अकारभिन्नानां ह्रस्वाचान्तु गुणः भवति ।

In the 10th conjugation, the penultimate अ, or the final vowel, of roots takes *Vriddhi*, when they are followed by the conjugational sign अय. But penultimate short vowels other than अ take *guna* under the same circumstances.

*Examples* :—10th conj. तड् + अय = ताड् + अय = ताडय + ति = ताडयति । पॄ + अय = पारय + ति = पारयति । चुर् + अय = चोर् + अय + ति = चोरयति, चोरयते ।

14. द्वितीयभागप्रत्ययेषु परेषु श्नुविकरणे उविकरणे परस्मैपदलट्-लङोरेकवचनेषु लोटि प्रथमपुरुषैकवचने उत्तमपुरुषे च विकरणस्थस्य उकारस्य गुणो भवति ।

Of the Parasmaipada roots of the 5th and the 8th conjugations, the उ in the conjugational sign takes *guna* when followed by the singular terminations of the Present and the Imperfect tenses or by the third person singular and the first person terminations of the Imperative mood.

15. लुग्विकरणश्लुविकरणयोस्तु अनन्तरोक्तेषु परस्मैपदप्रत्ययेषु परेषु धातोः अन्त्याचः उपधाभूतह्रस्वाचश्च गुणः भवति ।

In the 2nd and 3rd conjugations, the final or the penultimate short vowel of roots takes *guna*, when followed by the Parasmaipada terminations cited above.

श्लुविकरणे धातोः एकाचः द्वित्वं सार्वधातुकप्रत्ययेषु परेषु । लिट्प्रकरणे पञ्चमसूत्रप्रभृति नवमसूत्रपर्यन्तं त्रयोदशसूत्रप्रभृति षोडशसूत्रपर्यन्तं प्रोक्तसूत्राणि अत्रापि उपयुज्यन्ते । निज्, विज्, विष्, एतेषां सार्वधातुके अभ्यासस्य गुणः भवति । अभ्यस्तानां एतेषां त्रयाणां धातूनां लघूपधलक्षणः गुणस्तु हलादि प्रत्ययेष्वेव भवति । पृ, पॄ, ऋ, भृ, हा (गतौ), मा, एतेषां सार्वधातुके अभ्यासस्य इकारः । ऋधातोः अभ्यासइकारस्य इय् इत्यादेशो भवति । हा, मा, एतयोः धात्वोः गुणनिषेधकप्रत्ययेषु हलादौ परे ईकारः अन्तादेशः, अजादौ आकारस्य लोपः । हा (त्यागे) इति धातोः विधिलिङि सर्वत्र आकारः लुप्यते । उस् परस्मैपदलङः प्रथमपुरुषबहुवचनम् । उसि परे श्लुविकरणधातूनाम् अन्त्यः इकारः उकारः ऋकारः गुणं लभते.

16. In the third conjugation, the first vowel together with the initial consonant if any is reduplicated before the terminations are added. The rules regarding reduplication given in paras 5 to 9 and 13 to 16 in the लिट्प्रकरण are applicable here also.

In the conjugational tenses the reduplicative syllables of the roots निज्, विज् and विष् take their Guna substitute throughout, while their second syllables take Guna only before consonantal strong terminations.

The roots ह्व, पॄ, ऋ, भृ, हा, 'to go,' and मा change in the conjugational tenses the vowels of their reduplicative syllables to इ; this इ of the root ऋ becomes इय्.

हा and मा change their final to ई when followed by a weak termination beginning with a consonant and drop it before a weak termination begining with a vowel.

हा 'to abandon' drops its final before the terminations of the Potential.

उस् is the Imperfect third person plural termination in the Parasmaipada, and the final इ, उ, and ऋ of roots take *guna* before it.

*Examples:*—5th Conj. चि + नु + ति = चिनोति, अचिनोत्, चिनोतु, चिनवानि, चिनवाव, चिनवाम।

8th Conj. कृ—कर् + उ = करु + ति = करोति, अकरोत्, करोतु, करवाणि, करवाव, करवाम।

2nd Conj. विद् + ति = वेद् + ति = वेत्ति, अवेत्, वेत्तु, वेदानि, वेदाव, वेदाम।

3rd Conj. भृ + ति = भृभृ + ति = भभृ + ति = बभृ + ति = बिभृ + ति = बिभर्ति, अबिभः, अबिभरुः, बिभर्तु, बिभराणि, बिभराव, बिभराम; नेनेक्ति, नेनिक्तः, अनेनिजम्; पिपर्मि; इयर्ति; जिहीते; जह्यात्, अजुहवुः; मिमीते, मिमते।

17. द्वितयिभागात्मनेपदे तु लोडुत्तमपुरुष एव गुणो भवति।

Before the Imperative first person alone of the Atmanepada terminations of the roots of the 2nd, 3rd, 5th, and 8th conjugations of the second set, their विकरण takes *guna*.

*Examples* :—चिनवै, चिनवावहै, चिनवामहै, चिनुते ; तनवै, तनवावहै, तनवामहै, तनुते ; लेहै, लेहावहै, लेहामहै, लीढे ; बिभरै, बिभरावहै, बिभरामहै, बिभृते।

18. श्नंविकरणे परस्मैपदिनां धातूनां लट्लङ्एकवचनप्रत्ययेषु लोडुत्तमपुरुषप्रत्ययेषु लोट्प्रथमपुरुषैकवचनप्रत्यये च परेषु धातुस्थ-अचः धात्वन्तहलश्च मध्ये नकारो भवति ; अन्यत्र नकारस्थ-अकारस्य लोपः। आत्मनेपदिनां तु धातूनां लोडुत्तमपुरुषं विना सर्वत्र नकारस्थ-अकारलोपः।

In the 7th Conjugation, in the case of Parasmaipadi roots between their vowel and their final consonant is inserted न, when the singular terminations of the Present and the Imperfect and the third person singular termination and the terminations of the first person of the Imperative follow ; in other cases न् is inserted in the same place. In regard to Atmanepadi roots, न is similarly inserted when they are followed by the terminations of the first person of the Imperative and न् when followed by all other terminations.

The radical nasal in this conjugation is dropped. The root तृह् inserts ने in the place of न when the termination begins with a consonant.

*Examples* :—7th Conj. रुणद्धि, रुन्धः, रुन्धन्ति, रुन्धे, रुन्धाते, रुन्धते ; तृणेढि, but तृणहानि।

19. श्नाविकरणे परस्मैपदिनां धातूनां लट्लङ्एकवचनप्रत्ययेषु, लोट्प्रथमपुरुषैकवचनप्रत्यये, लोट्उत्तमपुरुषप्रत्ययेषु च परेषु ना भवति। अन्यत्र हलादिप्रत्ययेषु परेषु विकरणस्थ-आकारस्य ईकारः, अजादिप्रत्ययेषु परेषु विकरणस्थ-आकारस्य लोपः। आत्मनेपदिनां धातूनां तु लोडुत्तम-पुरुषप्रत्ययेषु परेषु ना भवति ; इतरत्र परस्मैपदिनामिव विकरणस्य नीभावः, आकारलोपश्च भवति। हलन्तानां परस्मैपदिनां धातूनां, लोट्मध्यम-पुरुषैकवचने विकरणस्य प्रत्ययस्य च स्थाने आन इति प्रत्ययो भवति।

In the ninth Conjugation, the conjugational sign ना is added to the roots of the Parasmaipada before the singular terminations of the Present and the Imperfect tenses and before the third person singular and the first person terminations of the Imperative mood. In the case of other Parasmaipada terminations, नी is added to the roots before terminations beginning with a consonant and न् before those beginning with a vowel. In the Atmanepada, ना is added to the roots before the first person terminations of the Imperative mood, नी before the other terminations beginning with a consonant and न् before those beginning with a vowel. In the Parasmaipada second person singular of the Imperative mood, in regard to roots ending in a consonant, आन takes the place of the termination and the conjugational sign.

*Examples* :—गृह्णाति, अगृह्णात्, गृह्णातु, गृह्णानि, गृह्णीतः, गृह्णन्ति, गृह्णै, गृह्णीते, गृहाण ।

20. Optional forms and irregularities other than those that are spoken of above will be found in the chapters dealing in full with the conjugations of roots.

21. लुङ्लङ्लृङ्क्ष्वडुदात्तः। 22. आडजादीनाम्। 23. आटश्च। लुङि लङि लृङि च हलादिधातोः पूर्वम् अकारः आसज्यते। अजादीनां तु आकारः आसज्यते। पूर्वस्य आकारस्य उत्तरस्य अचश्च वृद्धिरेकादेशः भवति।

In the Aorist, the Imperfect and the Conditional, अ is prefixed to roots beginning with a consonant; and to roots beginning with a vowel, आ is prefixed which with the following vowel takes the corresponding *Vriddhi* substitute.

*Examples* :—अनयत्; आटत्; ऐक्षत.

# CHAPTER IV.

*[As the radical changes in the Conjugational Tenses are easy, they have not been explained in detail.]*

# आर्धधातुकतिङाम् इडागमप्रकरणम् ।

## AUGMENT इ IN THE NON-CONJUGATIONAL TENSES.

1. आर्धधातुकस्येड्वलादेः । यकारेतरहलाद्यार्धधातुकप्रत्ययानां इडागमः भवति ।

To the non-conjugational terminations, beginning with any consonant except य, the augment इ is prefixed before they are applied to certain roots.

2. धातवस्तु सेट्का अनिट्का इति द्वेधा विभज्यन्ते । सेट्कधातुभ्यः परेषां प्रत्ययानाम् इडागमो भवति ; अनिट्केभ्यस्तु न भवति । तत्र अजन्तेषु धातुषु, ऊदन्तान् ॠदन्तान् यु-रु-प्रभृतींश्च धातून् वर्जयित्वा अन्ये एकाचः धातवः अनिटः । ऊदॄदन्तादयः सर्वेऽप्यनेकाचश्च धातवः सेटः । (सन्नन्तणिजन्तयङन्तादयश्च सेटः भवन्तीति बोध्यम् ।)

*Examples* :—बभूविम, तरिता, यविष्यति, रविष्यति, अक्ष्णविष्यत्, शिश्यिषे, सुष्णुविव, नुनुविम, चुक्षविथ, शिश्वियिम, डिड्यिषे, श्रयिता, वरिता, वरिष्यति, जजागरिम, चिकीर्षिता, कारयिता, बोभविता ।

तथाह्याहुः—

ऊदॄदन्तैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीङ्श्रिभिः ।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥

Roots are generally divided into two sets, the *Set* ones and the *Anit* ones. The Augment इ is placed before the terminations in the case of *Set* roots, but not in the case of *Anit* roots. Such roots as are of one syllable and end in any vowel except ऊ and ॠ, the roots यु, रु etc., also being excepted, are *Anit* ones; but all roots of more than one syllable are *Set*. (Desideratives, Causals, and Frequentatives etc., are to be regarded as *Set.*)

3. हलन्तेषु धातुषु शक्लपचियादिश्लोकपठितान् द्व्यधिकशतं धातून् विना अन्ये हलन्तधातवः सेट्काः ; शक्लपच्यादयस्तु अनिटः ।

Of roots ending in consonants, the 102 enumerated in the stanzas below beginning with शक्ल, पच्, are *Anit* and the rest are *Set*.

*Examples* :—मोदिता, गदिता, etc. *Set*; शक्ता, पक्ता, etc. *Anit*.

तथाच—

शक्ल-पच्-मुचि-रिच्-वच्-विच्-सिच्-प्राच्छि-त्यज्-निजिर्-भजः ।
भञ्ज्-भुज्-भ्रस्ज्-मस्जि-यज्-युज्-रुज्-रञ्ज्-विजिर्-स्वञ्जि-सञ्ज्-सृजः ॥
अद्-क्षुद्-खिद्-छिद्-तुदि-नुदः-पद्य-भिद्-विद्यतिर्-विनद् ।
शद्-सदी-स्विद्यतिः-स्कन्दि-हदी-क्रुध्-क्षुधि-बुध्यती ॥
बन्धिर्-युधि-रुधी-राधि-व्यध्-शुधः-साधि-सिध्यती ।
मन्य-हन्-आप्-क्षिप्-छुपि-तप्-तिपस्तृप्यति-दृप्यती ॥
लिप्-लुप्-वप्-शप्-स्वप्-सृपि-यभ्-रभ्-लभ्-गम्-नम्-यमो-रमिः ।
क्रुशिर्-दंशि-दिशी-दृश्-मृश्-रिश्-रुश्-लिश्-विश्-स्पृशः-कृषिः ॥
त्विष्-तुष्-द्विष्-दुष्-पुष्य-पिष्-विष्-शिष्-शुष्-श्लिष्यतयो-घसिः ।
वसतिर्-दह्-दिहि-दुहो-नह्-मिह्-रुह्-लिह्-वहिस्तथा ॥
अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम् ।

This division of *Set* and *Anit* roots is true only in a general way. The exceptions in each tense will be noted in their proper places.

# लिट्प्रकरणम् ।

## PERFECT.

1. परोक्षे लिट् । भूतानद्यतनपरोक्षार्थे धातोः लिट् स्यात् ।

(For translation, see Chapter III, 'Significations of Tenses and Moods.')

**लिट्प्रत्ययाः । Perfect Terminations.**

| परस्मैपदम् । PARASMAIPADA. | | | आत्मनेपदम् । ATMANEPADA. | | |
|---|---|---|---|---|---|
| अ | व | म । | ए | वहे | महे । |
| थ | अथुः | अ । | से | आथे | ध्वे । |
| अ | अतुः | उः । | ए | आते | इरे । |

2. एकाचो द्वे प्रथमस्य । 3. अजादेर्द्वितीयस्य । 4. लिटि धातोरनभ्यासस्य । लिटि हलादिधातूनां प्रथमौ हल्चौ द्वित्वं लभेते। अजादीनां तु प्रथमः अजेव द्वित्वं लभते ।

In the Perfect, in the case of roots beginning with a consonant, the consonant with the following vowel is reduplicated; whereas, with reference to roots beginning with a vowel, the vowel alone is reduplicated.

*Examples* :—चि, चिचि ; इ,इइ ।

5. पूर्वोऽभ्यासः । द्विरुक्तौ पूर्वभागः अभ्याससंज्ञः स्यात् ।

When a root is reduplicated, the first syllable of the reduplicated form is called Abhyasa or reduplicative syllable.

6. शर्पूर्वाः खयः । शकारषकारसकारपूर्वक-वर्गप्रथमद्वितीयादीनां धातूनां वर्गप्रथमद्वितीयैरेव सह प्रथमस्याचः द्वित्वं भवति ; नतु शकारषकारसकारसहितस्य ।

If a root begins with a conjunct consonant, the first member of which is a sibilant and the second a hard letter, the latter alone with the following vowel is reduplicated.

*Examples :*—पस्पर्ध ।

7. सार्वधातुकार्धधातुकयोः । 8. पुगन्तलघूपधस्य च । धात्वन्तानाम् उपधाभूतानां च इकारउकारऋकाराणां गुणःस्यात् गुणभाविषु प्रत्ययेषु ।

The final or the penultimate इ, उ and ऋ of roots take *guna* before terminations capable of inducing *guna* changes.

*Examples :*—चेता, स्तोता, बोद्धा ।

9. ह्रस्वः । अभ्यासस्थस्य अचः ह्रस्वो भवति ।

The vowel in the Abhyasa, if long, is shortened.

10. अचो ञ्णिति । 11. अत उपधायाः । 12. णलुत्तमो वा । परस्मैपदेषु धात्वन्त्यस्य अचः धातूपधाभूतस्य अकारस्य च लिटि प्रथमपुरुषैकवचने वृद्धिर्भवति, उत्तमपुरुषैकवचनेच विकल्पेन ।

In the Perfect Parasmaipada, the Penultimate अ and the final vowel of roots take *Vriddhi* necessarily in the 3rd person singular, and optionally in the 1st person singular.

*Examples :*—1st person singular निनाय or निनय ;
do. do. पपात or पपत ;
3rd person do. निनाय ।
do. do. पपात ।

13. एच इग्घ्रस्वादेशे ।

The short forms of ए and ऐ is इ; of ओ and औ is उ.

*Examples :*—सेव् , सिषेवे ; क्षै, चिक्षाय ।

14. अभ्यासे चर्च । अभ्यासस्थस्य वर्गद्वितीयस्य प्रथमवर्णः, चतुर्थस्य तृतीयो वर्णश्च आदेशो भवति ।

A radical hard aspirate in the Abhyasa is changed to the hard unaspirate or the first letter of its class; and a radical soft aspirate, to the soft unaspirate.

*Examples :*—पफाल, बभाण ।

15. कुहोश्चुः । अभ्यासस्थस्य कवर्गस्य चवर्गः, हकारस्य जकारश्च आदेशो भवति ।

A letter of the guttural class in the Abhyasa is changed into the corresponding letter of the palatal class, while ह substitutes ज for itself under the same circumstances.

*Examples :*—चकमे, चखान, जगाद, जघास, जहार.

16. उरत् । अभ्यासस्थऋकारस्य अकारादेशो भवति ।

The letter ऋ in the Abhyasa is changed to अ.

*Example :*—चकार ।

17. भवतेरः । भूधातोः अभ्यासोकारस्य अकारः स्यात् ।

The उ in the Abhyasa is changed to अ ।

18. भुवो वुग्लुङ्लिटोः । भूधातोः लुङ्लिटोः अजादौ प्रत्यये परे वकार आसज्यते ।

भू, in the Perfect and the Aorist, when followed by a termination beginning with a vowel, has a व् added at the end.

*Examples* :—भू + अ = भू भू + अ = भु भू + अ = बु भू + अ = ब भू + अ = बभूव् + अ = बभूव ।

19. (*a*) 1. क्रादि (कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु, and श्रु) भिन्नेभ्यः सर्वेभ्यः धातुभ्यः परेषां प्रत्ययानां लिटि इडागमः भवति ।

All roots including the Anits, except कृ, सृ, भृ etc., take the augment इ before the Perfect terminations.

*Examples* :—बिभ्यिव, बिभ्यिम ; पेचिव, पेचिम ; निन्यिषे, निन्यिवहे, निन्यिमहे ; रेमिषे, रेमिवहे, रेमिमहे ।

2. क्रादीनां तु इट् न भवति ।

*Examples* :—चकर्थ, चकृव, चकृम ; ससर्थ, ससृव, ससृम ; बभर्थ, बभृव, बभृम ; वव्रृषे, वव्रृध्वे, वव्रृवहे, वव्रृमहे ; तुष्टुषे, तुष्टुढ्वे, तुष्टुवहे, तुष्टुमहे ; दुद्रोथ, दुद्रुव, दुद्रुम ; सुस्रोथ, सुस्रुव, सुस्रुम ; शुश्रोथ, शुश्रुव, शुश्रुम ।

(*b*) ऋकारान्ताः अनिट्काः धातवः लिटि थलि इटं नाप्नुवन्ति ।

*Anit* roots ending in short ऋ do not admit of the augment इ before the 2nd person singular Parasmaipada termination of the Perfect (थ).

*Example* :—जहर्थ ।

(*c*) अजन्ता, अकारवन्तो हलन्ता वा, अनिट्का धातवः लिटि थलि विकल्पेन सेट्काः भवन्ति ।

In the case of *Anit* roots, ending in a vowel, or having an अ in them and ending in a consonant, इ is optionally prefixed to थ before it is applied to the root.

*Examples* :—निनयिथ or निनेथ, जगमिथ or जगन्थ ।

अयं त्वत्र संग्रहः—

अजन्तोऽकारवान् वा यः तास्यनिट् थलि वेडयम् ।
ऋदन्त ईदृङ्नित्यानिट् क्राद्यन्यो लिटि सेड्भवेत् ॥

(*a*) 20. **इणः षीध्वंलुङ्लिटां धोऽङ्गात् ।** 21. **विभाषेटः ।** इकार-उकार-ऋकारान्तेभ्यः धातुभ्यः परस्य अनिटः षीध्वम्, लुङ्, लिट् एतदादेशावयवस्य धकारस्य ढकारः स्यात् ।

After roots ending in any vowel except अ or आ, ध of षीध्वम्, लुङ् and लिट् when unaugmented, is changed into ढ.

*Examples :*—तुष्टुढ्वे, चकृढ्वे ।

(*b*) यं, र, ल, व, ह, एभ्यः परस्मात् इटः परः यः पूर्वोक्तधकारः तस्य ढकारः वा स्यात् ।

But this change takes place optionally when the augment इ is preceded by य, र, ल, व or ह ।

*Examples :*—दिदीयिध्वे or दिदीयिढ्वे, जह्विध्वे or जह्विढ्वे, चेलिध्वे or चेलिढ्वे, दिदिविध्वे or दिदिविढ्वे, जगाहिध्वे or जगाहिढ्वे ।

22. **स्वरतिसूतिसूयतिधूञूदितो वा ।** 23. **रधादिभ्यश्च ।** स्वृ, सू, धू, गुप्, त्रप्, सिध्, क्षम्, मृज्, क्लिन्द्, अञ्ज्, स्यन्द्, क्लृप्, गुह्, गाह्, अश्, रध्, नश्, तृप्, दृप्, मुह्, स्निह्, एते धातवः विकल्पेन आर्धधातुकस्थलेषु सेटः भवन्ति । स्वृसूधूनां तु थलोऽन्यत्र इडागमो नित्यं भवति ।

Some roots, a few of which are mentioned above, affix इ optionally before the non-conjugational terminations. But the first three of those that have been enumerated above, take इ necessarily before all the Perfect terminations except थल.

*Examples :*—जुगोपिथ or जुगोप्थ, तत्रपिथ or तत्रप्थ, सिषेदिथ or सिषेद्ध, चक्षमिथं or चक्षन्थ, ममाजिथ or ममार्ष्ठ, चिक्लिन्दिथ or चिक्लिन्त्थ, आनञ्जिथ or आनङ्क्थ, सस्यन्दिथ or सस्यन्त्थ, चकल्पिषे or चकल्प्से, जुगूहिथ or जुगूढ, जगाहिषे or जघाक्षे, आनशिषे or आनक्षे, ररान्दिथ or ररन्त्थ, नेशिथ or ननंष्ठ, ततर्पिथ or तत्रप्थ, ददर्पिथ or दद्रर्प्थ, मुमोहिथ or मुमोढ, सिष्णेहिथ or सिष्णेढ, सस्वरिथ or सस्वर्थ, सुषुविध्वे or सुषूध्वे, दुधविथ or दुधोथ ।

24. **अत एकहल्मध्येऽनादेशादेर्लिटि ।** 25. **थलि च सेटि ।** **अविकृताभ्यासस्य धातोः असंयुक्तहल्मध्यस्थस्य अकारस्य एकारः स्यात् अभ्यासश्च लिटि लुप्यते, परस्मैपदप्रथमोत्तमपुरुषैकवचने अनिटं थलं च वर्जयित्वा ।**

When, in a root, an अ occurs between two simple consonants, and when in the process of reduplication the Abhyasa is unaltered, the अ is changed to ए and the Abhyasa also is dropped before all terminations except the singular of the 1st and 3rd person Parasmaipada and unaugmented थल् ।

*Examples :*—ततान, तेनतुः, तेनुः ; पेचे, पेचिवहे, पेचिमहे ; पपाच पपच, पपक्थ ।

26. **तॄफलभजत्रपश्च ।** 27. **राधो हिंसायाम् । तॄ, फल्, भज्, त्रप्, हिंसार्थकराध् एतेषां धातूनां परस्मैपदप्रथमोत्तमपुरुषैकवचने अनिटं थलंच वर्जयित्वा अकारः आकारो वा एकारो भवति ।**

तॄ, फल्, भज्, त्रप्, and राध् meaning 'to offend', alter their अ or आ to ए before all the Perfect terminations except those of the 1st person and 3rd person singulars, Parasmaipada, and unaugmented थल् ।

28. **वा जॄभ्रमुत्रसाम् ।** 29. **फणां च सप्तानाम् । जॄ, भ्रम्, त्रस्, फण्, राज्, भ्राज्, भ्राश्, भ्लाश्, स्यम्, स्वन्, एतेषां दशानां धातूनां परस्मैपदप्रथमोत्तमपुरुषैकवचने अनिटं थलं च वर्जयित्वा अकारः आकारो वा विकल्पेन एकारो भवति ।**

The above mentioned 10 roots change their अ or आ to ए optionally before all the Perfect terminations except those of the 1st person and 3rd person singulars, Parasmaipada, and unaugmented थल्।

*Examples :*—तेरुः, फेलुः भेजिरे, त्रेपिरे, रेधुः, जेरुः or जजरुः, भ्रेमुः or बभ्रमुः, त्रेसुः or तत्रसुः, फेणुः or पफणुः, रेजुः or रराजुः, भ्रेजिरे or बभ्राजिरे, भ्रेशिरे or बभ्राशिरे, भ्लेशिरे or बभ्लाशिरे, स्येमुः or सस्यमुः, स्वेनुः or सस्वनुः।

30. मस्जिनशोर्झलि । मस्ज्, नश्, अनयोरकारात्परतः नकार आसज्यते हलादिगुणभाविषु प्रत्ययेषु ॥

मस्ज् and नश्, when followed by a termination, capable of inducing Guna changes, insert a न् after their अ।

*Examples :*—ममज्जिथ or ममंक्थ, नेशिथ or ननंष्ठ।

31. इजादेश्च गुरुमतोऽनृच्छः । 32. कृञ्चानुप्रयुज्यते लिटि । आकारव्यतिरिक्तदीर्घादिभ्यः संयुक्तहल्परक - अकार - व्यतिरिक्त-अजादिभ्यः (अनेकाज्भ्यश्च) धातुभ्यः आम् प्रत्ययः स्याल्लिटि; आमन्तेभ्यः परत्र कृ, भू, अस्, एतेषां धातूनां लिड्रूपाणि च अनुप्रयुज्यन्ते।

To roots beginning with any long vowel except आ or with a short vowel (except अ) followed by a conjunct consonant—to such roots and to roots of more than one syllable, the termination आम् is affixed in the Perfect and then the perfect forms of कृ, भू and अस् are added (necessarily, of course, after आम्)।

*Examples :*—ईशाञ्चक्रे, इन्दाञ्चकार, कथयाञ्चकार, पुत्रीयाञ्चकार, जागराञ्चकार, चिकीर्षाञ्चकार।

33. दयायासश्च । दय्, अय्, आस् (कास्), एभ्यः आम् नित्यः अनुप्रयोगः पूर्ववत्।

दय्, अय्, आस्, and कास् do necessarily take the termination आम्. Their Perfect forms are then formed by adding the reduplicated Perfect forms of कृ, भू and अस्.

*Examples* :—दयाञ्चक्रे, अयाञ्चक्रे, आसाञ्चक्रे, कासाञ्चक्रे ।

34. **उषविदजागृभ्योऽन्यतरस्याम् ।** 35. **भीह्रीभृहुवां श्लुवच्च ।** उष्, विद्, जागृ, भी, ह्री, भृ, हु, एभ्यः आम् विकल्पेन भवति । भी, ह्री, भृ, हु एतेषां द्वित्वञ्च भवति । अनुप्रयोगः पूर्ववत् । आमि परे गुणो भवति । (विदस्तु न ।)

उष्, विद्, जागृ, भी, ह्री, भृ, and हु affix आम् optionally. भी, ह्री, भृ, and हु, however, necessarily reduplicate their bases, before आम् and the helping verb are added. Before आम्, the final vowel and the penultimate short one of roots (except विद् in the latter case) take their Guna substitute.

*Examples* :—ओषांचकार or उवोष, विदांचकार or विवेद, जागराञ्चकार or जजागार । बिभाय or बिभयाञ्चकार, जिह्राय or जिह्रयाञ्चकार, बभार or बिभराञ्चकार, जुहाव or जुहवांचकार ।

36. **अत आदेः ।** अभ्यासादिभूताकारस्य दीर्घः भवति ।

The अ in the beginning of the reduplicative syllable is lengthened.

*Example* :—आद ।

37. **तस्मान्नुड् द्विहलः ।** द्विहलो धातोः दीर्घीभूतादकारात्परतः नकार आसज्यते ।

Roots beginning with अ but ending in conjunct consonants, insert न् after the reduplicative syllable.

*Example* :—आनर्द ।

# संप्रसारणप्रकरणम् ।

## SAMPRASARANA PRAKARANA.

1. इग्यणः संप्रसारणम् । यणः स्थाने प्रयुज्यमानः इक् संप्रसारण-संज्ञः स्यात् ।

The letters इ, उ, ऋ, and ऌ, substituted for य, व, र and ल respectively, are known as Samprasarana.

2. वचिस्वपियजादीनां किति । 3. ग्रहिज्याववयिव्यधिवष्टि विचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च । 4. लिट्यभ्यासस्योभयेषाम् । 5. विभाषा श्वेः । वच्, स्वप्, यज्, वप्, वद्, वस्, वे, व्ये, ह्वे, वद्, ग्रहिं, ज्या, वयि, व्यध्, वश् (छान्दसः,) विच्, व्रच्, प्रच्छ्, भ्रस्ज् एतेषां लिटि अभ्यासस्य संप्रसारणं स्यात् ।

The Abhyasa of the above mentioned roots takes Samprasarana in the Perfect.

6. वचिस्वपियजादीनाम् एकवचनवर्जलिट्प्रत्यये, परस्मैपदाशीर्लिङि, क्तप्रत्यये, क्त्वाप्रत्यये, क्तवतुप्रत्यये, ल्यप्प्रत्यये च परतः, ग्रहिज्यावयिव्यधिव-ष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां तत्तद्विकरणे च परतः संप्रसारणं स्यात् । विकरणे परतः वयिधातोः संप्रसारणं न भवति । श्विधातोस्तु लिटि संप्रसा-रणं विकल्पेन भवति ।

Before all terminations except those of the Singular of the Perfect and of the Benedictive mood, and before the affixes क्त, क्त्वा, क्तवतु and ल्यप् the roots ग्रह्, ज्या etc., etc., take Samprasarana. The roots वच्, स्वप्, यज्, etc. and ग्रह्, ज्या followed by their respective conjugational signs, take the corresponding Samprasarana. वय्, however, when followed by its विकरण does not take Samprasarana. श्वि takes Samprasarana optionally in the Perfect.

7. **संप्रसारणाच्च । संप्रसारणात् परः अच् लुप्यते ।**

The vowel following a Samprasarana is dropped.

8. **न संप्रसारणे संप्रसारणम् । द्वयोर्यणोर्मध्ये परस्यैव संप्रसारणम् ।**

If two letters, capable of taking Samprasarana, occur together, the second alone takes its corresponding Samprasarana.

*Examples* :—इयाज, ईजतुः, ईजुः ; सुष्वाप, सुषुपतुः, सुषुपुः ; उवाच, ऊचतुः, ऊचुः ; उवाप, ऊपतुः, ऊपुः ; उवास, ऊषतुः, ऊषुः ; उवाय, ऊयतुः or ऊवतुः, ऊयुः or ऊवुः ; विव्याय, विव्यतुः, विव्युः ; जुहाव, जुहुवतुः, जुहुवुः ; उवाद, ऊदतुः, ऊदुः ; शुशाव, or शिश्वाय, शुशुवतुः or शिश्वियतुः, शुशुवुः or शिश्वियुः ; उक्तः, उक्तवान्, उक्त्वा, प्रोच्य, गृह्णाति, जिनाति, विध्यति,विचति, वृश्चति, पृच्छति, भृज्जाति ।

The other irregularities in the Perfect may be learned from paradigms of roots themselves given in Chapter VI.

# लुट्प्रकरणम् ।

## FIRST FUTURE.

1. **स्यतासी लृलुटोः ।** 2. **लुटः प्रथमस्य डारौरसः ।** 3. **रि च ।** 4. **सार्वधातुकार्धधातुकयोः ।** 5. **पुगन्तलघूपधस्य च । धातूनां लुटि प्रथमपुरुषे ता, तारौ, तारः इति प्रत्ययाः भवन्ति । धातूनाम् अन्त्यभूताः उपान्त्याश्च इकार-उकार-ऋकार-ऌकाराः गुणं लभन्ते । तदुपरि मध्यमपुरुषोत्तमपुरुषयोः असधातुरूपाणि तत्तत्पदानुगुण्येन अनुप्रयोज्यानि । इडागमस्तु यथानियमं भवति ।**

To roots, in the 3rd person, the termination ता, तारौ, तारः are to be appended, when followed by which terminations, the final vowel or the penultimate short one (इ, उ, ऋ, ऌ) of the roots substitutes its Guna letter. In the 1st

and the 2nd person, the corresponding forms of अस्, present tense, are to be added on, after ता has been affixed to the roots. The Pada of अस् is, however, dependent on that of the root. If the root is *Set*, इ is to be prefixed to the ता before it is added to the root. If the root is *Anit*, the augment इ does not occur; or if the root is optionally *Set*, the augment also occurs optionally.

*Examples :*—भवितास्मि, मोदितासे ।

6. **तीषसहलुभरुषरिषः ।** 7. **ग्रहोऽलिटि दीर्घः । इष्, सह्, लुभ्, रुष्, रिष्, एतद्धातुभ्य नकारादेः आर्धधातुकस्य इड्विकल्पेन भवति । ग्रह्धातोस्तु लिडितरार्धधातुकस्थले इट् दीर्घो भवति ।**

The roots इष्, सह्, लुभ्, रुष्, and रिष् are optionally *Set* in the non-conjugational tenses when followed by an affix beginning with त्. In the case of ग्रह्, the augment इ is lengthened before all the non-conjugational terminations except those of the Perfect.

*Examples :*—एषिता, एष्टा; सहिता, सोढा; लोभिता, लोब्धा; रोषिता, रोष्टा; रेषिता, रेष्टा; ग्रहीता ।

8. **वृतो वा । ॠकारान्तधातूनां वृधातोश्च लिटम्, आत्मनेपदाशीर्लिङम्, परस्मैपदलुङं च, वर्जयित्वा इड्विकल्पेन दीर्घः भवति ।**

The root वृ, and such roots as end in long ॠ, optionally lengthen the augment इ before all the non-conjugational terminations except those of the Perfect, Benedictive Atmanepada, and Aorist Parasmaipada.

*Examples :*—तरिता, तरीता; वरिता, वरीता ।

9. **अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् । अनिड्धातोः अन्त्याक्षरात्पूर्व ऋकारः तकारथकारसकारादौ गुणवृद्धिग्राहके प्रत्यये परे सति विकल्पेन रेफो भवति ।**

*Anit* roots with a penultimate ऋ and followed by a Guna—or a Vriddhi—taking termination beginning with त्, थ्, or स्, change that ऋ to र optionally.

*Examples* :—स्प्रष्टा or स्पर्ष्टा ।

10. सहिवहोरोदवर्णस्य । सह् वह् धात्वोः हकारस्थानिकढकारः लुप्यते, पूर्वः अकारः आकारो वा ओकारः भवति ।

सह् and वह् drop the ढ, occurring in the stead of ह, whilst the preceding अ or आ is changed to ओ.

*Examples* :—सोढा, वोढा ।

11. तासि च क्लृपः । क्लृप् धातोः परस्मैपदपक्षे इडागमः न भवति, आत्मनेपदे तु विकल्पेन भवति ।

क्लृप् is optionally Parasmaipada in this tense, and, when it is so, does not admit of the augment इ. Before the Atmanepada terminations, however, the augment इ occurs optionally in the case of this root.

*Examples* :—कल्प्तासि, कल्पितासे, कल्प्तासे ।

# लृट्प्रकरणम् ।

## SECOND FUTURE.

1. स्यतासी लृलुटोः । लृटि धातोः स्यप्रत्ययो भवति । इडागमस्तु लुट इव भवति । लृट्प्रत्ययात्पूर्वम् उपधाह्रस्वाचः अन्त्याचश्च गुणः भवति ।

स्य is affixed to roots and then the corresponding terminations of the Present tense are added. The augment इ occurs as in the first future. The penultimate short and the final vowels take Guna before the terminations.

*Examples* :—लप्स्ये, भाविष्यामि, देक्ष्यामि ।

2. सः स्यार्धधातुके । धात्वन्त्यसकारः तकारो भवति सकारादौ आर्धधातुके परतः ।

When followed by a non-conjugational termination beginning with स्, the final स् of roots is changed to त्.

*Example* :—वत्स्यति ।

3. गमेरिट् परस्मैपदेषु । 4. ऋद्धनोः स्ये । अनिटोरपि गम्हनोः, ऋकारान्तस्य धातोश्च स्यप्रत्ययात्पूर्वम् इडागमो भवति ।

Though गम् and हन् and roots ending in short ऋ are *Anit*, yet they affix इ before स्य.

*Examples* :—गमिष्यामि, हनिष्यामि, वरिष्यामि ।

5. सेऽसिचि कृतचृतछृदतृदनृतः । कृत्, चृत्, छृद्, तृद्, नृत्, एतेषां सेटामपि सिच्भिन्नसकारादिप्रत्ययात्पूर्वम् इडागमः विकल्पेन भवति ।

कृत्, चृत्, छृद्, तृद्, नृत्—though these roots are *Set*, they take the augment इ optionally before the non-conjugational terminations beginning with स् except सिच्.

*Examples* :—कर्तिष्यति or कर्त्स्यति, चर्तिष्यति or चर्त्स्यति, छर्दिष्यति or छर्त्स्यति, तर्दिष्यति or तर्त्स्यति, नर्तिष्यति or नर्त्स्यति ।

6. वृद्भ्यः स्यसनोः । 7. न वृद्भ्यश्चतुर्भ्यः । क्लृप्, वृत्, वृध्, शृध्, स्यन्द्, एतेषां लृटि विकल्पेन परस्मैपदं भवति । परस्मैपदप्रत्ययः इटं नाप्नोति ।

क्लृप्, वृत्, वृध्, शृध्, and स्यन्द् are optionally Parasmaipada in this tense, and when so, do not affix the augment इ before स्य.

*Examples :*—वर्धिष्यते or वर्त्स्यति, वर्तिष्यते or वर्त्स्यति, शर्धिष्यते or शर्त्स्यति, स्यन्दिष्यते or स्यन्त्स्यति, कल्प्स्यते or कल्प्स्यति ।

# ऌङ्प्रकरणम् ।

## CONDITIONAL MOOD.

1. ऌङि प्रत्ययाः धातोः पूर्वत्र अकार-आकारसंयोजनं च लङ्वत्, अन्यत्सर्वं ऌटीव ।

To roots in the Conditional, as in the Imperfect, अ or आ is prefixed and then स्य is appended, after which the terminations of the Imperfect are added. In other respects, the forms are similar to those of the Second Future.

2. विभाषा लुङ्ऌङोः । अधिपूर्वकेङ्धातोः ऌङि लुङि च विकल्पेन गा आदेशः स्यात् ।

इ with अधि optionally substitutes गा for its इ in the Conditional and the Aorist. The गा is further changed to गी before consonants.

*Examples :*—अध्यैष्ये or अध्यगीष्ये ।

# आशीर्लिङ्प्रकरणम् ।

## BENEDICTIVE MOOD.

परस्मैपदप्रत्ययाः । **Parasmaipada Terminations.**

| | | |
|---|---|---|
| यासम् | यास्व | यास्म । |
| याः | यास्तम् | यास्त । |
| यात् | यास्ताम् | यासुः । |

1. अकृत्सार्वधातुकयोर्दीर्घः । धातोः अन्त्यभूतौ इकारोकारौ दीर्घं लभेते ।

इ and उ at the end of roots are lengthened.

*Examples :*—जीयात्, श्रूयात् ।

2. एर्लिङि । दा, धा, मा, स्था, गै, पा = to drink (1st Conj.), हा = to abandon (3rd Conj.), सो, एतेषाम् अन्त्याचः स्थाने एकारो भवति ।

The roots दा, धा, मा, स्था, गै, पा = to drink (1st conj.), हा = to abandon (3rd Conj.), and सो, substitute for their final vowel the letter ए.

*Examples :*—देयात्, धेयात्, मेयात्, स्थेयात्, गेयात्, पेयात्, हेयात्, सेयात् ।

3. आदेच उपदेशेऽशिति । 4. वान्यस्य संयोगादेः । धात्वन्त्यानाम् एकार-ऐकार-ओकाराणाम् आकारो भवति । स्थाभिन्नानां संयोगादीनां धातूनामन्त्यभूतस्य आकारस्य विकल्पेन एकारो भवति ।

The letters ए, ऐ and ओ at the end of roots substitute आ for themselves. Roots other than स्था beginning with a conjunct consonant, change their final आ to ए optionally.

*Examples :*—ग्लायात्, ग्लेयात् ।

5. अनिदितां हल उपधायाः क्ङिति । मन्थ्, अञ्ज्, शंस्, दंश्, सञ्ज्, रञ्ज्, भञ्ज्, स्कन्द्, ग्रन्थ्, स्तम्भ्, बन्ध्, भ्रंश्, इत्यादीनाम् अनुनासिको लुप्यते ।

The Anusvara or the नकार of the roots mentioned above and of some others is dropped.

*Examples*:—मथ्यात्, अज्यात्, शस्यात्, दश्यात्, सज्यात्, रज्यात्, भज्यात्, स्कद्यात्, ग्रथ्यात्, स्तभ्यात्, बध्यात्, भ्रश्यात् ।

**संप्रसारणं लिट्प्रकरणे द्रष्टव्यम् ।**

For Samprasarana, *see* under लिट्प्रकरण.

*Examples*:—इज्यात्, उष्यात्, गृह्यात्, पृच्छ्यात् ।

**आत्मनेपदप्रत्ययाः । Atmanepada Terminations.**

| | | |
|---|---|---|
| षीय | षीवहि | षीमहि |
| षीष्ठाः | षीयास्थाम् | षीध्वम् । |
| षीष्ट | षीयास्ताम् | षीरन् । |

एते प्रत्ययाः सेड्भ्यः परे चेत् नित्यम्, वेड्भ्यः परे चेत् विकल्पेन इटं लभन्ते । अनिड्भ्यः परे चेत् न लभन्ते ।

The augment इ is prefixed to these terminations in the case of a *Seṭ* root, necessarily; in the case of an optionally *Set* root, optionally; in the case of an *Anit* root, not at all.

*Examples*:—एधिषीष्ट, सविषीष्ट or सोषीष्ट, नेषीष्ट ।

6. इणः षीध्वंलुङ्लिटां धोऽङ्गात् । 7. विभाषेटः । अकारेतराचः परः यः षीध्वंप्रत्ययः तदवयवस्य धकारस्य ढकारः स्यात् ।

The ध् of the termination षीध्वम्, when the latter is preceded by any vowel except अ, is changed to ढ्.

*Example*:—नेषीढ्वम् ।

इडागमात्परस्य तु विकल्पेन भवति ।

But when the augment इ precedes the termination, the change indicated above is optional.

*Examples* :—एधिषीढ्वम् or एधिषीध्वम् ।

8. लिङ्सिचोरात्मनेपदेषु । वृधातोः ॠकारान्तसंयोगादिधातुभ्यश्च परे लिङ्प्रत्ययाः विकल्पेन इटं लभन्ते ।

The root वृ and roots ending in a long ॠ and beginning with a conjunct consonant, affix the augment इ optionally before the terminations indicated above.

*Examples* :—वरिषीष्ट or वृषीष्ट, स्तरिषीष्ट or स्तृषीष्ट ।

# लुङ्प्रकरणम् ।

## THE AORIST.

[लुङ्प्रकरणं संग्रहेण वक्ष्यते । Brief Notes on the Aorist.]

1. आत्मनेपदपरस्मैपदयोः लुङ्प्रत्ययाः दशधा विभज्यन्ते ।

The terminations of the Aorist are divided into ten sets as already stated in Chapter III.

**प्रथमभागप्रत्ययाः । Terminations of the 1st Set.**

| | | |
|---|---|---|
| अम् | व | म |
| स् | तम् | त |
| त् | ताम् | उस् |

2. उस्यपदान्तात् । उसः पूर्वः आकारः लुप्यते ।

The letter आ, preceding उस्, is dropped.

*Examples* :—1st Conj. स्था = to stand ; अस्थाम्, अस्थाव, अस्थाम ।

Do. दा (यच्छ्) = to give ; अदाः, अदातम्, अदात ।

Do. पा (पिब्) = to drink ; अपात्, अपाताम्, अपुः ।

3. विभाषा घ्राधेट्शाच्छासः । घ्रा, धे, शो, छो, सो, एते धातवः प्रथमभागीयान् तृतीयभागीयांश्च प्रत्ययान् लभन्ते । तत्र प्रथमभागे रूपाणि ।

The above mentioned roots take both the 1st and the 3rd sets of terminations. The resultant forms, when the terminations of the 1st set are appended, are given below.

*Examples :*—1st Conj. घ्रा = to smell ; अघ्रात्, अघ्राताम्, अघ्रुः।
Do. धेट् = to drink ; अधात्, अधाताम्, अधुः ।
4th Conj. शो = to sharpen ; अशात्, अशाताम्, अशुः ।
Do. छो = to cut ; अच्छात्, अच्छाताम्, अच्छुः ।
Do. सो = to destroy ; असात्, असाताम्, असुः ।

तृतीयभागे तु—अघ्रासीत्, अधासीत्, अशासीत् अच्छासीत्, असासीत् ।

धेधातुः द्वितीयभागप्रत्ययानपि लभते ।

धे takes the 2nd set of terminations also when the root takes the reduplication.

*Examples :*—अदधत्, अदधताम्, अदधन् ।

द्वितीयभागप्रत्ययाः । **Terminations of the 2nd Set.**

| | | |
|---|---|---|
| अम् | आव | आम |
| अस् | अतम् | अत |
| अत् | अताम् | अन् |

The changes which some roots undergo before the Aorist terminations are given in circular brackets by the side of those roots.

*Examples :*—5th Conj. आप् = to obtain ; आपम्, आपाव, आपाम ; आप:, आपतम्, आपत ; आपत्, आपताम्, आपन्।

4th Conj. अस् (अस्थ्) = to throw ; आस्थम्, आस्थाव, आस्थाम।

1st Conj. गम् = to go ; अगमम्, अगमाव, अगमाम।

4th Conj. तुष् = to be pleased ; अतुषम्, अतुषाव, अतुषाम।

Do. पुष् = to nourish ; अपुषम्, अपुषाव, अपुषाम।

1st Conj. पत् (पप्त्) = to fall ; अपप्तम्, अपप्ताव, अपप्ताम।

2nd Conj. शास् (शिष्) = to rule ; अशिषम्, अशिषाव, अशिषाम।

Do. वच् (वोच्) = to speak ; अवोचम्, अवोचाव, अवोचाम।

5th Conj. शक् = to be able ; अशकम्, अशकाव, अशकाम।

6th Conj. मुच् = to leave ; अमुचम्, अमुचाव, अमुचाम ; (also 7th set).

1st Conj. सद् = to perish ; असदम्, असदाव, असदाम।

6th Conj. सिच् = to sprinkle ; असिचम्, असिचाव, असिचाम; (also 7th set).

4th Conj. भ्रम् = to wander ; अभ्रमम्, अभ्रमाव, अभ्रमाम।

Do. शम् = to be calm ; अशमम्, अशमाव, अशमाम।

7th Conj. पिष् = to grind ; अपिषम्, अपिषाव, अपिषाम।

4th Conj. मुह् = to be foolish; अमुहम्, अमुहाव, अमुहाम ।

1st Conj. ह्वे (ह्व्) = to call; अह्वम्, अह्वाव, अह्वाम ।

2nd Conj. ख्या (ख्य्) = to tell; अख्यम्, अख्याव, अख्याम ।

4th Conj. नश् = to perish; अनशम्, अनशाव, अनशाम ।

Do. श्लिष् = to join; अश्लिषम्, अश्लिषाव, अश्लिषाम ।

Do. हृष् = to be glad; अहृषम्, अहृषाव, अहृषाम ।

Do. शुष् = to dry; अशुषम्, अशुषाव, अशुषाम ।

Do. क्षुभ् = to be agitated; अक्षुभम्, अक्षुभाव, अक्षुभाम ।

Do. शुध् = to be pure; अशुधम्, अशुधाव, अशुधाम ।

4. ऋदृशोऽङि गुणः । ऋकारान्तानां दृशेश्च ऋकारः गुणं लभते ।

The ऋ (short or long) of roots ending in ऋ and the ऋ of दृश् take Guna.

*Examples:*—3rd Conj. ऋ = to go; आरत्, आरताम्, आरन् ।

4th Conj. जॄ = to become old; अजरत्, अजरताम्, अजरन् ।

1st Conj. दृश् = to see; अदर्शत्, अदर्शताम्, अदर्शन् ।

दृश्धातुः पञ्चमभागप्रत्ययानपि लभते ।

दृश् takes the 5th set terminations also.

*Examples* :—अद्राक्षम्, अद्राक्ष्व, अद्राक्ष्म; अद्राक्षीः, अद्राष्टम्, अद्राष्ट; अद्राक्षीत्, अद्राष्टाम्, अद्राक्षुः ।

5. लुङ्सनोर्घस्ऌ । अदधातोः लुङि सनि च घस्ऌ आदेशः स्यात् । अद् is changed to घस् in the Aorist and the Desiderative.

*Examples* :— अघसत्, अघसताम्, अघसन् ।

तृतीयभागप्रत्ययाः । **Teminations of the 3rd Set.**

| | | |
|---|---|---|
| सिषम् | सिष्व | सिष्म |
| सीः | सिष्टम् | सिष्ट |
| सीत् | सिष्टाम् | सिषुः |

6. यमरमनमातां सक्च । यम्, रम्, नम्, आकारान्ताश्च धातवः तृतीयभागप्रत्ययान् लभन्ते ।

यम्, रम्, नम् and roots ending with आ take the 3rd set of terminations.

*Examples* :—1st Conj. ग्लै = to be weary; अग्लासिषम्, अग्लासिष्व, अग्लासिष्म ।

2nd Conj. या = to go; अयासिषम्, अयासिष्व, अयासिष्म ।

Do. पा = to protect; अपासिषम्, अपासिष्व, अपासिष्म ।

   

1st Conj. रम् with वि = to cease ; व्यरंसिषम्, व्यरंसिष्व, व्यरंसिष्म ।

2nd Conj. भा = to shine ; अभासिषम्, अभासिष्व, अभासिष्म ।

1st Conj. नम् = to bow ; अनंसिषम्, अनंसिष्व, अनंसिष्म ।

Do. ध्मा = to blow; अध्मासिषम्, अध्मासिष्व, अध्मासिष्म ।

2nd Conj. दो = to cut ; अदासिषम्, अदासिष्व, अदासिष्म ।

Do. स्ना = to bathe ; अस्नासिषम्, अस्नासिष्व, अस्नासिष्म ।

Do. मा = to measure; अमासिषम्, अमासिष्व, अमासिष्म ।

चतुर्थभागप्रत्ययाः । **Terminations of the 4th Set.**

| | | |
|---|---|---|
| सम् | साव | साम |
| सः | सतम् | सत |
| सत् | सताम् | सन् |

7. शल इगुपधादनिटः क्सः । श्, ष्, स्, ह्, एतदन्तानाम् इकार-उकार-ऋकारोपधानाम् अनिटां दृश्भिन्नधातूनाम् एते प्रत्ययाः भवन्ति । स्पृश्, मृश्, एतेषां तु पञ्चमभागप्रत्यया अपि भवन्ति । दुह्, दिह्, लिह्, गुह्, द्विष्, एतेषाम् अष्टमभागप्रत्यया अपि भवन्ति ।

*Anit* roots with a penultimate इ, उ or ऋ and a final श्, ष्, स् or ह् (दृश् being an exception), take this set of terminations. The roots स्पृश् and मृश् take also the fifth set

of terminations. दुह्, दिह्, लिह्, गुह्, द्विष्—these roots take also the 8th set of terminations.

*Examples* :—4th Conj. श्लिष् = to embrace; अश्लिक्षत्, अश्लिक्षताम्, अश्लिक्षन्।

6th Conj. विश् = to enter; अविक्षत्, अविक्षताम्, अविक्षन्।

Do. स्पृश् = to touch; अस्पृक्षत्, अस्पृक्षताम्, अस्पृक्षन्; (also 5th set) अस्प्राक्षीत्, अस्प्राष्टाम्, अस्प्राक्षुः; or अस्पार्क्षीत्, अस्पार्ष्टाम्, अस्पार्क्षुः।

Do. कृष् = to plough; अकृक्षम्, अकृक्षाव, अकृक्षाम; (also 5th set) अक्राक्षीत्, अक्राष्टाम्, अक्राक्षुः; or अकार्क्षीत्, अकार्ष्टाम्, अकार्क्षुः।

8. लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये। दुह्, दिह्, लिह्, गुह्, एतेषां क्वचित्प्रत्यये रूपद्वयम्।

दुह्, दिह्, लिह्, and गुह्, have two forms before certain terminations.

*Examples* :—2nd Conj. दुह् = to milk; अधुक्षम्, अधुक्षाव, अधुक्षाम; अधुक्षि, अधुक्षावहि or अदुह्वहि, अधुक्षामहि; अदुग्धाः or अधुक्षथाः, अधुक्षाथाम्, अधुक्षध्वम् or अदुग्ध्वम्; अदुग्ध or अधुक्षत, अधुक्षाताम्, अधुक्षन्त।

2nd Conj. दिह् = to increase; अधिक्षम्, अधिक्षाव, अधिक्षाम; अधिक्षि, अधिक्षावहि or अदिह्वहि, अधिक्षामहि; अदिग्धाः or अधिक्षथाः, अधिक्षाथाम्, अधिक्षध्वम् or अदिग्ध्वम्; अदिग्ध or अधिक्षत, अधिक्षाताम्, अधिक्षन्त ।

Do. लिह् = to lick; अलिक्षम्, अलिक्षाव, अलिक्षाम; अलिक्षि, अलिक्षावहि or अलिह्वहि, अलिक्षामहि; अलिक्षथाः or अलीढाः, अलिक्षाथाम्, अलिक्षध्वम् or अलीढ्वम्; अलीढ or अलिक्षत, अलिक्षाताम्, अलिक्षन्त ।

1st Conj. गुह् = to conceal; अगूहिषम् or अघुक्षम्, अगूहिष्व or अघुक्षाव, अगूहिष्म or अघुक्षाम; अघुक्षि, अघुक्षावहि or अगुह्वहि, अघुक्षामहि; अगूढाः or अघुक्षथाः, अघुक्षाथाम्, अघुक्षध्वम् or अगूढ्वम्; अगूढ or अघुक्षत, अघुक्षाताम्, अघुक्षन्त ।

पञ्चमभागप्रत्ययाः । **Terminations of the 5th Set.**

| | | |
|---|---|---|
| सम् | स्व | स्म |
| सीः | स्तम् | स्त |
| सीत् | स्ताम् | सुः |

9. सिचि वृद्धिः परस्मैपदेषु । अस्मिन् भागे धातोः अकाराभिन्नाचः वृद्धिं लभन्ते ।

Before these terminations, the vowels of roots, except अ, take their Vriddhi substitute.

*Example* :— 7th Conj. भिद् = to cut ; अभैत्सीत् ।

10. व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । छकारान्तानां शकारान्तानां व्रश्चादीनां च धातूनां यवरलानुनासिकभिन्नहलादिप्रत्यये परे षकारः अन्तादेशः स्यात् ।

The roots ending in छ् or श् and the roots व्रश्च् etc., change their finals to ष् when a termination is added beginning with any consonant other than a nasal or semi-vowel.

11. षढोः कः सि । षस्य ढस्य च कः स्यात् सकारे परे ।

ष् and ढ्, when followed by स्, are changed to क् ।

12. इण्कोः । 13. आदेशप्रत्ययोः । इकारप्रभृतिभ्यः अज्भ्यः रेफात् कवर्गाच्च परस्य प्रत्ययावयवस्य सकारस्य षकारः स्यात् ।

The स् in the beginning of a termination, when preceded by any vowel other than अ or आ or by र् or by any letter of the guttural class, is changed to ष् ।

लिट्प्रकरणोक्त 'स्वरतिसूति' इति 22 सूत्रम् अत्र ऊह्यम् ।

*Examples* :—6th Conj. मस्ज् = to be immersed in ; अमाङ्क्षीत् , अमाङ्क्ताम् अमाङ्क्षुः ।

Do. स्पृश् = to touch ; अस्प्राक्षीत् or अस्पार्क्षीत् (optionally taking Guna.); (Also takes 4th set) अस्पृक्षत् ।

6th Conj. प्रच्छ् = to ask; अ + प्रच्छ + सीत्, अ + प्राच्छ् + सीत्; अ + प्राष् + सीत्; अ + प्राक्+सीत्; अ + प्राक्+षीत्; अप्राक्षीत्, अप्राष्टाम्, अप्राक्षुः ।

Do. सृज् = to create; अस्राक्षम्, अस्राक्ष्व, अस्राक्ष्म; अस्राक्षीः, अस्राष्टम्, अस्राष्ट; अस्राक्षीत्, अस्राष्टाम्, अस्राक्षुः ।

7th Conj. रुध् = to prevent; अरौत्सम्, अरौत्स्व, अरौत्स्म; अरौत्सीः, अरौत्तम्, अरौत्त; अरौत्सीत्, अरौत्ताम्, अरौत्सुः ।

1st Conj. वह् = to bear; अवाक्षीत्, अवोढाम्, अवाक्षुः ।

Do. वस् = to dwell; अवात्सीत्, अवात्ताम्, अवात्सुः ।

Do. दह् = to burn; अधाक्षीत्, अदाग्धाम्, अधाक्षुः ।

Do. त्यज् = to abandon; अत्याक्षीत्, अत्याक्ताम्, अत्याक्षुः ।

4th Conj. तृप् = to be satisfied; अत्राप्सीत्, or अताप्सींत्; (also 6th set) अतर्पीत्; (also 2nd set) अतृपत् ।

षष्ठभागप्रत्ययाः । **Terminations of the 6th Set.**

| | | |
|---|---|---|
| इषम् | इष्व | इष्म |
| ईः | इष्टम् | इष्ट |
| ईत् | इष्टाम् | इषुः |

14. वदव्रजहलन्तस्याचः। 15. सिचि वृद्धिः परस्मैपदेषु। अत्रापि धातोः अचः वृद्धिर्भवति।

Here also, the vowels of roots take Vriddhi.

*Examples* :—1st Conj. वद् = to speak ; अवादिषम्, अवादिष्व, अवादिष्म।

Do. चर् = to walk ; अचारिषम्, अचारिष्व, अचारिष्म।

9th Conj. लू = to cut ; अलाविषम्, अलाविष्व, अलाविष्म।

16. अतो हलादेर्लघोः। अस्मिन् भागे हलादीनां धातूनां अकारस्य दीर्घो वा स्यात्, न तु संयुक्ताक्षरे परे।

Before these terminations, the अ of roots beginning with a consonant is optionally lengthened but when अ is followed by a conjunct consonant it is not lengthened.

*Examples* :—1st Conj. खद् = to be firm ; अखादिषम् or अखदिषम्, अखादिष्व or अखदिष्व, अखादिष्म or अखदिष्म।

Do. गद् = to speak ; अगादिषम् or अगदिषम्, अगादिष्व or अगदिष्व, अगादिष्म or अगदिष्म,

Do. पठ् = to read; अपाठिषम् or अपठिषम्, अपाठिष्व or अपठिष्व, अपाठिष्म or अपठिष्म।

Do. नद् = to sound ; अनादिषम् or अनदिषम्, अनादिष्व or अनदिष्व, अनादिष्म, अनदिष्म।

Do. नन्द् = to be glad ; अनन्दिषम्।

**अस्य अपवादः । Exception.**

17. **ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् । हकारमकारयकारान्तानां सेटां, क्षण, श्वस, जागृ, श्वि, लग्, हस्, एतेषां च धातूनामकारस्य न वृद्धिः ।**

But *Set* roots with a final ह्, म् or य् and the roots क्षण् etc., do not lengthen their अ before these terminations.

*Examples :*—1st Conj. मह् = to worship; अमहिषम्, अमहिष्व, अमहिष्म ।

Do. रह् = to leave; अरहिषम्, अरहिष्व, अरहिष्म ।

4th Conj. क्रम् = to transgress; अक्रमिषम्, अक्रमिष्व, अक्रमिष्म ।

1st Conj. व्यय् = to go; अव्ययिषम्, अव्ययिष्व, अव्ययिष्म ।

8th Conj. क्षण् = to kill: अक्षणिषम्, अक्षणिष्व, अक्षणिष्म ।

2nd Conj. श्वस् = to breathe; अश्वसिषम्, अश्वसिष्व, अश्वसिष्म ।

Do. जागृ = to be awake; अजागरिषम्, अजागरिष्व, अजागरिष्म ।

1st Conj. श्वि = to increase; अश्वयिषम्, अश्वयिष्व, अश्वयिष्म ।

Do. लग् = to touch; अलगिषम्, अलगिष्व, अलगिष्म ।

Do. हस् = to smile; अहसिषम्, अहसिष्व, अहसिष्म ।

18. उपधाभूतानाम् इकार, उकार, ऋकाराणां गुणः भवति ।

Penultimate इ, उ and ऋ of roots take guna.

*Examples* :—1st Conj. सिध् = to go; असेधिषम्, असेधिष्व, असेधिष्म ।

Do. शुच् = to be sorry; अशोचिषम्, अशोचिष्व, अशोचिष्म ।

7th Conj, कृत् = to cut; अकर्तिषम्, अकर्तिष्व, अकर्तिष्म ।

**सप्तमभागप्रत्ययाः । Terminations of the 7th Set.**

| | | |
|---|---|---|
| ए | आवहि | आमहि |
| अथाः | एथाम् | अध्वम् |
| अत | एताम् | अन्त |

*Examples* :—2nd Conj. वच् (वोच्) = to speak; अवोचे, अवोचावहि, अवोचामहि ।

6th Conj. लिप् = to smear; अलिपे, अलिपावहि, अलिपामहि ।

Do. मुच् = to release; अमुचे, अमुचावहि, अमुचामहि ।

Do. सिच् = to sprinkle; असिचे, असिचावहि, असिचामहि ।

**अष्टमभागप्रत्ययाः । Terminations of the 8th Set.**

| | | |
|---|---|---|
| सि | सावहि | सामहि |
| सथाः | साथाम् | सध्वम् |
| स्त | साताम् | सन्त |

19. चतुर्थभागप्रथमसूत्रोक्तानाम् आत्मनेपदधातूनाम् एते प्रत्ययाः भवन्ति ।

The Atmanepada roots mentioned in the first *sutra* dealing with the 4th set of terminations also take this set of terminations.

चतुर्थभागद्वितीयसूत्रं चात्रानुसन्धेयम् ।

Here the 2nd *sutra* under the 4th set is also applicable.

*Examples* :—2nd Conj. दुह् = to milk ; अधुक्षि, अधुक्षावहि- अदुह्वहि, अधुक्षामहि ।

एवमेव दिह्, लिह् इत्यादीनां च रूपाणि द्रष्टव्यानि ।

So also the Aorist forms of दिह्, लिह्, etc. are to be formed.

**नवमभागप्रत्ययाः । Terminations of the 9th Set.**

| | | |
|---|---|---|
| सि | स्वहि | स्महि |
| स्थाः | साथाम् | ध्वम् |
| स्त | साताम् | सत |

20. सार्वधातुकार्धधातुकयोः । धात्वन्त्यौ इकारोकारौ एषु प्रत्ययेषु परेषु गुणं लभेते ।

The final इ and उ of roots substitute their corresponding *guna* letters before these terminations.

*Examples* :—1st Conj. रम् = to sport ; अरंसि, अरंस्वहि, अरंस्महि; अरंस्थाः, अरंसाथाम्, अरंध्वम् ; अरंस्त, अरंसाताम्, अरंसत ।

1st Conj. नी = to lead; अनेषि, अनेष्वहि, अनेष्महि; अनेष्ठाः, अनेषाथाम्, अनेढ्वम्; अनेष्ट, अनेषाताम्, अनेषत ।

4th Conj. मन् = to think; अमंसि, अमंस्वहि; अमंस्महि, अमंस्थाः, अमंसाथाम्, अमंध्वम्; अमंस्त, अमंसाताम्, अमंसत ।

7th Conj. भिद् = to split; अभित्सि, अभित्स्वहि, अभित्स्महि; अभित्थाः, अभित्साथाम्, अभिद्ध्वम्; अभित्त, अभित्साताम्, अभित्सत ।

21. ह्रस्वादङ्गात् । ह्रस्वादचः प्रथममध्यमपुरुषैकवचनसकारौ लुप्येते ।

The स् of these terminations, when preceded by a short vowel, is dropped in the 2nd and the 3rd person singulars.

*Examples* :—3rd Conj. भृ = to fill; अभृषि, अभृष्वहि, अभृष्महि; अभृथाः, अभृषाथाम्, अभृढ्वम्; अभृत, अभृषाताम्, अभृषत ।

8th Conj. कृ = to do; अकृषि, अकृष्वहि, ककृष्महि; अकृथाः, अकृषाथाम्, अकृढ्वम्; अकृत, अकृषाताम्, अकृषत ।

22. स्थाघ्वोरिच्च । स्था, दा, धा, एतेषाम् आकारः अस्मिन् भागे इकारं लभते ।

The final आ of स्था, दा, and धा is changed to इ before these terminations.

*Examples* :—1st Conj. स्था (सम्) = to stand; समस्थिषि, समस्थिष्वहि, समस्थिष्महि; समस्थिथाः, समस्थिषाथाम् समस्थिध्वम्; समस्थित, समस्थिषाताम्, समस्थिषत ।

3rd Conj. दा = to give; अदिषि, अदिष्वहि, अदिष्माहि ।

Do. धा = to put; अधिषि, अधिष्वहि, अधिष्महि ।

**दशमभागप्रत्ययाः । Terminations of the 10th Set.**

| | | |
|---|---|---|
| इषि | इष्वहि | इष्महि |
| इष्ठाः | इषाथाम् | इड्ढ्वम् |
| इष्ट | इषाताम् | इषत |

23. **सार्वधातुकार्धधातुकयोः ।** 24. **पुगन्तलघूपधस्य च ।** एषु प्रत्ययेषु धात्वन्त्यः अच्, उपधाभूतः ह्रस्वश्च गुणं लभते ।

Before these terminations, the final, or the penultimate short, vowel of roots substitutes its corresponding *guna* letter.

*Examples :*—9th Conj. पू = to purify; अपविषि, अपविष्वहि, अपविष्महि; अपविष्ठाः, अपविषाथाम्, अपविढ्वम्; अपविष्ट, अपविषाताम्, अपविषत ।

1st Conj. गर्ह्=to decry, censure; अगर्हिषि, अगर्हिष्वहि, अगर्हिष्महि ।

9th Conj. ग्रह् = to take; अग्रहीषि, अग्रहीष्वहि, अग्रहीष्महि ।

1st Conj. एध्=to increase; ऐधिषि, ऐधिष्वहि, ऐधिष्महि ।

9th Conj. लू = to cut; अलविषि, अलविष्वहि, अलविष्महि ।

Aware as I am, that, under the ten sets of terminations given above, more numerous changes occur than have been noted above, yet, to avoid all semblance of cumbrousness and to render this part of grammar, as far as lay in my power, concise and intelligible, I have been moved considerably to cut down and present in as brief a form as was posssible, a much difficult and not easily comprehensible part of grammar.

---

# CHAPTER V.

# कर्मणि लकारप्रकरणम् ।

## PASSIVE VOICE.

1. सार्वधातुके यक् । भावे कर्मणि च धातोः परतः यक्प्रत्ययः स्यात् सार्वधातुके परे ।

In the Conjugational tenses, the Passive and Impersonal forms of verbs are formed by affixing य to the roots before the terminations are added.

2. भावकर्मणोः । भावे कर्मणि च आत्मनेपदं स्यात् ।

In the Passive and the Impersonal use of verbs, only Atmanepada terminations are added to roots.

3. ग्रह्यादीनां वच्यादीनां च संप्रसारणं स्यात् किति ङिति च प्रत्यये परे ।

ग्रह् etc., and वच् etc., take Samprasarana in the Passive.

*Examples* :—गृह्यते, उच्यते, इज्यते ।

4. अकृत्सार्वधातुकयोर्दीर्घः । धात्वन्त्याः इकाराः उकाराश्च दीर्घा भवन्ति यकारादौ प्रत्यये ।

The final इ and उ of roots are lengthened when followed by an affix beginning with य.

*Examples* :—जीयते, स्तूयते ।

5. घुमास्थागापाजहातिसां हलि । दा, धा, मा, स्था, गै, पा, सो, हा,—एतेषाम् अन्त्याचः स्थाने ईकारो भवति ।

दा, etc., substitute ई for their final vowel before य.

*Examples* :—दीयते, धीयते, मीयते, स्थीयते, गीयते, पीयते, सीयते, हीयते ।

6. ऋत इद्धातोः । 7. उदोष्ठ्यपूर्वस्य । 8. र्वोरुपधाया दीर्घ इकः । धात्वन्त्यस्य ऋकारस्य स्थाने इर् भवति; वकारपवर्गपूर्वस्य तु तस्य उर् भवति; रेफवान्तस्य धातोरुपधाभूतयोः इकारोकारयोः दीर्घः स्यात् हलि ।

The final ऋ of roots is changed to इर् before य; but, when preceded by a letter of the Labial class or व्, is changed to उर्. The penultimate इ or उ of roots ending in र् or व्, when followed by a consonant, is lengthened.

*Examples* :—जीर्यते, पूर्यते ।

9. अनिदितां हल उपधायाः क्ङिति । अधोलिखितानां धातूनाम् उपधाभूतनकारः लुप्यते ।

The nasal in the roots mentioned below is dropped before य of the Passive.

*Examples* :—मथ्यते, शस्यते, दश्यते, सज्यते, रज्यते, अज्यते, स्कद्यते, ग्रथ्यते, स्तभ्यते, बध्यते, भ्रश्यते ।

10. अजन्तानां धातूनां हन्, ग्रह् धात्वोश्चाचः लुटि, लृटि, लृङि, लुङि च वृद्धिं दृश् धातो ऋकारो गुणं च विकल्पेन लभन्ते । वृद्धिपक्षे गुणपक्षे च एतेषां प्रत्ययानामिडागमो भवति ।

In the First and the Second Future, in the Conditional, and in the Aorist, the final vowel of the roots ending in a vowel and those of the roots हन्, ग्रह् take their वृद्धि; and the ऋ of the root दृश् takes its Guna (optionally in both cases). In the case of वृद्धि and गुण the roots take the Augment इ (which is necessarily prefixed to the terminations).

*Examples* :—भाविता—भविता, भाविष्यते—भविष्यते, दर्शिष्यते—द्रक्ष्यते, हारिष्यते—हरिष्यते, नायिता—नयिता, अनायिषाताम्—अनयिषाताम्, अनायिष्यत्—अनयिष्यत्, ग्राहिता—ग्रहीता, घानिता, हन्ता ।

11. रिङ्शयग्लिङ्क्षु । धात्वन्त्य ऋकारस्य स्थाने रि इत्यादेशो भवति ।

The final ऋ of roots is changed to रि.

*Examples* :—ह्रियते, म्रियते ।

12. चिण् भावकर्मणोः । भावे कर्मणि च लुङि प्रथमपुरुषैकवचने इ-प्रत्ययः विकल्पेन भवति । तस्मिंश्च इ-प्रत्यये परे धात्वन्त्यः अच् धातोरुपधा-भूत अकारश्च वृद्धिं लभते ।

In the Passive and the Impersonal use of verbs, इ is the termination of the 3rd person singular Aorist, and when followed by this इ, the final vowel and the penultimate अ of roots take Vriddhi.

*Examples* :—अनायि, अग्राहि ।

13. गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ।
बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया ॥

(*a*) दुह्, याच्, पच्, दण्ड्, रुध्, प्रच्छ्, चि, ब्रू, शास्, जि, मथ्, मुष्, एतेषाम् एतत्समानार्थकानां च धातूनां कर्मणि प्रयोगे अप्रधानकर्म प्रथमान्तं प्रधानकर्म द्वितीयान्तं च भवति ।

In the Passive, the Indirect object of the roots दुह् etc., and of others having the same meaning is put in the Nominative case, and the Direct in the Accusative.

*Example* :—गौः दुह्यते पयः ।

(*b*) नी, हृ, कृष्, वह्, एतेषाम् एतत्समानार्थकानां च धातूनां कर्मणि प्रयोगे प्रधानकर्म प्रथमान्तम् अप्रधानकर्म द्वितीयान्तं च भवति । इतरेषां तु विवक्षाधीनम् ।

In the Passive, the Direct object of नी etc., and of others having the same meaning, is put in the Nominative, and the Indirect in the Accusative case.

*Example :*—सेवकेन भारः नगरं नीयते ।

(*c*) बुद्ध्याद्यर्थकानां तु कर्मणिप्रयोगे प्रधानं वाप्रधानं वा कर्म यथाविवक्षं प्रथमान्तं भवति ।

In the case of the Passive voice of roots having the meaning of thinking, eating, repeating etc., the Direct or the Indirect object is put in the nominative case.

*Examples :*—वेदार्थं स्वे वेद्यन्ते, or वेदार्थः स्वान् वेद्यते; सुधां देवा आश्यन्ते or सुधा देवानाश्यते; वेदमध्याप्यते द्विजः or द्विजमध्याप्यते वेदः ।

# णिजन्तप्रकरणम् ।

## CAUSALS.

1. सनाद्यन्ता धातवः । सन्–णिच्–यङ् एतदादिप्रत्ययान्ताः धातुसंज्ञाः स्युः । धातुत्वात् शप् भवति ।

Those words which take the desiderative, the causal, the frequentative etc. affixes, are technically called roots, and as such they have the first conjugational sign अ added to them.

2. हेतुमति च । प्रयोजकव्यापारे धातोर्णिच् स्यात्, तदन्तः धातुत्वात् शपा सहितः अयान्तो भवति ।

When the operation of a causer, such as that of directing, is expressed, the termination णिच् is added to the roots. The इ of णिच् take, like roots of the first conjugation, the sign अ, and becomes अय.

3. उपधाभूतानां ह्स्वानाम् इकार–उकार–ऋकार–ऌकाराणां गुणः, अन्त्यानाम् अचाम् उपधाभूतस्य अकारस्य च वृद्धिर्भवति ।

The penultimate short इ, उ, ऋ and ऌ of roots take Guna while the final vowel and the penultimate अ of roots take Vriddhi. (जॄ, however, is an exception.)

*Examples :*—प्रवेशयति, बोधयति, कारयति, ताडयति ।

4. णिचश्च । णिजन्ताद्धातोः फले कर्तृगामिनि आत्मनेपदं, परगामिनि परस्मैपदं, स्यात् ।

The Atmanepada forms of causals are used when the result of the action affects one's self ; but the Parasmaipada, when the result of the action is directed towards another.

*Examples :*—कारयते, कारयति ।

5. अमन्तानां धातूनां जन्, ज, दल्, वल्, त्रप्, वन्, ज्वल्, इत्यादीनाम् अच् विकारं न लभते ।

The vowels of roots ending in अम्, and of जन्, etc., do not undergo any change.

*Examples :*—जनयति, जरयति, दलयति, वलयति, त्रपयति, वनयति, ज्वलयति ।

6. नम्, वन्, वम्, ज्वल्, एतेषां अनुपसर्गाणाम् अकारस्य विकल्पेन वृद्धिर्भवति । सोपसर्गाणां तु वृद्धिर्नैव भवति ।

नम् etc., when not preceded by an Upasarga, lengthen their अ optionally ; but when preceded by an Upasarga they shorten it necessarily.

*Examples* :—नमयति ; नामयति ; उन्नमयति ।

7. आकारान्तानां धातूनां ऋधातोः ह्रीधातोश्च णिच् प्रत्ययः आदौ पकारेण संयुज्यते । ह्रीधातोः गुणश्च भवति ।

The णिच् termination, in the case of the base of roots ending in आ and of ऋ and ह्री, prefixes प to itself. ह्री takes Guna also.

*Examples* :—दापयति ; अर्पयति ; ह्रेपयति ।

8. एकार ऐकार ओकारान्ताः णिचि आकारान्ता भवन्ति ।

The final ए, ऐ and ओ of roots are changed to आ.

*Examples* :—धापयति ; म्लापयति ; दापयति ।

9. क्षैधातोः आकारः ह्रस्वं लभते ।

In the case of the root क्षै, the आ becomes short.

*Example* :—क्षपयति ।

अनुपसर्गौ ग्लै–स्ना–धातू विकल्पेन ह्रस्वं लभेते ।

The आ of roots ग्लै and स्ना, when they have no prepositions prefixed to them, becomes optionally short.

*Examples* :—ग्लापयति or ग्लपयति, स्नापयति or स्नपयति ।

सोपसर्गयोस्तु न ह्रस्वः ।

*Examples* :—प्रग्लापयति, प्रस्नापयति ।

10. रुहः पोऽन्यतरस्याम् । रुह्धातोः हकारस्य विकल्पेन पकार आदेशो भवति णिचि परे ।

The ह् of रुह् is changed optionally to प् before अय.

*Examples :*—रोपयति, रोहयति ।

11. हन् घात इति रूपं लभते ।

हन् is changed to घात in the Causal.

*Example :*—घातयति ।

12. रभ्, लभ्, एतयोः अन्त्यात् पूर्वत्र मकार आसज्यते ।

रभ् and लभ् insert a nasal before their final letter.

*Examples :*—रम्भयति, लम्भयति ।

13. शाच्छासाह्वाव्यावेपां युक् । शो, छो, सो, ह्वे, व्ये, वे, पा (to drink) एतेषां णिचः पूर्वं यकार आसज्यते ।

शो, छो etc., insert य before अय the causal sign.

*Examples :*—शाययति, छाययति, साययति, ह्वाययति, व्याययति, वाययाति, पाययति ।

14. लुग्विकरणपाधातोस्तु लकार आसज्यते ।

But पा "to protect" inserts ल् before अय.

*Example :*—पालयति ।

15. क्रीङ्जीनां णौ । क्री, जि अनयोः अधिपूर्वस्य इधातोश्च आकार अन्तादेशः स्यात् ।

क्री, जि and इ with अधि substitute आ for their vowels before अय.

*Examples :*—क्रापयाति, जापयति, अध्यापयाति ।

# सन्नन्तप्रकरणम् ।

## DESIDERATIVES.

1. धातोः इच्छार्थे सन् प्रत्ययो भवति ।

The termination सन् is added on to the roots in the sense of "desire."

2. सन्नन्तात् शब्विकरणः भवति ।

After the termination सन् the first conjugational sign is added on to the roots.

3. सन्यङोः । सन्नन्तस्य यङन्तस्य च धातोः लिट्प्रकरणोक्तप्रकारेण द्वित्वं भवति ।

The root is reduplicated in the Desiderative and the Frequentative, in due accordance with the rules given under the Perfect.

4. सन्यतः। अभ्यासाकारस्य इकारः स्यात् सेड्भ्यः परः सन् इटं लभते ।

The अ of the Abhyasa (Reduplicative syllable) is changed into इ in the Desiderative. To the termination सन्, इ is to be prefixed or not according as the root is Set or Anit.

5. पूर्ववत्सनः । सन्नन्तस्य आत्मनेपदपरस्मैपदव्यवस्थाः प्रायशः सन्-प्रकृत्यनुसारेण भवन्ति ।

Roots are Atmanepada or Parasmaipada in the Desiderative according as they are so or otherwise generally.

6. सन्प्रत्यये प्रतिधातुरूपनिष्पत्तये बहूनां सूत्राणामुपन्यासः आवश्यकः, तदा बालानां झटिति निष्पन्नरूपग्रहणे बुद्धिक्लेशः सञ्जायत इति भिया बहूपयोगानां धातूनां सिद्धरूपाण्येव प्रदर्श्यन्ते । तत्रापि वर्तमानेतर-लकारेषु सन्नन्तस्य प्रायेण अप्रसिद्धत्वात् यथाप्राचुर्यं लड्रूपाण्येव प्रदर्श्यन्ते ।

Aware that, to explain the radical changes involved, many rules would have to be set down here, but fearful, at the same time, that, in setting them down, I would give to this part of grammar a cumbersome grammatical treatment and so may unnecessarily burden the mind of the students with superfluous matter, I have ventured only to mention, immediately below, the forms of such roots as are most requisite in common use; but I must add that even here I only mention the present tense forms of those roots, as the other forms occur but rarely in Sanskrit.

*Examples*:—आप् = ईप्सति, ऋध् = ईर्त्सति, तन् = तितांसति-तितंसति–तितनिषति, पठ् = पिपठिषति, रुद् = रुरुदिषति, विद् = विविदिषति, मुष् = मुमुषिषति, ग्रह् = जिघृक्षति, गुह् = जुघुक्षति, स्वप् = सुषुप्सति, प्रच्छ् = पिपृच्छिषति, कृ = चिकीर्षति, भू = बुभूषति, भिद् = बिभित्सति, यज् = इयक्षते, वृध् = विवर्धिषते, जि = जिगीषति, चि = चिचीषति–चिकीषति, हन् = जिघांसति, गम् = जिगमिषति, इ = जिगमिषति, इ with अधि = अधि जिगांसते, द्युत् = दिद्युतिषते–दिद्योतिषते, रुच् = रुरुचिषते–रुरोचिषते, लिख् = लिलिखिषति–लिलेखिषति, दिव् = दिद्युषति–दिदेविषति, ज्ञप् = जिज्ञपयिषति–जिज्ञापयिषति, पत् = पित्सति–पिपतिषति, दरिद्रा = दिदरिद्रिषति–दिदरिद्रासति, मा = मित्सति, दा = दित्सति, धा = धित्सति–धित्सते, रभ् = रिप्सते, लभ् = लिप्सते, वृत् = विवर्तिषते, राध् = रित्सति (हिंसायाम्)–आरिरात्सति (पूजायाम्), मुच् = मुमुक्षति–मुमुक्षते, नृत् = निनर्तिषति–निनृत्सति, तॄ = तितरिषति-तितरीषति–तितीर्षति, स्मि = सिस्मयिषते, पु = पिपविषते, शक् = शिक्षते, पद् = पित्सते, अश् = अशिशिषते, ह्वे = जुहावयिषति, स्तु = तुष्टूषति, स्था = तिष्ठासति, इ with अधि = अधिजिगापयिषति–अध्यापिपयिषति ।

# CHAPTER VI.

# II. लुग्विकरणधातुरूपाणि ।

## CONJUGATION OF ROOTS OF THE SECOND CONJUGATION.

## अद् = to eat, Parasmaipada.

### सार्वधातुकरूपाणि ।

*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| अद्मि | अद्वः | अद्मः |
| अत्सि | अत्थः | अत्थ |
| अत्ति | अत्तः | अदन्ति |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| आदम् | आद्व | आद्म |
| आदः | आत्तम् | आत्त |
| आदत् | आत्ताम् | आदन् |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| अदानि | अदाव | अदाम |
| अद्धि | अत्तम् | अत्त |
| अत्तु | अत्ताम् | अदन्तु |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| अद्याम् | अद्याव | अद्याम |
| अद्याः | अद्यातम् | अद्यात |
| अद्यात् | अद्याताम् | अद्युः |

### आर्धधातुकरूपाणि ।

*Non-Conjugational Tenses.*

PERFECT. लिट् ।

| | | |
|---|---|---|
| आद | आदिव | आदिम |
| आदिथ | आदथुः | आद |
| आद | आदतुः | आदुः |

*Non-Conjugational Tenses.*—(Continued).

— *or* —

| | | |
|---|---|---|
| जघास-जघस | जक्षिव | जक्षिम |
| जघसिथ | जक्षथुः | जक्ष |
| जघास | जक्षतुः | जक्षुः |

FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| अत्तास्मि | अत्तास्वः | अत्तास्मः |
| अत्तासि | अत्तास्थः | अत्तास्थ |
| अत्ता | अत्तारौ | अत्तारः |

SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| अत्स्यामि | अत्स्यावः | अत्स्यामः |
| अत्स्यसि | अत्स्यथः | अत्स्यथ |
| अत्स्यति | अत्स्यतः | अत्स्यन्ति |

CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| आत्स्यम् | आत्स्याव | आत्स्याम |
| आत्स्यः | आत्स्यतम् | आत्स्यत |
| आत्स्यत् | आत्स्यताम् | आत्स्यन् |

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| अद्यासम् | अद्यास्व | अद्यास्म |
| अद्याः | अद्यास्तम् | अद्यास्त |
| अद्यात् | अद्यास्ताम् | अद्यासुः |

AORIST. लुङ् ।

| | | |
|---|---|---|
| अघसम् | अघसाव | अघसाम |
| अघसः | अघसतम् | अघसत |
| अघसत् | अघसताम् | अघसन् |

## इ with अधि = to study, Atmanepada.

### सार्वधातुकरूपाणि ।
*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| अधीये | अधीवहे | अधीमहे |
| अधीषे | अधीयाथे | अधीध्वे |
| अधीते | अधीयाते | अधीयते |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| अध्यैयि | अध्यैवहि | अध्यैमहि |
| अध्यैथाः | अध्यैयाथाम् | अध्यैध्वम् |
| अध्यैत | अध्यैयाताम् | अध्यैयत |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| अध्ययै | अध्ययावहै | अध्ययामहै |
| अधीष्व | अधीयाथाम् | अधीध्वम् |
| अधीताम् | अधीयाताम् | अधीयताम् |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| अधीयीय | अधीयीवहि | अधीयीमहि |
| अधीयीथाः | अधीयीयाथाम् | अधीयीध्वम् |
| अधीयीत | अधीयीयाताम् | अधीयीरन् |

### आर्धधातुकरूपाणि ।
*Non-Conjugational Tenses.*

PERFECT. लिट् ।

| | | |
|---|---|---|
| अधिजगे | अधिजगिवहे | अधिजगिमहे |
| अधिजगिषे | अधिजगाथे | अधिजगिध्वे |
| अधिजगे | अधिजगाते | अधिजगिरे |

FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| अध्येताहे | अध्येतास्वहे | अध्येतास्महे |
| अध्येतासे | अध्येतासाथे | अध्येताध्वे |
| अध्येता | अध्येतारौ | अध्येतारः |

*Non-Conjugational Tenses.*—(Continued).

SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| अध्येष्ये | अध्येष्यावहे | अध्येष्यामहे |
| अध्येष्यसे | अध्येष्येथे | अध्येष्यध्वे |
| अध्येष्यते | अध्येष्येते | अध्येष्यन्ते |

CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| अध्यैष्ये | अध्यैष्यावहि | अध्यैष्यामहि |
| अध्यैष्यथाः | अध्यैष्येथाम् | अध्यैष्यध्वम् |
| अध्यैष्यत | अध्यैष्येताम् | अध्यैष्यन्त |

— *or* —

| | | |
|---|---|---|
| अध्यगीष्ये | अध्यगीष्यावहि | अध्यगीष्यामहि |
| अध्यगीष्यथाः | अध्यगीष्येथाम् | अध्यगीष्यध्वम् |
| अध्यगीष्यत | अध्यगीष्येताम् | अध्यगीष्यन्त |

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| अध्येषीय | अध्येषीवहि | अध्येषीमहि |
| अध्येषीष्ठाः | अध्येषीयास्थाम् | अध्येषीढ्वम् |
| अध्येषीष्ट | अध्येषीयास्ताम् | अध्येषीरन् |

AORIST. लुङ् ।

| | | |
|---|---|---|
| अध्यैषि | अध्यैष्वहि | अध्यैष्महि |
| अध्यैष्ठाः | अध्यैषाथाम् | अध्यैढ्वम् |
| अध्यैष्ट | अध्यैषाताम् | अध्यैषत |

— *or* —

| | | |
|---|---|---|
| अध्यगीषि | अध्यगीष्वहि | अध्यगीष्महि |
| अध्यगीष्ठाः | अध्यगीषाथाम् | अध्यगीढ्वम् |
| अध्यगीष्ट | अध्यगीषाताम् | अध्यगीषत |

## शास् = to rule, Parasmaipada.

### सार्वधातुकरूपाणि ।
*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| शास्मि | शिष्वः | शिष्मः |
| शास्सि | शिष्ठः | शिष्ठ |
| शास्ति | शिष्टः | शासति |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| अशासम् | अशिष्व | अशिष्म |
| अशाः--त्--द् | अशिष्टम् | अशिष्ट |
| अशात्--द् | अशिष्टाम् | अशासुः |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| शासानि | शासाव | शासाम |
| शाधि | शिष्टम् | शिष्ट |
| शास्तु | शिष्टाम् | शासतु |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| शिष्याम् | शिष्याव | शिष्याम |
| शिष्याः | शिष्यातम् | शिष्यात |
| शिष्यात् | शिष्याताम् | शिष्युः |

### आर्धधातुकरूपाणि ।
*Non-Conjugational Tenses.*

PERFECT. लिट् ।

| | | |
|---|---|---|
| शशास | शशासिव | शशासिम |
| शशासिथ | शशासथुः | शशास |
| शशास | शशासतुः | शशासुः |

*Non-Conjugational Tenses.*—(Continued).

FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| शासितास्मि | शासितास्वः | शासितास्मः |
| शासितासि | शासितास्थः | शासितास्थ |
| शासिता | शासितारौ | शासितारः |

SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| शासिष्यामि | शासिष्यावः | शासिष्यामः |
| शासिष्यसि | शासिष्यथः | शासिष्यथ |
| शासिष्यति | शासिष्यतः | शासिष्यन्ति |

CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| अशासिष्यम् | अशासिष्याव | अशासिष्याम |
| अशासिष्यः | अशासिष्यतम् | अशासिष्यत |
| अशासिष्यत् | अशासिष्यताम् | अशासिष्यन् |

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| शिष्यासम् | शिष्यास्व | शिष्यास्म |
| शिष्याः | शिष्यास्तम् | शिष्यास्त |
| शिष्यात् | शिष्यास्ताम् | शिष्यासुः |

AORIST. लुङ् ।

| | | |
|---|---|---|
| अशिषम् | अशिषाव | अशिषाम |
| अशिषः | अशिषतम् | अशिषत |
| अशिषत् | अशिषताम् | अशिषन् |

## स्तु = to praise, Parasmaipada.

### सार्वधातुकरूपाणि ।

*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| स्तौमि | स्तुवः | स्तुमः |
| स्तौषि | स्तुथः | स्तुथ |
| स्तौति | स्तुतः | स्तुवन्ति |

— *or* —

| | | |
|---|---|---|
| स्तवीमि | स्तुवीवः | स्तुवीमः |
| स्तवीषि | स्तुवीथः | स्तुवीथ |
| स्तवीति | स्तुवीतः | स्तुवन्ति |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| अस्तवम् | अस्तुव | अस्तुम |
| अस्तौः | अस्तुतम् | अस्तुत |
| अस्तौत् | अस्तुताम् | अस्तुवन् |

— *or* —

| | | |
|---|---|---|
| अस्तवम् | अस्तुवीव | अस्तुवीम |
| अस्तवीः | अस्तुवीतम् | अस्तुवीत |
| अस्तवीत् | अस्तुवीताम् | अस्तुवन् |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| स्तवानि | स्तवाव | स्तवाम |
| स्तुहि--स्तवीहि | स्तुतम्--स्तुवीतम् | स्तुत--स्तुवीत |
| स्तौतु--स्तवीतु | स्तुताम्--स्तुवीताम् | स्तुवन्तु |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| स्तुयाम् | स्तुयाव | स्तुयाम |
| स्तुयाः | स्तुयातम् | स्तुयात |
| स्तुयात् | स्तुयाताम् | स्तुयुः |

— *or* —

| | | |
|---|---|---|
| स्तुवीयाम् | स्तुवीयाव | स्तुवीयाम |
| स्तुवीयाः | स्तुवीयातम् | स्तुवीयात |
| स्तुवीयात् | स्तुवीयाताम् | स्तुवीयुः |

## आर्धधातुकरूपाणि ।
*Non-Conjugational Tenses.*

### PERFECT. लिट् ।

| | | |
|---|---|---|
| तुष्टाव | तुष्टुव | तुष्टुम |
| तुष्टोथ | तुष्टुवथुः | तुष्टुव |
| तुष्टाव | तुष्टुवतुः | तुष्टुवुः |

### FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| स्तोतास्मि | स्तोतास्वः | स्तोतास्मः |
| स्तोतासि | स्तोतास्थः | स्तोतास्थ |
| स्तोता | स्तोतारौ | स्तोतारः |

### SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| स्तोष्यामि | स्तोष्यावः | स्तोष्यामः |
| स्तोष्यसि | स्तोष्यथः | स्तोष्यथ |
| स्तोष्यति | स्तोष्यतः | स्तोष्यन्ति |

### CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| अस्तोष्यम् | अस्तोष्याव | अस्तोष्याम |
| अस्तोष्यः | अस्तोष्यतम् | अस्तोष्यत |
| अस्तोष्यत् | अस्तोष्यताम् | अस्तोष्यन् |

### BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| स्तूयासम् | स्तूयास्व | स्तूयास्म |
| स्तूयाः | स्तूयास्तम् | स्तूयास्त |
| स्तूयात् | स्तूयास्ताम् | स्तूयासुः |

### AORIST. लुङ् ।

| | | |
|---|---|---|
| अस्ताविषम् | अस्ताविष्व | अस्ताविष्म |
| अस्तावीः | अस्ताविष्टम् | अस्ताविष्ट |
| अस्तावीत् | अस्ताविष्टाम् | अस्ताविषुः |

## स्तु = to praise, Atmanepada.

### सार्वधातुकरूपाणि ।

*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| स्तुवे | स्तुवहे-स्तुवीवहे | स्तुमहे-स्तुवीमहे |
| स्तुषे-स्तुवीषे | स्तुवाथे | स्तुध्वे-स्तुवीध्वे |
| स्तुते-स्तुवीते | स्तुवाते | स्तुवते |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| अस्तुवि | अस्तुवहि-अस्तुवीवहि | अस्तुमहि-अस्तुवीमहि |
| अस्तुथाः-अस्तुवीथाः | अस्तुवाथाम् | अस्तुध्वम्-अस्तुवीध्वं |
| अस्तुत-अस्तुवीत | अस्तुवाताम् | अस्तुवत |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| स्तुवै | स्तुवावहै | स्तुवामहै |
| स्तुष्व-स्तुवीष्व | स्तुवाथाम् | स्तुध्वम्-स्तुवीध्वम् |
| स्तुताम्-स्तुवीताम् | स्तुवाताम् | स्तुवताम् |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| स्तुवीय | स्तुवीवहि | स्तुवीमहि |
| स्तुवीथाः | स्तुवीयाथाम् | स्तुवीध्वम् |
| स्तुवीत | स्तुवीयाताम् | स्तुवीरन् |

### आर्धधातुकरूपाणि ।

*Non-Conjugational Tenses.*

PERFECT. लिट् ।

| | | |
|---|---|---|
| तुष्टुवे | तुष्टुवहे | तुष्टुमहे |
| तुष्टुषे | तुष्टुवाथे | तुष्टुढ्वे |
| तुष्टुवे | तुष्टुवाते | तुष्टुविरे |

*Non-Conjugational Tenses.*—(Continued).

FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| स्तोताहे | स्तोतास्वहे | स्तोतास्महे |
| स्तोतासे | स्तोतासाथे | स्तोताध्वे |
| स्तोता | स्तोतारौ | स्तोतारः |

SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| स्तोष्ये | स्तोष्यावहे | स्तोष्यामहे |
| स्तोष्यसे | स्तोष्येथे | स्तोष्यध्वे |
| स्तोष्यते | स्तोष्येते | स्तोष्यन्ते |

CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| अस्तोष्ये | अस्तोष्यावहि | अस्तोष्यामहि |
| अस्तोष्यथाः | अस्तोष्येथाम् | अस्तोष्यध्वम् |
| अस्तोष्यत | अस्तोष्येताम् | अस्तोष्यन्त |

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| स्तोषीय | स्तोषीवहि | स्तोषीमहि |
| स्तोषीष्ठाः | स्तोषीयास्थाम् | स्तोषीढ्वम् |
| स्तोषीष्ट | स्तोषीयास्ताम् | स्तोषीरन् |

AORIST. लुङ् ।

| | | |
|---|---|---|
| अस्तोषि | अस्तोष्वहि | अस्तोष्महि |
| अस्तोष्ठाः | अस्तोषाथाम् | अस्तोढ्वम् |
| अस्तोष्ट | अस्तोषाताम् | अस्तोषत |

## हन् = to kill, Parasmaipada.

### सार्वधातुकरूपाणि ।

*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| हन्मि | हन्वः | हन्मः |
| हंसि | हथः | हथ |
| हन्ति | हतः | घ्नन्ति |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| अहनम् | अहन्व | अहन्म |
| अहन् | अहतम् | अहत |
| अहन् | अहताम् | अघ्नन् |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| हनानि | हनाव | हनाम |
| जहि | हतम् | हत |
| हन्तु | हताम् | घ्नन्तु |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| हन्याम् | हन्याव | हन्याम |
| हन्याः | हन्यातम् | हन्यात |
| हन्यात् | हन्याताम् | हन्युः |

### आर्धधातुकरूपाणि ।

*Non-Conjugational Tenses.*

PERFECT. लिट् ।

| | | |
|---|---|---|
| जघान-जघन | जघ्निव | जघ्निम |
| जघनिथ-जघन्थ | जघ्नथुः | जघ्न |
| जघान | जघ्नतुः | जघ्नुः |

*Non-Conjugational Tenses.*—(Continued).

FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| हन्तास्मि | हन्तास्वः | हन्तास्मः |
| हन्तासि | हन्तास्थः | हन्तास्थ |
| हन्ता | हन्तारौ | हन्तारः |

SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| हनिष्यामि | हनिष्यावः | हनिष्यामः |
| हनिष्यसि | हनिष्यथः | हनिष्यथ |
| हनिष्यति | हनिष्यतः | हनिष्यन्ति |

CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| अहनिष्यम् | अहनिष्याव | अहनिष्याम |
| अहनिष्यः | अहनिष्यतम् | अहनिष्यत |
| अहनिष्यत् | अहनिष्यताम् | अहनिष्यन् |

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| वध्यासम् | वध्यास्व | वध्यास्म |
| वध्याः | वध्यास्तम् | वध्यास्त |
| वध्यात् | वध्यास्ताम् | वध्यासुः |

AORIST. लुङ् ।

| | | |
|---|---|---|
| अवधिषम् | अवधिष्व | अवधिष्म |
| अवधीः | अवधिष्टम् | अवधिष्ट |
| अवधीत् | अवधिष्टाम् | अवधिषुः |

## स्वप् = to sleep, Parasmaipada.

### सार्वधातुकरूपाणि ।

*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| स्वपिमि | स्वपिवः | स्वपिमः |
| स्वपिषि | स्वपिथः | स्वपिथ |
| स्वपिति | स्वपितः | स्वपन्ति |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| अस्वपम् | अस्वपिव | अस्वपिम |
| अस्वपीः--अस्वपः | अस्वपितम् | अस्वपित |
| अस्वपीत्--अस्वपत् | अस्वपिताम् | अस्वपन् |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| स्वपानि | स्वपाव | स्वपाम |
| स्वपिहि | स्वपितम् | स्वपित |
| स्वपितु | स्वपिताम् | स्वपन्तु |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| स्वप्याम् | स्वप्याव | स्वप्याम |
| स्वप्याः | स्वप्यातम् | स्वप्यात |
| स्वप्यात् | स्वप्याताम् | स्वप्युः |

### आर्धधातुकरूपाणि ।

*Non-Conjugational Tenses.*

PERFECT. लिट् ।

| | | |
|---|---|---|
| सुष्वाप-सुष्वप | सुषुपिव | सुषुपिम |
| सुष्वपिथ-सुष्वप्थ | सुषुपथुः | सुषुप |
| सुष्वाप | सुषुपतुः | सुषुपुः |

*Non-Conjugational Tenses.*—(Continued).

FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| स्वप्तास्मि | स्वप्तास्वः | स्वप्तास्मः |
| स्वप्तासि | स्वप्तास्थः | स्वप्तास्थ |
| स्वप्ता | स्वप्तारौ | स्वप्तारः |

SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| स्वप्स्यामि | स्वप्स्यावः | स्वप्स्यामः |
| स्वप्स्यसि | स्वप्स्यथः | स्वप्स्यथ |
| स्वप्स्यति | स्वप्स्यतः | स्वप्स्यन्ति |

CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| अस्वप्स्यम् | अस्वप्स्याव | अस्वप्स्याम |
| अस्वप्स्यः | अस्वप्स्यतम् | अस्वप्स्यत |
| अस्वप्स्यत् | अस्वप्स्यताम् | अस्वप्स्यन् |

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| सुप्यासम् | सुप्यास्व | सुप्यास्म |
| सुप्याः | सुप्यास्तम् | सुप्यास्त |
| सुप्यात् | सुप्यास्ताम् | सुप्यासुः |

AORIST. लुङ् ।

| | | |
|---|---|---|
| अस्वाप्सम् | अस्वाप्स्व | अस्वाप्स्म |
| अस्वाप्सीः | अस्वाप्तम् | अस्वाप्त |
| अस्वाप्सीत् | अस्वाप्ताम् | अस्वाप्सुः |

## जागृ = to be awake, Parasmaipada.

### सार्वधातुकरूपाणि ।

*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| जागर्मि | जागृवः | जागृमः |
| जागर्षि | जागृथः | जागृथ |
| जागर्ति | जागृतः | जाग्रति |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| अजागरम् | अजागृव | अजागृम |
| अजागः | अजागृतम् | अजागृत |
| अजागः | अजागृताम् | अजागरुः |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| जागराणि | जागराव | जागराम |
| जागृहि | जागृतम् | जागृत |
| जागर्तु | जागृताम् | जाग्रतु |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| जागृयाम् | जागृयाव | जागृयाम |
| जागृयाः | जागृयातम् | जागृयात |
| जागृयात् | जागृयाताम् | जागृयुः |

### आर्धधातुकरूपाणि ।

*Non-Conjugational Tenses.*

PERFECT. लिट् ।

| | | |
|---|---|---|
| जजागार-जजागर | जजागरिव | जजागरिम |
| जजागरिथ | जजागरथुः | जजागर |
| जजागार | जजागरतः | जजागरुः |

*Non-Conjugational Tenses.*—(Continued).

FIRST FUTURE. लुट् ।

| | | |
|---|---|---|
| जागरितास्मि | जागरितास्वः | जागरितास्मः |
| जागरितासि | जागरितास्थः | जागरितास्थ |
| जागरिता | जागरितारौ | जागरितारः |

SECOND FUTURE. लृट् ।

| | | |
|---|---|---|
| जागरिष्यामि | जागरिष्यावः | जागरिष्यामः |
| जागरिष्यसि | जागरिष्यथः | जागरिष्यथ |
| जागरिष्यति | जागरिष्यतः | जागरिष्यन्ति |

CONDITIONAL. लृङ् ।

| | | |
|---|---|---|
| अजागरिष्यम् | अजागरिष्याव | अजागरिष्याम |
| अजागरिष्यः | अजागरिष्यतम् | अजागरिष्यत |
| अजागरिष्यत् | अजागरिष्यताम् | अजागरिष्यन् |

BENEDICTIVE. आशीर्लिङ् ।

| | | |
|---|---|---|
| जागर्यासम् | जागर्यास्व | जागर्यास्म |
| जागर्याः | जागर्यास्तम् | जागर्यास्त |
| जागर्यात् | जागर्यास्ताम् | जागर्यासुः |

AORIST. लुङ् ।

| | | |
|---|---|---|
| अजागरिषम् | अजागरिष्व | अजागरिष्म |
| अजागरीः | अजागरिष्टम् | अजागरिष्ट |
| अजागरीत् | अजागरिष्टाम् | अजागरिषुः |

## विद् = to know, Parasmaipada.

### सार्वधातुकरूपाणि ।
*Conjugational Tenses.*

PRESENT. लट् ।

| | | |
|---|---|---|
| वेद्मि--वेद | विद्वः-विद्व | विद्मः—विद्म |
| वेत्सि--वेत्थ | वित्थः-विदथुः | वित्थ--विद |
| वेत्ति--वेद | वित्तः-विदतुः | विदन्ति--विदुः |

IMPERFECT. लङ् ।

| | | |
|---|---|---|
| अवेदम् | अविद्व | अविद्म |
| अवेः-अवेत्-द् | अवित्तम् | अवित्त |
| अवेत्-द् | अवित्ताम् | अविदुः |

IMPERATIVE. लोट् ।

| | | |
|---|---|---|
| वेदानि | वेदाव | वेदाम |
| विद्धि | वित्तम् | वित्त |
| वेत्तु | वित्ताम् | विदन्तु |

*- or -*

| | | |
|---|---|---|
| विदाङ्करवाणि | विदाङ्करवाव | विदाङ्करवाम |
| विदाङ्कुरु | विदाङ्कुरुतम् | विदाङ्कुरुत |
| विदाङ्करोतु | विदाङ्कुरुताम् | विदाङ्कुर्वन्तु |

POTENTIAL. विधिलिङ् ।

| | | |
|---|---|---|
| विद्याम् | विद्याव | विद्याम |
| विद्याः | विद्यातम् | विद्यात |
| विद्यात् | विद्याताम् | विद्युः |

### आर्धधातुकरूपाणि ।
*Non-Conjugational Tenses.*

PERFECT. लिट् ।

| | | |
|---|---|---|
| विवेद | विविदिव | विविदिम |
| विवेदिथ | विविदथुः | विविद |
| विवेद | विविदतुः | विविदुः |

*Non-Conjugational Tenses.*—(Continued).

— *or* —

| | | |
|---|---|---|
| विदाञ्चकार | विदाञ्चकृव | विदाञ्चकृम |
| विदाञ्चकर्थ | विदाञ्चक्रथुः | विदाञ्चक्र |
| विदाञ्चकार | विदाञ्चक्रतुः | विदाञ्चक्रुः |

— *or* —

| | | |
|---|---|---|
| दुदोह | दोग्धा | धोक्ष्यति | अधोक्ष्यत् | दुह्यात् | अधुक्षत् |
| दुदुहे | दोग्धा | धोक्ष्यते | अधोक्ष्यत | धुक्षीष्ट | अधुक्षत |
| शुशोष | शोष्टा | शोक्ष्यति | अशोक्ष्यत् | शुष्यात् | अशुषत् |
| पुपोष | पोटा | पोक्ष्यति | अपोक्ष्यत् | पुष्यात् | अपुषत् |
| लुलोभ | लोभिता | लोभिष्यति | अलोभिष्यत् | लुभ्यात् | अलुभत् |
| शिश्लेष | श्लेष्टा | श्लेक्ष्यति | अश्लेक्ष्यत् | श्लिष्यात् | अश्लिक्षत् |
| आश | अशिता | अशिष्यति | आशिष्यत् | अश्यात् | आशीत |
| दुधाव | धोता | धोष्यति | आधोष्यत् | धूयात् | अधवीत |
| दुधुवे | धोता | धोष्यते | अधोष्यत | धोषीष्ट | अधोष्ठ |
| कथयामास | कथयिता | कथयिष्यति | अकथयिष्यत् | कथ्यात् | अचकथत् |
| कथयाञ्चक्रे | कथयिता | कथयिष्यते | अकथयिष्यत | कथयिषीष्ट | अचकथत |
| सुषुवे | सोता | सोष्यते | असोष्यत | सोषीष्ट | असोत |
| नृरोद | रोदिता | रोदिष्यति | अरोदिष्यत् | रुद्यात् | अरोदीत् |
| जग्मे | गन्ता | गंस्यते | अगंस्यत | गंसीष्ट | अगामि |
| गमयाञ्चकार | गमायिता | गमयिष्यति | अगमयिष्यत् | गम्यात् | अजीगमत् |
| जिगमिषाञ्चकार | जिगमिषिता | जिगमिषिष्यति | अजिगमिषिष्यत् | जिगमिष्यात् | अजिगमिषी |
| जङ्गमाञ्चक्रे | जङ्गमिता | जङ्गमिष्यत | अजङ्गमिष्यत | जङ्गमिषीष्ट | अजङ्गमिव |

# CHAPTER VII.

# कृदन्तप्रकरणम् ।

---

## VERBAL SUFFIXES.

1. (*a*) धातुभ्यः परे प्रत्ययाः द्वेधा भवन्ति, तिङ्प्रत्ययाः कृत्प्रत्ययाश्चेति; तत्र तिङस्तावत् विशेषेण प्राक् निरूपिताः ; इह कृतः संक्षेपेण निरूप्यन्ते ।

(*b*) कृत्प्रत्ययेषु केचित् अव्ययत्वापादकाः ; ते च अव्ययप्रकरणे वक्ष्यन्ते ; अन्ये तु सुबन्ता एव प्रयुज्यन्ते । ते यथा—

There are in Sanskrit two sets of terminations added to verbal roots *viz.*, तिङ् and कृत्. The forms produced by the addition of तिङ् suffixes have been explained in the foregoing four chapters. Details connected with the formation of derivatives produced by the addition of important Krith suffixes are explained here.

Krith suffixes are of two kinds. The addition of one kind to roots produces indeclinable forms. For these see Chapter VIII. Another kind of suffixes, when added to roots, produces nouns, adjectives &c.

### 2. क्तप्रत्ययान्ता यथा ।

**Past Passive Participle.**

The past passive participle is generally used in a sentence to take the place of a verb with or without a finite verbal form of अस् or भू. It then agrees adjectively in gender, number and case, with the object if the participle is formed from a transitive verbal root, and with the agent if it is formed from an intransitive verb.

*Examples :*—श्रुत, स्नात, अस्त, कृत, भिन्न, कीर्ण, गूढ, वृद्ध, शङ्कित, सोढ, मग्न, सन्न, उदित, पृष्ट, इष्ट, नद्ध, मित, पीत, गीत, दष्ट, चोदित, सित, उत, हित, हत, रत, आप्त—इत्यादयः ।

3. The present participle is used adjectively and generally denotes that the action denoted by it is simultaneous with that of the principal verb.

(*a*) परस्मैपदिनां धातूनां शत्रन्तरूपाणि ।

**Present Participle of Parasmaipada Roots.**

*Examples :*—आप्नुवत्, रुन्धत्, तन्वत्, क्रीणत्, चोरयत्, बोधयत्, पचत्, अदत्, दीव्यत्, हसत्—इत्यादयः ।

(*b*) आत्मनेपदिनां धातूनां शानजन्तरूपाणि ।

**Present Participle of Atmanepada Roots.**

दीव्यमान, शयान, वर्तमान, एधमान, रममाण, वर्धमान—इत्यादयः ।

4. क्तवतुप्रत्ययान्ता यथा (Past Active Participle)—कृतवान्, गतवान्, पक्ववान् ।

5. ल्युट्प्रत्ययान्ता यथा (Gerund)—गमनम्, करणम्, पचनम् ।

6. यत्प्रत्ययान्ता यथा (Potential Participle)—स्थेयम्, गेयम्, जेयम् ।

7. तव्यप्रत्ययान्ता यथा (Potential Participle)—भेत्तव्यम्, क्षन्तव्यम्, नेतव्यम् ।

8. ण्यत्प्रत्ययान्ता यथा (Potential Participle)—कार्यम्, वाच्यम्, भाव्यम् ।

9. क्यप्प्रत्ययान्ता यथा (Potential Participle) — स्तुत्यः, शिष्यः जुष्यः ।

10. अनीयर्प्रत्ययान्ता यथा (Potential Participle) — प्रेषणीयम्, करणीयम्, पचनीयम् ।

11. ण्वुल्प्रत्ययान्ता यथा — नायकः, पाचकः, गायकः ।

12. क्विप्रत्ययान्ता यथा — हृत्, वित्, कृत् ।

13. तृच्प्रत्ययान्ता यथा — गन्ता, धाता, मोक्ता ।

14. क्तिन्प्रत्ययान्ता यथा — प्रकृतिः, मतिः, स्मृतिः ।

15. घञ्प्रत्ययान्ता यथा — रामः, यागः, कामः ।

16. Future Participle — करिष्यत्, जेष्यत्, गमिष्यत्; दास्यमान, भविष्यमाण, करिष्यमाण ।

---

CHAPTER VIII.

# ॥ अव्ययप्रकरणम् ॥

1. सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

लिङ्गविभक्तिवचनभेदरहितानि अव्ययानि; तानि द्वेधा--प्रतिपदोक्तानि लाक्षणिकानि चेति । तत्र सूत्रकृता स्वरादिचादिप्राग्रूर्यादिसाक्षात्प्रभृत्यादि-रूपेण स्वतो निपातितानि प्रतिपदोक्तानि ।

2. स्वरादिनिपातमव्ययम् । स्वरादयो निपाताश्च अव्ययसंज्ञास्स्युः ।

Swaradis and Nipathas are known as Avyaya.

SWARADIS.

स्वर्, अन्तर्, प्रातर्, पुनर्, उच्चैस्, नीचैस्, शनैस्, ऋते, युगपत्, आरात्, पृथक्, ह्यस्, श्वस्, दिवा, रात्रौ, सायम्, चिरम्, मनाक्, ईषत्, जोषम्, तूष्णीं, बहिस्, समया, निकषा, स्वयम्, वृथा, नक्तम्, नञ्, सामि, सना, अन्तरा, अन्तरेण, सहसा, विना, नाना, स्वस्ति, स्वधा, अलम्, दोषा, मृषा, मिथ्या, मुधा, पुरा, मिथस्, प्रायस्, मुहुस्, साकम्, सार्धम्, नमस्, धिक्, आम्, मा इत्यादयः स्वरादयः ।

3. चादयोऽसत्वे । अद्रव्यार्थाश्चादयो निपातसंज्ञास्स्युः ।

Particles not used to denote a thing are known as Nipathas.

NIPATHAS.

च, वा, ह, एव, एवम्, नूनम्, शश्वत्, भूयस्, चेत्, कच्चित्, किञ्चित्, यावत्, तावत्, खलु, किल, अथो, अथ, सुष्टु, स्म, हे, है, भोः, अङ्ग इत्यादयो निपातसंज्ञास्स्युः ।

4. प्रादयः—प्र, परा &c., See Chapter V, Part I, under Upasargas.

5. ऊर्यादयः—उ, ऊरीकृत्य, अलंकृत्य, नमस्कृत्य ।

6. साक्षात्प्रभृतयः—साक्षात्कृत्य, तिरस्कृत्य ।

7. तत्र कानिचिद्विभक्तिप्रतिरूपकाणि यथा ।

वाम् युवामर्थे—गेये केन विनीतौ वाम् ।

अस्ति सत्तायामर्थे—अस्तिमान् धनिकः आस्तिकः ; परलोकोऽस्तीति ज्ञानवान् ।

अस्मि अहमर्थे—अस्मि वच्मि ; अहं वच्मीत्यर्थः ।

आह उवाचेत्यर्थः ।

आस बभूवेत्यर्थः ।

शास्त्रसिद्धानि अव्ययानि लाक्षणिकानि ; तानि त्रेधा ; अव्ययीभावकृदन्ततद्धितान्तभेदात् ।

8. अव्ययीभावो यथा ।

***EXAMPLES.***

उपकुम्भम्, अपदिशं मध्येसमुद्रम्, शाकप्रति, प्रतिपुरुषम्, आबालम् —इत्यादयः ।

9. अव्ययत्वापादककृत्प्रत्ययाः ।

क्त्वा, तुमुन्, ल्यप्, णमुल् —एतदन्तानि अव्ययानि ।

***EXAMPLES***

(*a*) क्त्वाप्रत्ययान्ता यथा ।

**Indeclinable Past Participle (without Prepositions).**

This participle denotes the priority of the action denoted by it.

जित्वा, विदित्वा, हित्वा, शमित्वा, आत्वा, पृष्ट्वा, रुद्ध्वा, कृत्वा, गृहीत्वा, चोरयित्वा —इत्यादयः ।

(*b*) तुमुन्नन्ता यथा ।

**Infinitive of Purpose.**

भवितुम्, यातुम्, हातुम्, देवितुम्, आप्तुम्, भेत्तुम्, कर्तुम्, ग्रहीतुम्, चोदयितुम्—इत्यादयः ।

(*c*) ल्यबन्ता यथा ।

**Indeclinable Past Participle (with Prepositions).**

सन्तर्प्य, अधील्य, विहाय, प्रदीव्य, संप्राप्य, आपृच्छ्य, प्रयुज्य, वितत्य, निगृह्य, विगणय्य—इत्यादयः ।

(*d*) णमुलन्ता यथा ।

In the sense of repetition णमुल् is inserted, of which ण्, उ and ल् are dropped and अम् is retained.

स्मारंस्मारम्, पायंपायम्, धावंधावम्, कारंकारम्, भोजंभोजम्, ध्यायंध्यायम् ।—इत्यादयः ।

10. अव्ययत्वापादकतद्धितप्रत्ययाः ।

आम्, वति, तसिल्, त्रल्, ह, अत्, दा, र्हिल्, अधुना, दानीं, द्यस्, उत्, आरि, समसण्, एद्यवि, द्यस्, एद्युस्, द्युस्, थाल्, थमु, अस्ताति, असि, अतसुच्, रिल्, रिष्टातिल्, आति, एनप्, आच्, आहि, धा, ध्यमुञ्, धमुञ्, एधाच्, कृत्वसुच्, सुच्, सुज्लुक्, शस्, तासि, च्वि, साति, त्रा, डाच्, एतदन्तान्यव्ययानि ।

*EXAMPLES.*

1. आम् यथा ।

नितराम्, नितमाम्, सुतराम्, सुतमाम्, पचतितराम्, पचतितमाम्।

2. वतिर्यथा ।

ब्राह्मणवत्, मथुरावत्, चैत्रवत्, शम्भुवत् ।

3. तसिल्यथा ।

कुतः, यतः, ततः, अतः, इतः, अमुतः ।

4. त्रल्यथा ।

सर्वत्र, कुत्र, यत्र, तत्र, बहुत्र ।

5. हान्तौ यथा ।

इह, कुह ।

.6 अदन्तो यथा ।

क ।

7. दान्ता यथा ।

सर्वदा, एकदा, अन्यदा, कदा, यदा, तदा ।

8. र्हिलन्ता यथा ।

एतर्हि, कर्हि, तर्हि, यर्हि ।

9. अधुनान्तो यथा ।

अधुना ।

10. दानीम् यथा ।

इदानीम्, तदानीम् ।

11. द्यस् यथा ।

सद्यः, (समानेऽहनि) ।

12. उद्यथा ।

परुत्, (पूर्वेवत्सरे) ।

13. आरिर्यथा ।

परारि, (पूर्वतरवत्सरे) ।

14. समसण् यथा ।

ऐषमः (अस्मिन्वत्सरे) ।

15. एद्यविर्यथा ।

परेद्यवि, (परस्मिन्नहनि ।

16. द्यो यथा ।

अद्य, (अस्मिन्नहनि) ।

17. एद्युस् यथा ।

पूर्वेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः, अधरेद्युः, अपरेद्युः, उत्तरेद्युः, उभयेद्युः ।

18. द्युस् यथा ।

उभयद्युः ।

19. थाल्यथा ।

सर्वथा, यथा, तथा ।

20. थमुर्यथा ।

इत्थम् कथम् ।

21. अस्तातिर्यथा ।

पुरस्तात्, परस्तात्, अधस्तात्, अवस्तात्, अपस्तात्, अवरस्तात् ।

22. असिर्यथा ।

पुरः, अधः, अवः ।

23. अतसुज्यथा ।

दक्षिणतः, उत्तरतः, परतः, अवरतः ।

24. रिलिरिष्टातिलौ यथा ।

उपरि, उपरिष्टात् ।

25. आतिर्यथा ।

पश्चात्, उत्तरात्, अधरात्, दक्षिणात् ।

26. एनब्यथा ।

उत्तरेण, अधरेण, दक्षिणेन ।

27. आज्यथा ।

दक्षिणा, उत्तरा ।

28. आहिर्यथा ।

दक्षिणाहि, उत्तराहि ।

29. धा यथा ।

एकधा, द्विधा, त्रिधा, चतुर्धा, पञ्चधा, षोढा, सप्तधा, बहुधा ।

30. ध्यमुञ्यथा ।

ऐकध्यम् ।

31. धमुञ्यथा ।

द्वैधं, त्रैधं ।

32. एधाज्यथा ।

द्वेधा, त्रेधा ।

33. कृत्वसुज्यथा ।

पञ्चकृत्वः, षट्कृत्वः ।

34. सुज्यथा ।

द्विः, त्रिः, चतुः ।

35. सुज्लुग्यथा ।

सकृत् ।

36. शस् यथा ।

बहुशः, अल्पशः, द्विशः, त्रिशः माषशः, प्रस्थशः ।

37. तसिर्यथा ।

कृष्णतः, अर्जुनतः, आदितः, अन्ततः, सर्वतः, वर्णतः, पुरतः, मध्यतः, पार्श्वतः, पृष्ठतः ।

38. च्विर्यथा ।

कृष्णीभवति, ब्रह्मीभवति ।

39. सातिर्यथा ।

अग्निसात्, विप्रसात् ।

40. त्रा यथा ।

विप्रत्रा, देवत्रा, मनुष्यत्रा ।

41. डाज्यथा ।

पटपटाकरोति, भद्राकरोति, प्रियाकरोति, सुखाकरोति ।

इत्यव्ययानि ।

---

# CHAPTER IX.

# वाक्यार्थविचारप्रकरणम् ।

[Structure of sentences, Syntax, Analysis and Parsing.]

1. पदसमुदायो वाक्यमर्थसमाप्तौ समर्थम् । वाक्येन अर्थबोधे जननीये तात्पर्ययोग्यताकाङ्क्षासत्तयश्च हेतवः भवन्ति । तात्पर्यं नाम तत्तदर्थबोधेच्छया उच्चरितत्वम् । योग्यता नाम अविरुद्धार्थः । आकाङ्क्षा नाम यं पदं विना येन पदेन अर्थबोधो न जायते तयोः पदयोः वर्णानुपूर्वी । आसत्तिर्नाम अविलम्बेन उच्चारणम् ।

A sentence is a collection of words which expresses a complete thought. To do this, the words of a sentence should convey the idea intended, which should not involve any physical impossibility; the form of the words and the close manner of pronouncing them also being important in expressing the desired meaning.

2. तच्च वाक्यं "तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता" इत्युक्तप्रकारेण विशेष्यविशेषणक्रियाकारकादिपदघटितं भवति ; तस्मात् अस्मिन् वाक्यरचनार्थबोधप्रकरणे विशेष्यविशेषणसम्बन्धविचारः कारकाद्यर्थविचारः तिङ्कृदर्थविचारः आकाङ्क्षोपपादनप्रकारः पदविन्यासविचारश्च विषया भवन्ति ।

A sentence contains a subject, a predicate, and may have also adjuncts to the subject and to the predicate, and extensions to the predicate. In this chapter on the construction and the making out of the meaning of the sentences, the following subjects will have to be considered : (1) The relation of the adjunct and the words they qualify as well as the relation of the subject and the predicate. (2) The meaning and force of the various

declensional cases of nouns as well as of the participles and tenses of verbs. (3) The order of words in a sentence. (4) Analysis of sentences etc. The first three of the subjects above-mentioned are treated in English Grammars under Syntax in its various sub-divisions of Concord, Government and Order.

### विशेष्यविशेषणादिसम्बन्धविचारः ।

3. विशेष्यं नाम व्यावृत्तम्। विशेषणन्तु व्यावर्तकम्। तच्च समानाधिकरणव्यधिकरणभेदात् द्विविधम् । आद्यं उद्देश्यविशेषणं विधेयविशेषणं क्रियाविशेषणं चेति त्रिविधम् ।

An adjunct distinguishes the thing qualified by it. It may qualify the subject or the predicate, or modify a verb. Again the adjunct may be appositional or possessive.

*EXAMPLES.*

धनुष्पाणिस्तु काकुत्स्थः दण्डकामविशद्द्रुतम् ।
अकारयत् शूर्पणखां स्वस्य भ्रात्रा विनासिकाम् ॥

4. विशेषणे समानाधिकरणे सति विशेष्यविशेषणयोः लिङ्गविभक्तिवचनानि तुल्यानि भवन्ति । तथा च—

या विशेष्येषु दृश्यन्ते लिङ्गसङ्ख्याविभक्तयः ।
प्रायेण ताः प्रयोक्तव्याः समानेऽर्थे विशेषणे ॥

An appositional adjective should agree with the noun qualified by it adjunctively or predicatively, in gender, case and number.

*EXAMPLES.*

धनुष्पाणिःकाकुत्स्थः; विनासिकां शूर्पणखाम् ।

नियतलिङ्गवचनस्थले क्रियाविशेषणे च प्रायेणेत्युक्त्या नायं नियमः ।

Adjectives of fixed gender and number remain unchanged.

*Example :*—सहस्रं गावः ।

5. क्रियापदे स्वकर्तृकर्मवाचिसुबन्तानुगुण्येन यथासंख्यं कर्तरि कर्मणि च पुरुषवचनयोः व्यवस्था । तादृशसुबन्तेषु बहुषु युष्मदस्मच्छब्दप्रवेशे उत्तमपुरुष एव, अस्मच्छब्दविरहितयुष्मच्छब्दप्रवेशे मध्यमपुरुष एव, अन्यत्र प्रथमपुरुष इति नियमः ।

The verb agrees in number and person with the substantive expressing the agent or the object of the action denoted by the verb according as it is in the active or in the passive voice.

*EXAMPLES.*

रामः शत्रून् जयति, यूयं वेदान् पठथ; आवां पुत्रान् मोदामहे ; नृपेण शठा दण्ड्यन्ते । रामश्च लक्ष्मणश्च सीताच वनं ययुः, सुग्रीवश्च रामलक्ष्मणौ च ऋश्यमूके अवसन् । सुग्रीवश्च वानराश्च अजयन् ।

When the first and the second personal pronouns occur along with others as subjects, the verb must be in the first person; when the second personal pronoun so occurs without the first personal pronoun, the verb is used in the second person.

*EXAMPLES.*

अहं च रामश्च लक्ष्मणश्च गच्छामः । त्वं च गोविन्दश्च जयतम् ॥

6. यत्तच्छब्दप्रयोगे, तच्छब्दे यच्छब्दसमानलिङ्गवचनकत्वं नियम्यते । परंतु उद्देश्यविधेयभावस्थले उद्देश्यविधेयान्यतरलिङ्गवचनकत्वं बोध्यम् ।

The relative should agree with its antecedent in gender and number. When the relative and the antecedent have predicative adjuncts of different genders, the antecedent takes the gender of either.

*EXAMPLES.*

यस्यास्ति मेधा स नरः प्रपूज्यः । शैत्यं हि यत्सा प्रकृतिर्जलस्य ।

## कारकविचारः ।

यत् क्रियान्वयि तत् कारकम् = That which qualifies the sense of a verb expressing action is called *Karaka.*

कारकं षड्विधम् = *Karakas* are of six kinds.

1. कर्ता = The doer or the agent of an action.

2. कर्म = The object of the action.

3. करणम् = Instrumentality or means of action.

4. सम्प्रदानम् = The recipient of a gift.

5. अपादानम् = That from which separation, actual or imaginary, takes place.

6. अधिकरणम् = That in which the action is done.

I. 1. **स्वतन्त्रः कर्ता । क्रियायां स्वतन्त्रः कर्ता भवति ।**

That which is the agent in an action is the doer or कर्ता ।

**तत्र कर्तरि प्रयोगे कर्तुः प्रथमा विभक्तिर्भवति ।**

The substantive expressing the agent in a sentence in the Active voice always takes the Nominative case.

*Examples :*—रामो विराजते ; रामो वनं गच्छति ।

2. **कर्मणि प्रयोगे भावे प्रयोगे च कर्तुः तृतीया भवति ।**

In the Passive voice and the Impersonal use of the verb, the agent of the action denoted by it is put in the Instrumental case.

*Examples :*—रामेण वनं गम्यते ; रामेण आस्यते ।

II. 1. **कर्तुरीप्सिततमं कर्म ।** कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् ।

That which is so related to the action as to be most affected by the agent of the action, is called the Object (कर्म) ।

2. **कर्मणि द्वितीया ।**

The object takes the Accusative case.

*Examples:*—रामो वनं गच्छति ।

3. कर्म द्विविधम् = Objects are of two kinds.

प्रधानकर्म अप्रधानकर्म चेति = The Direct object and the Indirect object.

दुह्, याच्, पच्, दण्ड्, रुध्, प्रच्छ्, चि, ब्रू, शास्, जि, मथ्, मुष्, नी, हृ, कृष्, वह्, एते धातवः एतत्समानार्थकधातवश्च द्विकर्मकाः ।

The roots mentioned above, as also those bearing the same meaning, govern two Objects—one Direct and the other Indirect.

*Examples :*—गोपः गां दोग्धि पयः ; विष्णुः बलिं याचते वसुधाम् ; पाचकः तण्डुलानोदनं पचति ; नृपः चोरं शतं दण्डयति ; गोपालः व्रजमवरुणद्धि गाम् ; पान्थः माणवकं पन्थानं पृच्छति ; सेवकः वृक्षमवचिनोति फलानि ; आचार्यः शिष्यं धर्मं ब्रूते or शास्ति ; यज्ञदत्तः शतं जयति देवदत्तम् ; विष्णुः सुधां क्षीरनिधिं मथ्नाति ; चोरः सोमदत्तं शतं मुष्णाति ; गोपः ग्रामम् अजां नयति or हरति or कर्षति or वहति ।

4. **अधिशीङ्स्थासां कर्म ।** अधिपूर्वाणामेषाम् आधारः कर्म स्यात् ।

शी, स्था and आस्, when preceded by अधि, govern the Accusative of the site of the action.

*Examples :*—अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः ।

5. उपान्वध्याङ्वसः । उप, अनु, अधि, आ, एतत्पूर्वस्य वसतेराधारः कर्म स्यात् ।

The site of action located by the verb वस् when it is preceded by उप, अनु, अधि or आ takes the Accusative case.

*Examples :*—उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः ।

III. 1. साधकतमं करणम् । क्रियायां प्रकृष्टोपकारकं करणसंज्ञं स्यात् ।

That which is especially the means in the performance of an action is called the Instrument.

2. कर्तृकरणयोस्तृतीया । कर्तरि करणे च तृतीया भवति ।

The words expressive of the agent or the instrument of the action take the Instrumental case.

*Examples :*—रामेण बाणेन हतो वाली । अत्र हननक्रियायां रामः कर्ता, बाणः करणम्, उभयोरपि तृतीया भवति ।

IV 1. कर्मणा यमभिप्रैति स सम्प्रदानम् । दानस्य कर्मणा यं संयोजयितुम् इच्छति सः सम्प्रदानसंज्ञः स्यात् ।

He to whom a thing is given is called Sampradana (the recipient of the gift).

2. चतुर्थी संप्रदाने । सम्प्रदाने चतुर्थी स्यात् ।

The words expressive of सम्प्रदानार्थ take the Dative case.

*Example :*—शिष्येभ्यः विद्यां यच्छति ।

3. रुच्यर्थानां प्रीयमाणः । रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणः अर्थः सम्प्रदानसंज्ञःस्यात् ।

रुच् and other verbs having the same meaning govern the Dative case of the person or thing pleased or satisfied.

*Example :*—हरये रोचते भक्तिः ।

4. धारेरुत्तमर्णः । धारयतेः उत्तमर्णः सम्प्रदानसंज्ञः स्यात् (उत्तमर्णः ऋणदाता) ।

धृ (10th Conj.) governs the Dative of the person to whom something is owed.

*Example :*—भक्ताय धारयति मोक्षं हरिः ।

5. स्पृहेरीप्सितः । स्पृहयतेः प्रयोगे इष्टः सम्प्रदानसंज्ञः स्यात् ।

स्पृह् governs the Dative of the Object or the thing desired.

*Examples :*—पुष्पेभ्यः स्पृहयति । अत्यन्तमिष्टमित्यर्थे पुष्पाणि स्पृहयति ।

6. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः । क्रुध्, द्रुह्, ईर्ष्या, असूया, एतेषाम् एतत्समानार्थकधातूनां च प्रयोगे यं प्रति कोपः सः सम्प्रदानसंज्ञः स्यात् ।

Verbs having the sense of *anger*, *treachery*, *malice* and *envy*, govern the Dative of the person or thing against whom or which the feeling is directed.

*Examples :*—रामः रावणाय क्रुध्यति; असुरः सुराय द्रुह्यति; जाल्मः साधवे ईर्ष्यति (ईर्ष्या अक्षमा); खलः साधवे असूयति (असूया गुणेषु दोषाविष्करणम्)।

7. तादर्थ्ये चतुर्थी वाच्या। तस्मै इदं तदर्थम्; तदर्थमेव तादर्थ्यम्। अस्मिन्नर्थे चतुर्थी भवति ।

The Dative is also used in the sense "for a thing."

*Examples* :—मुक्तये हरिं भजति ।

8. क्लृपि सम्पद्यमाने च । क्लृपिधातोः सम्पूर्वकपदधातोः एतत्स-मानार्थकधातोश्च प्रयोगे चतुर्थी स्यात् ।

क्लृप् and पद् with सम्, and verbs having the same meaning, govern the Dative.

*Examples* :—भक्तिः ज्ञानाय कल्पते । भक्तिः ज्ञानाय सम्पद्यते ।

9. नमस्स्वस्तिस्वाहास्वधालंवषड्योगाच्च । नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट् एतद्योगे चतुर्थी स्यात् ।

The above-mentioned words govern the Dative.

*Examples* :—हरये नमः ; प्रजाभ्यः स्वस्ति ; अग्नये स्वाहा ; पितृभ्यः स्वधा ; दैत्येभ्यः हरिरलम् ; इन्द्राय वषट् ।

V. 1. ध्रुवमपायेऽपादानम् । उभयोः वियोगे सति यदवधिभूतं तद-पादानसंज्ञं स्यात् ।

Separation from a fixed point or a person is expressed by the term Ablative.

2. अपादाने पञ्चमी ।

The Ablative case is used where ablation from what is expressed by the word is implied.

*Examples* :—ग्रामादायाति, सुखादपेतः ।

3. भीत्रार्थानां भयहेतुः । भयार्थानां त्राणार्थानां च धातूनां प्रयोगे भयहेतुः अपादानसंज्ञः स्यात् ।

Before verbs having the meaning 'to fear,' 'to protect from danger,' that from which the fear or the danger proceeds is put in the Ablative case.

*Examples* :—चोराद्बिभेति, चोरात्त्रायते ।

4. जनिकर्तुः प्रकृतिः । जायमानस्य हेतुरपादानसंज्ञः स्यात् ।

The prime cause of the agent of the verb जन् is put in the Ablative case.

*Example* :—सुवर्णात् कुण्डलं जायते ।

5. पृथग्विनानानाभिस्तृतीयान्यतरस्याम् । पृथक्, विना, नाना, एतैर्योगे तृतीयापञ्चमीद्वितीयाः भवन्ति ।

The above 3 govern the Accusative, the Ablative or the Instrumental.

*Examples* :—रामात्, रामेण, रामम्—पृथक्; रामम्, रामेण, रामात्—विना or नाना ।

[1. षष्ठी शेषे । सम्बन्धरूपार्थे षष्ठी स्यात् । शेषषष्ठी तु न कारकविभक्तौ अन्तर्भवति ।

The Genitive case that is generally used wherever relation of one thing to another is meant to be expressed does not belong to the Karakas, (this relation being, however, different from that implied in the Karaka and Pratipadika). But I have thought it necessary to mention the Sutra here, because the Genitive is the sixth of the seven cases.

*Examples* :—राज्ञः पुरुषः ।

2. कर्तृकर्मणोः कृति । कृत्प्रत्ययान्ते प्रयुज्यमाने कर्तरि कर्मणि च षष्ठी स्यात् ।

When a word with the "कृत्प्रत्यय" in the end is used, the agent or the object of the action is generally put in the Genitive case.

*Examples :*—कृष्णस्य कृतिः, जगतः कर्ता कृष्णः ।

3. अस्य सूत्रस्य क्वचित्प्रतिषेधः—Exception.

*Examples :*—दैत्यान् हतवान् विष्णुः, हरिं दिदृक्षुः, सृष्टिं कुर्वन् हरिः ।]

VI. 1. आधारोऽधिकरणम् । क्रियाया आधारः अधिकरणसंज्ञः स्यात् ।

The site of the action, located by the agent or object, is denominated Location.

2. सप्तम्यधिकरणे च । अधिकरणे सप्तमी स्यात् ।

Adhikarana takes the Locative case.

*Examples :*—कटे आस्ते ; स्थाल्यां पचति ; सर्वास्मिन् आत्मा अस्ति ।

---

तिङर्थाः द्वितीयभागे तृतीयप्रकरणे निरूपिताः । कृदर्थाः कातिचन सप्तमाष्टमप्रकरणयोः उक्ताः ।

The meaning and use of tenses and moods have been dealt with in the third chapter of the 2nd part, and the meaning of the participles in the seventh and the eighth chapters of the same part.

---

### आकाङ्क्षोपपादनप्रकारः—Analysis.

वाक्यघटकपदार्थान्वयोत्थापनमाकाङ्क्षा-तदुपपादनप्रकारः —

निहत्य बाणैः परुषं दशास्यं लङ्कापुरे दाशरथिर्महात्मा ।
सौम्याय राज्यं सहजाय तस्य प्रदाय तस्मात् सुसुखं प्रतस्थे ॥

### अन्वयक्रमः—Prose order.

महात्मा दाशरथिः लङ्कापुरे परुषं दशास्यं बाणैः निहत्य, सौम्याय तस्य सहजाय राज्यं प्रदाय, तस्मात् सुसुखं प्रतस्थे ।

### आकाङ्क्षा ।

प्रतस्थे, कः ? दाशरथिः । कथम् ? सुसुखम् । कस्मात् ? तस्मात् (लङ्कापुरात्) । किं कृत्वा ? प्रदाय । किम् ? राज्यम् । कस्मै ? सहजाय । कस्य सहजाय ? तस्य रावणस्य । सहजाय कीदृशाय ? सौम्याय । किं च कृत्वा ? निहत्य । कम् ? दशास्यं । कथंभूतम् ? परुषम् । कैः ? बाणैः । कस्मिन् ? लङ्कापुरे । दाशरथिःकथंभूतः ? महात्मा ।

### ANALYSIS.

| कर्ता Subject. | कर्तृविशेषणम् Adjuncts to Subject. | क्रिया Predicate. | क्रियाविशेषणम् Adjuncts to the Predicate. | क्रियान्वयी Extensions of the Predicate. |
|---|---|---|---|---|
| दाशरथिः | महात्मा | प्रतस्थे | सुसुखम् | 1 लङ्कापुरे परुषं दशास्यं बाणैःनिहत्य, 2 सौम्याय तस्य सहजाय राज्यं प्रदाय, 3 तस्मात्, |

वाक्यघटकपदस्वरूपनिर्वचनप्रकारः — **Parsing.**

निहत्य —निपूर्वकहन्धातोःल्यबन्तमव्ययम् प्रतस्थे इति क्रियान्वयि ।

बाणैः —पुल्लिङ्गतृतीयाबहुवचनान्तः निहत्येति क्रियायाः करणम् ।

परुषम् —पुल्लिङ्गद्वितीयैकवचनान्तः दशास्यमित्यस्य विशेषणम् ।

दशास्यम् —दश आस्यानि यस्य तम्, पुल्लिङ्गद्वितीयैकवचनान्तः निहत्येति क्रियायाःकर्म ।

लङ्कापुरे—लङ्केति पुरं लङ्कापुरं तस्मिन्, नपुंसकलिङ्ग सप्तम्येकवचनान्तः निहत्येति क्रियायाः कर्मद्वारा अधिकरणम् ।

दाशरथिः—दशरथस्यापत्यं पुमान् दाशरथिः, पुल्लिङ्गप्रथमैकवचनान्तः प्रतस्थे इति क्रियायाः कर्ता ।

महात्मा—महान् आत्मा यस्य सः, पुल्लिङ्गप्रथमैकवचनान्तः दाशरथिरित्यस्य विशेषणम् ।

राज्यम्—नपुंसकलिङ्गद्वितीयैकवचनान्तः प्रदायेति क्रियायाः कर्म ।

सहजाय—पुल्लिङ्गचतुर्थ्यैकवचनान्तः प्रदायेति क्रियायाः संप्रदानम् ।

तस्य —सर्वनामसंज्ञः पुल्लिङ्गषष्ठ्यैकवचनान्तः सहजायेत्यस्य व्यधिकरणविशेषणम् ।

प्रदाय—प्रपूर्वकदाधातोः ल्यबन्तमव्ययम् प्रतस्थे इति क्रियान्वयि ।

तस्मात् —सर्वनामसंज्ञः पुल्लिङ्गपञ्चम्यैकवचनान्तः प्रतस्थे इति क्रियायाः अपादानम् ।

सुसुखम् — नपुंसकलिङ्गनित्यद्वितीयैकवचनान्तः प्रतस्थे इत्यस्य-क्रियाविशेषणम् ।

प्रतस्थे — प्रपूर्वकस्थाधातोः आत्मनेपदलिट्प्रथमपुरुषैकवचनान्तः दाशरथिकर्तृकक्रियावाचि ।

---

### पदविन्यासविचारः —Order of Words.

गैर्वाण्यां भाषायां वाक्ये कर्तृक्रियादिपदानां विन्यासक्रमः अनियतः । अर्थबोधः प्रायशः न विरुद्ध्यते ।

In the Sanskrit language the order of the subject, the predicate and the other words in a sentence is not fixed ; and the meaning is not generally affected by any order.

---

## CHAPTER X—*A*.

# ॥ सौभरिमहर्षिचरितम् ॥

### प्रथममञ्जरी ।

---

सूर्यवंशे इक्ष्वाकुर्नाम कश्चन राजा आसीत् । तत्कुले मान्धातेति नृपस्समजनि। स च शशिबिन्दोर्दुहितरमिन्दुमतीमुपयेमे। पुरुकुत्समम्बरीषं मुचुकुन्दं च तस्यां पुत्रत्रयमुत्पादयामास । पञ्चाशद्दुहितरस्तस्यामेव तस्य नृपतेर्बभूवुः। एतस्मिन्नन्तरे बह्वृचः सौभरिर्नामर्षिरन्तर्जले द्वादशाब्दं कालमुवास। तत्र चान्तर्जले सम्मदो नामातिबहुप्रजोऽतिप्रमाणो मीनाधिपतिरासीत्। तस्य पुत्रपौत्रदौहित्राः पृष्ठतोऽग्रतः पार्श्वतः पक्षपुच्छशिर उपरि भ्रमन्तस्तेनैव सहाहर्निशं अतिनिर्वृता रेमिरे। स चापत्यस्पर्शोपचीयमानहर्षप्रकर्षो बहुप्रकारं तस्यर्षेः पश्यतः स्वैः पुत्रपौत्रदौहित्रादिभिस्सहानुदिनं सुतरां रेमे। अथान्तर्जलावस्थितस्स सौभरिरेकाग्रतामपहायानुदिनं तस्य मत्स्यस्यात्मजपौत्रदौहित्रादिभिस्सहातिरमणीयं ललितमवेक्ष्याचिन्तयत्। अहो धन्योऽयमीदृशमपिजुगुप्सितम् योन्यन्तरमवाप्यैभिरात्मजपौत्रदौहित्रादिभिस्सह रममाणोऽतीवास्माकं स्पृहामुत्पादयति । वयमप्येवं पुत्रादिभिस्सह रमिष्यामह इत्येवमभिसमीक्ष्य स तस्मादन्तर्जलान्निष्क्रम्य सन्तानाय निर्वेष्टुकामः कन्यार्थं मान्धातारं राजानमगच्छत्। स्वागमनश्रवणात् समनन्तरं चोत्थाय तेन राज्ञा सम्यगर्घ्यादिना पूजितः कृतासनपरिग्रहः सौभरिरुवाच राजानम्। (सौभरिः) नरेन्द्र! निर्वेष्टुकामोऽस्मि ; मे कन्यां प्रयच्छ ; प्रणयं मा विभाङ्क्षीः ; ककुत्स्थवंशे कार्यवशादुपेताः अर्थिनः विमुखाः न प्रयान्ति हि। मान्धातः! पृथिव्यां अन्येऽपि नृपास्सन्त्येव; किन्तु ते इदं कुलं अर्थिनामर्थितदान-

दीक्षाकृतव्रतश्लाघ्यं हि; नृपते! शतार्धसंख्यास्तवकन्यास्सन्ति; तासां मे एकां प्रयच्छ, यत्प्रार्थनाभङ्गभयाददतिदुःखादहं बिभेमि—इति ऋषिवचनमाकर्ण्य स राजा जर्झरितदेहं तं ऋषिमवलोक्य प्रत्याख्यानकातरस्तस्माच्च शापतो बिभ्यत्किंचिदधोमुखश्चिरं दध्यौ। (सौभरिरुवाच) हे नरेन्द्र! कस्मात्समुपैषि चिन्ताम्; मया न किंचिदसह्यमुक्तम्; तनया अवश्यं देया खलु। अथ तस्य भगवतः शापभीतः सप्रश्रयस्तमुवाचासौ राजा। (राजा) भगवन्नस्मत्कुलस्थितिरियं य एव कन्याभिरुचितोऽभिजनवान्वरस्तस्मै कन्या प्रदीयते; भवद्याच्ञा चास्मन्मनोरथानामप्यगोचरवर्तिनी कथमप्येषा संजाता; तदेवमवस्थिते न विद्मः किं कुर्म इत्येतद्विचिन्त्यत—इत्यभिहिते च तेन भूभुजा मुनिरचिन्तयत्। अयमन्योऽस्मत्प्रत्याख्यानोपायः; वृद्धोऽयमनभिमतः स्त्रीणाम्, किमुत कन्यानामित्यमुना संचिन्त्यैतदभिहितम्; एवमस्तु; तथा करिष्यामीति संचिन्त्य मान्धातारमुवाच। (सौभरिः) यद्येवं तदादिश्यतामस्माकम् प्रवेशाय कन्यान्तःपुरवर्षवरः यदि कन्यैव काचिन्मामभिलषति तदाहं दारसंग्रहं करिष्यामि; अन्यथा चेत्तदलमस्माकमेतेनातीतकालारम्भेण—इत्युक्त्वा विरराम। ततश्च मान्धात्रा मुनिशापशङ्कितेन कन्यान्तःपुरवर्षवरः समाज्ञप्तः; तेन सह कन्यान्तःपुरम् प्रविशन्नेव भगवानखिलसिद्धगन्धर्वमनुष्येभ्योऽतिशयेन कमनीयं रूपमकरोत्। प्रवेश्य च तमृषिमन्तःपुरवर्षवरस्ताः कन्याः प्राह—भवतीनां जनयिता महाराजस्समाज्ञापयति; मामयं ब्रह्मर्षिः कन्यार्थी समभ्यागतः; मया चास्मै प्रतिज्ञातम्; यद्यस्मत्कन्या याकाचिद्भगवन्तं वरयति तत्कन्याच्छन्दे नाहं परिपन्थी न भविष्यामीत्याकर्ण्य सर्वा अपि ताः कन्याः सानुरागाः समन्मथाः, करेणव इवेभयूथपतिम्, तमृषिमहमहमिकया वरयांबभूवुः; ऊचुश्च—

अलं भगिन्योऽहमिमं वृणोमि वृणोम्यहं नैष तवानुरूपः।
ममैव भर्ता विधिनैष सृष्टः सृष्टाहमस्योपशमं प्रयाहि॥

वृतो मयायं प्रथमं मयायं गृहं विशन्नेव विहन्यसे किं ।
मया मयेति क्षितिपात्मजानां तदर्थमत्यन्तकलिर्बभूव ॥

यदा तु सर्वाभिरतीव हार्दात् वृतस्सकन्याभिरनिन्द्यकीर्तिः ।
तदा सकन्याधिकृतो नृपाय यथावदाचष्ट विनम्रमूर्तिः ॥

तदवगम्य किमेतत्कथमेतत्किंकरोमि किंमयाऽभिहितमित्याकुलमतिरानिच्छन्नपि कथमपि राजानुमेने । कृतानुरूपविवाहश्च महर्षिस्सकला एव ताः कन्याः स्वमाश्रममनयत् । तत्रचाशेषशिल्पकल्पप्रणेतारं धातारमिवान्यं विश्वकर्माणमाहूय सकलकन्यकानामेकैकस्याः प्रोत्फुल्लपङ्कजाः कूजत्कलहंसकारण्डवादिविहंगमाभिरामजलाशयास्सोपवनास्सोपधानास्सावकाशास्साधुशय्यापरिच्छदाः प्रासादाः क्रियन्तामित्यादिदेश । तच्च तथैवानुष्ठितमशेषशिल्पविशेषाचार्यः त्वष्टा दर्शितवान् । ततश्च परमर्षिणा सौभरिणाज्ञप्तस्तेषु गृहेष्वनपायिनं धनमहानिधिं स्थापयामास । ततोऽनवरतभक्ष्यभोज्यलेह्याद्युपभोगैरागतानुगतभृत्यादीनहर्निशमशेषगृहेषु ताः क्षितीशदुहितरो भोजयामासुः । एकदा दुहितृस्नेहाकृष्टहृदयस्समहीपतिः किमतिदुःखितास्ताः उत सुखितावेति विचिन्त्य तस्य महर्षेराश्रमसमीपमुपेत्य स्फुरदंशुजालं स्फटिकमणिमयप्रासादमालमतिरम्योपवनजलाशयं ददर्श । प्रविश्यचैकं प्रासादमात्मजां परिष्वज्य कृतासनपरिग्रहः प्रवृत्तस्नेहनयनम्बुगर्भोऽब्रवीत् । अयि पुत्रि वत्से भवत्यास्सुखमुत किंचिदसुखं अपि ते महर्षिः स्नेहवानुत न संस्मर्यतेऽस्मद्गृहवास इत्युक्ता तत्तनया पितरमाह । तातातिरमणीयोऽत्र प्रासादोऽतिमनोज्ञमुपवनमातिकलवाक्यविहङ्गाभिरुताः प्रोत्फुल्लपद्माकराजलाशयाः मनोऽनुकूलोभक्ष्यभोज्यानुलेपनवस्त्रभूषणादिभोगः मृदूनि शयनासनानि सर्वसंपत्समवेतमेतद्गार्हस्थ्यं तथापि केनवा जन्मभूमिर्नस्मर्यते । त्वत्प्रसादादिदमशेषमतिशोभनं किन्त्वेकं ममैतद्दुःखकारणं यदस्मद्गृहान्महर्षिरयमस्मद्भर्ता न निष्क्रा-

मति ममैव केवलमतिप्रीत्या समीपवर्ती नान्यासामस्मद्भगिनीनाम् । एवं च मम सोदर्यः दुःखिता इत्येवमतिदुःखकारणमित्युक्तस्तया द्वितीयं प्रासादमुपेत्य तनयां परिष्वज्य तथैव पृष्टवान् । तयापि सर्वमेव प्रासादाद्युपभोगसुखं भृशमाख्यातं स्वपित्रे । ममैव केवलमतिप्रीत्या भर्ता पार्श्वपरिवर्ती, नान्यासामस्मद्भगिनीनामित्येव-मादि श्रुत्वा समस्तप्रासादेषु राजा प्रविश्य तनयास्तथैवापृच्छत् । सर्वाभिश्च ताभिस्तथैवाभिहितः परितोषविस्मयनिर्भरविवशहृदयो भगवन्तं सौभरिमेकांता-वस्थितमुपेत्य स कृतपूजोऽब्रवीत् । दृष्टस्तेभगवन् सुमहानेषसिद्धिप्रभावः । नैवंविधमन्यस्य कस्यचिदस्माभिर्विभूतिविलसितमुपलक्षितं । कियदेतद्भगवत-स्तपसः फलमित्यभिपूज्य तमृषिं तत्रैव तेनर्षिवर्येण सह कञ्चित्कालमभिमतोपभो-गान्भुभुजे स्वपुरं चाजगाम । कालेन गच्छता तस्य तासु राजतनयासु पुत्रशतं सार्धं अभवत् । अनुदिनानुरूढस्नेहप्रसरश्च स तत्रातीव ममताकृष्टहृदयोऽभवत् । अप्येतेऽस्मत्पुत्राः कलभाषिणः पद्भ्यां गच्छेयुः । अप्येते यौवनिनो भवेयुः । अपिकृतदारानेतान्पश्येयं । अप्येषां पुत्राभवेयुः । अप्येतत्पुत्रान् पुत्रसमन्वितान् पश्येयमित्यादिमनोरथाननुदिनं कालसंपत्तिवृद्धानवेक्ष्यैतच्चिन्तयामास । अहो मे मोहस्यातिविस्तारः ।

मनोरथानां न समाप्तिरस्ति वर्षायुतेनाप्यथवापिलक्षैः ।
पूर्णेषु पूर्णेषु पुनर्नवानां उत्पत्तयस्सन्ति मनोरथानाम् ॥

पद्भ्यां गता यौवनिनश्च जाताः दारैश्च संयोगमिताः प्रसूताः ।
दृष्टास्सुतास्तत्तनयप्रसूतिं द्रष्टुं पुनर्वाञ्छति मेऽन्तरात्मा ॥

द्रक्ष्यामि तेषामपि चेत्प्रसूतिं मनोरथो मे भविता ततोन्यः ।
पूर्णेपि तस्याप्यपरस्य जन्म निवार्यते केन मनोरथस्य ॥

स मे समाधिर्जलवासमित्रमत्स्यस्य सङ्गात्सहसैव नष्टः ।
परिग्रहस्सङ्गकृतो मयायं परिग्रहोत्थाच ममापि लिप्सा ॥

निस्संगता मुक्तिपदं यतीनां संगादशेषाः प्रभवन्ति दोषाः ।
आरूढयोगोपि निपात्यतेधः सङ्गेन योगी किमुताल्पसिद्धिः ॥

सर्वस्य दातारमचिन्त्यरूपं अणोरणीयांसमतिप्रमाणं ।
सितासितञ्चेश्वरमीश्वराणां आराधयिष्ये तपसैव विष्णुम् ॥

समस्तभूतादमलादनन्तात्सर्वेश्वरादन्यदनादिमध्यात् ।
यस्मान्नकिंचित्तमहं गुरूणां परं गुरुं संश्रयमेमि विष्णुं ॥

इत्यात्मानमात्मनैवाभिधायासौ सौभरिरपहाय स्वपुत्रगृहासनपरिच्छदादिकमशेषमर्थजातं सकलभार्यासमवेतो वनं प्रविवेश । तत्राप्यनुदिनं वैखानसनिष्पाद्यमशेषक्रियाकलापं निष्पाद्य क्षपितसकलपापः परिपक्वमनोवृत्तिरात्मन्यग्नीन् समारोप्य भिक्षुरभवत् । भगवत्यासज्याखिलकर्मकलापमजमविकार मवापपरमनन्तं भगवन्तम् । यश्चैतत्सौभरिचरितमनुस्मरति पठति पाठयति शृणोति श्रावयति स परत्रेह च महत्सुखम् प्राप्नुयात् ॥

इतिसौभर्युदन्तस्समाप्तः ।

## CHAPTER X-*B*.

# ॥ ध्रुवचरितम् ॥

---

द्वितीयमञ्जरी ।

श्रीभगवतो नारायणाद्ब्रह्मा अजायत ब्रह्मणः मनुरभूत् । मनोः प्रियंव्रतोत्तानपादौ द्वौ पुत्रौ जातौ। तत्रोत्तानपादस्य सुनीतिः सुरुचिश्चेति द्वे स्त्रियौ । तत्र सुरुचिः पत्युः प्रिया। यस्याः पुत्रो ध्रुवः सा सुनीतिर्नप्रिया। एकदा राजा सुरुचेरुत्तमनामकं पुत्रमङ्कमारोप्य लालयन् सन् तदा अङ्कमारोढुमिच्छन्तं ध्रुवं नाभ्यनन्दत् । तदा सुरुचिस्तथाङ्कारोहणं कुर्वन्तं ध्रुवं दृष्ट्वा राज्ञः शृण्वतस्सतः गर्वितासती ईर्ष्यासहितं जगाद । हेवत्स! त्वं नृपतेरासनं आरोढुं नार्हसि। यतस्त्वं मया कुक्षौ न धृतः भवानन्यस्त्रीगर्भसंभूतमात्मानं नूनं न वेद । यतस्त्वं बालोऽसि । अतः एवं मनोरथश्चेत् तर्हि तपसा हरिमाराध्य तत्कृपया मे गर्भे आत्मनो जन्मप्राप्त्यर्थं यत्नं कुरु इति । एवं सपत्न्याः मातुः दुर्भाषणरूपैर्बाणैर्विद्धो ध्रुवः सर्प इव श्वसन् पश्यन्तं मौनीभूतं पितरं हित्वा रुदन् मातुः समीपं जगाम । सुनीतिः सपत्न्याः वाक्यं अन्तःपुरजनमुखाच्छ्रुत्वा निः श्वसन्तं रुदन्तं बालमुत्सङ्गे गृहीत्वा धैर्यं त्यक्त्वा शोकेन विललाप सपत्न्याः वाक्यस्य स्मरन्ती जगादच। हेतात! त्वं परकृतं दुर्भाषणरूपमपराधं मास्मचिन्तयः। यतो यो मनुष्यः परेभ्यो दुःखं ददाति स कालान्तरे तद्दुःखं स्वयमेव भुंक्ते। हे बालक! राजा मां भार्येति स्वीकर्तुमपि विलज्जते । त्वं च भाग्यहीनाया ममोदरे जातोऽसि । अतः सुरुच्या यद्वाक्यं उक्तं तत्सत्यं। त्वं यदि राज्यासनमिच्छसि तर्हि भगवन्तं आराधय । ब्रह्मा यस्य चरणकमलं निषेव्य योगिभि-

रपि वन्दितं सर्वोत्कृष्टं स्थानं लेभे। तथा ते पितामहो मनुः सर्वान्तर्यामिदृष्ट्या भूरिदक्षिणैर्यज्ञैर्यमिष्ट्वा राज्यस्वर्गादिसुखं लेभे। हे वत्स! तमेवेश्वरं मनसि ध्यात्वा भजस्व। हरेर्विना अन्यं तवदुःखच्छिदमहं नपश्यामीति। एवं मातुर्वचश्श्रुत्वा ध्रुवः पितुः पुरान्निर्जगाम। तदानीं नारदमहर्षिः ध्रुवचिकीर्षितं ज्ञात्वा तत्रागत्य तं पाणिना मूर्ध्नि स्पृष्ट्वा जगाद। अहो क्षात्रियाणां प्रभावं पश्यत। बालोऽप्ययं मातुर्दुष्टवचांसि हृदि धारयति। (नारदः) हे पुत्रक! अस्मिन्बाल्ये वयसि तव मानापमानौ न पश्याम. । पुरुषस्य सुखं दुःखं वा निजकर्मभिरेव भवति। ईश्वरानुकूल्यं विनोद्योगाः सफला न भवन्ति। अतो दैवात् यत्प्राप्तं तेनैव सन्तोषं प्राप्नुयात्। हे ध्रुव! मात्रा उपदिष्टेनोपायेन यस्य देवस्य प्रसादं संपादयितुमिच्छसि स ईशो दुःखेनाराध्य इति मम मतम्। यस्य मार्गं मुनयस्तीव्रेण योगेन बहुजन्मभिः मृगयन्तोऽपि नविदुः। अतोऽधुना निष्फलोऽयं तवाग्रहो निवर्तताम्। त्वं वृद्धावस्थायां भगवत्प्राप्तौ यत्नं करिष्यसि। सुखं दुःखं च दैवानुरूपं लभ्यत इति मनसः सन्तोषं कुर्वन् देही मोक्षं प्राप्नोति। अतो गुणैरधिकं दृष्ट्वा प्रीतिं कुर्यात् नेर्ष्याम्। गुणैर्हीनं दृष्ट्वा कृपां कुर्यान्न तिरस्कारं। गुणैस्समं दृष्ट्वा मैत्रीं कुर्यान्नस्पर्धाम्। एवं कृते सति दुःखं नाप्नोति। (ध्रुवः) हे नारद! भवता सुखदुःखसमचित्तानां पुंसामयं मार्गो दर्शितः। अथापि सः सुरुच्याः दुष्टभाषणरूपैर्बाणैर्भिन्ने मम हृदि न तिष्ठति। त्रिभुवने श्रेष्ठमन्यैरसंपादितं स्थानमिच्छतोममोपायं ब्रूहि। भवान् लोकानां हितार्थं सूर्यवत्पर्यटतीति। इत्याकर्ण्य नारदः प्रीतस्सन् तं जगाद। (नारदः) हेबाल! जनन्या तव यो मार्गः कथितः स एव ते इष्टकार्यसाधकः स च भगवान् वासुदेव एव, अतस्तं भज। धर्मार्थकाममोक्षरूपमात्मनः श्रेयो य इच्छेत्तस्य हरिचरणसेवनमेव साधनमस्ति। तस्मात् हेतात ध्रुव!

त्वं मधुवनं गत्वा तत्र यमुनाजले त्रिकालं स्नात्वा आसने उपविश्य यमनियमान् धृत्वा प्राणायामेन मनोमलं हित्वा, मनसा भगवन्तं प्रसादसुमुखं, चारुनेत्रं, सुनासिकं, सुभ्रुवं, सुकपोलं, तरुणं, सुन्दरावयवं, पल्लवकरं, श्रीवत्सलाञ्छनं, मेघश्यामं, वनमालिनं, चतुर्भुजं, शङ्खचक्रगदापद्मधरं, किरीटकुण्डलकौस्तुभधरं, पीताम्बरं, देदीप्यमानसुवर्णनूपुरं, मनोनयनानन्दकरं, पद्मालालितपादपद्मयुगळं, वरदश्रेष्ठं, हरिमेकाग्रचित्तेन ध्यायेः। एवं ध्यानं कुर्वतः पुंसः मनः विषयेषु न सज्जते। हे ध्रुव! जपयोग्यो मन्त्रश्च श्रूयताम्, यं सप्तरात्रं प्रपठन् पुरुषः आकाशचारिणो देवानपि पश्यति अनेन मन्त्रेण वनसंबन्धिभिः पुष्पमूलफलादिभिस्तुलस्याच हरेर्देशकालयोग्यां पूजां कुर्यात्। तद्यथा परिमितकन्दमूलादिभक्षको मौनी एकाग्रचित्तस्सन् शिलाकाष्ठादिनिर्मितायां श्रीहरिप्रतिमायां पृथिवीजलादिषु वा श्रीहरिं ध्यात्वा पूजयेत्। ततः उत्तमश्लोकस्यावतारचरित्राणि चिन्तयेत्। सर्वानपि पूजोपचारान् हरये द्वादशाक्षरमन्त्रेणैव समर्पयेत्। एवं देहमनोवाग्भिः पूजितो भगवान् पुंभ्यः धर्मार्थकाममोक्षेषु इष्टं फलं ददाति। हे ध्रुव! इन्द्रियैर्विषयसेवने विरक्तस्सन् भक्तियोगेन मुक्त्यर्थे हरिं भजेत्। एवं नारदवचः श्रुत्वा ध्रुवस्तं प्रदक्षिणीकृत्य प्रणम्यच मधुवनं ययौ। एवं ध्रुवे तपोवनं गते सति नारदः उत्तानपादनगरं गत्वा पूजितस्सन् पुत्रशोकातुरं तं राजानं जगाद। (नारदः) हे राजन्! शुष्केण मुखेन दीर्घं किं ध्यायसि। (राजा) हे ब्रह्मन्! स्त्रीजितेन मया पञ्चवर्षो बालो मात्रा सह नगराद्बहिर्निर्वासितः। हे भगवन्नारद! वने तं श्रान्तं क्षुधितं शयानं वृकादयः किं न खादन्ति। अहो स्त्रीजितस्य मे दुष्टचित्तत्वं पश्य। प्रेम्णा अङ्कमारोढुमिच्छन्तं तं ध्रुवं नाभ्यनन्दम्। (नारदः) हे राजन्! यस्य यशो विश्वं व्याप्नोति तेन

श्रीहरिणा संरक्षितं पुत्रं त्वं माशुचः। स तव पुत्रो देवैरपि कर्तुमशक्यं कर्म कृत्वा ते यशो विस्तारयन् शीघ्रमेवैष्यति। इति नारदोक्तं श्रुत्वा राजा राजलक्ष्मीमप्यनादृत्य पुत्रमेव चिन्तयामास। ध्रुवस्तु मधुवनं गत्वा तां रात्रि-मुपोष्यैकाग्रचित्तः सन् नारदेनोक्तेन मन्त्रेण हरिं पूजयामास। ततस्त्रिरात्रान्ते कपित्थबदरभक्षको हरिं पूजयन् मासं निन्ये। ततः षष्ठेषष्ठे दिने गलिततृणपर्णानि भक्षयित्वा द्वितीयं मासं निन्ये। ततो नवमे नवमेऽहनि जलभक्षस्सन् समाधिना हरिं ध्यायन् तृतीयं मासं निन्ये। ततो द्वादशेऽहनि-वायुभक्षः जितश्वासः देवं ध्यायन् चतुर्थं मासं निन्ये पञ्चमे मासि प्राप्ते सति जितश्वासो ध्रुवः एकपादेन वृक्षइव स्थित्वा सर्वतो मन आकृष्य ब्रह्म ध्यायन् तस्मादन्यत् किञ्चिदपि नाद्राक्षीत्। एवं ब्रह्म धारय-माणस्य सतः त्रयो लोकाश्चकम्पिरे। यदा स एकपादेन तस्थौ तदा तदङ्गुष्ठनिपीडिता पृथिवी ननाम। तदा तस्य श्वासनिरोधेन जगतः प्राण-निरोधो जातः। तदा सर्वे देवादयः भीतास्सन्तः हरिं शरणं गत्वोचुः। (देवाः) हे भगवन्! सर्वस्य जगतः एतादृशं प्राणनिरोधं वयं कदापि न दृष्टवन्तः अतो भयाद्वयं त्वां शरण्यं शरणं प्रपन्नाः एतस्मात्सङ्कटादस्माकं मुक्तिं कुरु। (श्रीभगवान्।) हे देवाः! यूयं माभैष्ट, यस्माद्वः प्राणनिरोधो जातस्तं ध्रुवं बालमहं तपसोनिवर्तयिष्ये। यूयं स्वस्थानं यातेति। देवाः भगवद्वचसा निर्भया भूत्वा स्वर्गं ययुः। हरिरपि गरुडमारुह्य मधुवनं ययौ। ध्रुवो हृदिस्थं सहसैवान्तर्हितं दृष्ट्वा व्युत्थितस्सन् यादृशोन्तःकरणे स्फुरितः तादृशं हरिं बहिः स्थितं ददर्श। तद्दर्शनेन जातसंभ्रमस्सन् दृग्भ्यां प्रपिबन्निव पश्यन्भूमौ दण्डवत्प्रणनाम। ततो हरिः स्वगुणान् वक्तुमिच्छन्तं तं ज्ञात्वा तस्य कपोले शङ्खेन स्पर्शंकृतवान्। तदा शङ्खस्पर्शमात्रेणोत्पन्नज्ञानः स

ध्रुवो भक्त्या प्रेमयुक्तस्सन् तं हरिं तुष्टाव। (ध्रुवः।) यस्त्वमन्तःप्रविश्य म
सुप्तां वाचं अन्यानिच श्रवणत्वगादीनीन्द्रियाणि भवन्नेमकटाक्षलीलया जीवयसि
हे हरे! त्वया दत्तेन ज्ञानेन त्वां शरणं प्राप्तः ब्रह्मा इदं विश्वं ददर्श, हेनाथ! त
चरणकमलध्यानात्कथाश्रवणेनच यत्सुखं स्यात् तादृशं सुखं अन्यत
कुतोऽपि न भवति, हेजगदीश! त्वयि भक्तिं कुर्वतां साधूनां समागमो
भूयात्, येन भवसमुद्रं तरिष्यामि यः भक्तानुग्रहतत्परस्सन् भक्तानां वर
भूत्वा तान् सर्वापदः रक्षसि, तस्मै श्रीवासुदेवाय भवते नमः। ए
स्तुतः हरिः प्रीतस्सन्निदमाह। हे ध्रुव! तव वाञ्छितमहं वेद्मि तच्च ते ददामि
तव कल्याणमस्तु, यत्र निहितं ग्रहनक्षत्रताराणां चक्रं। यच्चलोकत्रयनाशेऽ
अनश्वरं तध्द्रुवपदं ते दत्तमस्ति, तव पितरि पृथिवीं तुभ्यं दत्वा वनं गतेसि
त्वं षड्त्रिंशद्वर्षसाहस्रं राज्यं करिष्यसि, त्वद्भ्रातरि उत्तमे मृगयायां नष्टेसि
तन्माता सुरुचिस्तं मृगयन्ती सती दावाग्निं प्रवेक्ष्यति त्वं यज्ञैर्मामिष्ट्वा इहलो
उत्तमान् भोगान् भुक्त्वाऽन्ते मां संस्मरिष्यसि, ततः ऋषिभ्यः उपरिष्टा
सर्वलोकनमस्कृतं अचलं मत्स्थानं गमिष्यसि, इत्युक्त्वा भगवान् तस्य ध्रुवस
पश्यतः स्वधाम जगाम, ध्रुवोऽपि स्वमनोरथं प्राप्य पुरं जगाम। अ
उत्तानपादो राजा यथा कश्चिन्मृतो मनुष्यः सजीवो भूत्वा पुनर
गच्छेत् तथा आगतं स्वपुत्रं दूतमुखात् श्रुत्वा प्रथमं तद्वाक्ये विश्वा
नचकार ततो नारदोक्तं स्मृत्वा विश्वासेनातिहृष्टस्सन् वार्तामानीतव
सेवकाय हारं पारितोषिकं दत्वा सुवर्णालङ्कारभूषितं रथमारुह्य ब्राह्मणा
भिस्सह शंखदुन्दुभिनादेन वेदघोषेणच पुत्रावलोकनेच्छुः संमुखं जगाम
तथा सुरुचिः सुनीतिः उत्तमेनसह शिबिकामारुह्य संमुखं ईयतुः। तत
नगरसमीपे ध्रुवं दृष्ट्वा राजा रथात्तूर्णमवप्लुत्य प्रेमविह्वलस्सन् दोर्भ्यां गृहील

आलिलिङ्ग । अथ ध्रुवः पितुः पादौ ननाम ततः मातरौ ननाम । ततस्तैश्चिरं जीवेत्याभिमन्त्रितः । ततश्च उत्तमोध्रुवश्चोभौ प्रेमविह्वलौ भूत्वा अन्योन्यमालिलिङ्गतुः । ततस्सुनीतिः सुतस्पर्शेन आनन्दभरिता दुःखं जहौ । ततः नृपः ध्रुवं हस्तिनं आरोप्य रत्नतोरणादिपरिष्कृतं नगरं प्राविशत् । तत्र पुरस्त्रियः पथि ध्रुवं सर्षपाक्षतपुष्पफलादिभिः प्रविकिरन्त्यः आशिषो ददुः । ध्रुवस्तासां मधुरगीतानि शृण्वन् पितुर्गृहं प्राविशत् । यत्रगृहे पयःफेनसदृशाः शय्याः सन्ति । सुवर्णमयाः उपस्कराः स्फटिकभित्तिषु मणिप्रदीपाः वैडूर्यमणिसोपानयुक्ताः हंसकारण्डवकुलैर्व्याप्ता वाप्यः सन्ति । तस्मिन् गृहे ध्रुवः अतिविचित्रं कर्म दृष्ट्वा अतिविस्मयं प्रापत् । ततः प्राप्तयौवनं प्रजानां मान्यञ्च ध्रुवं दृष्ट्वा पृथिव्याः पतिं चक्रे । ततः उत्तानपादो राजा आत्मनो वृद्धत्वं ज्ञात्वा विरक्तस्सन् वनं जगाम । ध्रुवः वायोः सुतायां इलायां उत्कलनामानं पुत्रं जनयामास । उत्तमस्तु अकृतविवाहएव हिमाचले मृगयार्थं गतस्सन् तत्र यक्षेण हतः । तन्माता सुरुचिरपि तं पुत्रं मृगयन्ती सती दावाग्निना दग्धा ममार । ध्रुवो भ्रातृवधं श्रुत्वा क्रोधयुक्तस्सन् रथमारुह्य यक्षाध्युषिताम् उत्तरादिशं गत्वा आकाशं दिशश्च नादयन् शङ्खं दध्मौ । तच्छब्दश्रवणेनापततः यक्षान् त्रयोदशायुतानिमर्मस्पृग्भिर्बाणैर्जघान । तदाध्रुवमुक्ताः बाणाः यक्षाणां कवचानि भित्वा देहानाविविशुः । तदा बाणैः भिद्यमानानां यक्षाणां सकुण्डलैः शिरोभिरूरुभिर्बाहुभिः उष्णीषैश्चास्तृतास्ताभूमयोरेजुः । तदा हतावशिष्टाः यक्षाः ध्रुवबाणैःछिन्नभिन्नावयवाः दुद्रुवुः । तदैव ते यक्षाः अदृश्या भूत्वा आसुरीर्मायाः ससृजुः । आदौ ध्रुवः समुद्रनादमिव नादं शुश्राव । ततो रजोऽदृश्यत । ततो मेघसमुदायेनाकाशं सर्वतः आच्छादितं । मेघाः रक्तमेदांसि ववृषुः । ध्रुवस्याग्रतो गगनात्कबन्धाः निपेतुः । ततः दिग्भ्यः

गदापरिघनिस्त्रिंशमुसलपाषाणाः निपेतुः । सर्वतः सर्पव्याघ्रगजसिंहादयः अभ्यधावन् । ततः समुद्रः भूमिं लहरीभिः प्लावयन्निव ददृशे । एवं ते यक्षाः मायया भयङ्करान् उत्पातान् ससृजुः । तदा मुनयः एतत् ज्ञात्वा ध्रुवसमीपं आगत्य ध्रुवस्य मङ्गळमिच्छन्त आहुः । (मुनयः) । हे औत्तानपादे ! भगवान् शार्ङ्गधन्वा तवशत्रून् नाशयतु । यस्य नामोच्चारणेन लोको दुस्तरमपि मृत्युं तरति । एवं वदतां ऋषीणां वचनं निशम्य ध्रुवोऽपउपस्पृश्य धनुषि नारायणास्त्रं सन्दधे । अस्त्रे सन्धीयमाने सति यक्षनिर्मिताः सर्वा मायाः यथा ज्ञान-प्राप्तौ क्लेशा नश्यन्ति तथा विनेशुः । तस्मान्नारायणास्त्रतो बाणाः निर्गत्य शत्रुसैन्यं विविशुः । तीव्रशरपीडिताः यक्षाः ध्रुवमभ्यधावन् । सतु तान् गुह्यकान् छिन्नबाहूरुकण्ठोदरान् कृत्वा परलोकं निनाय । ध्रुवेण हन्यमानान् यक्षान् वीक्ष्य कृपाविष्टः स्वायंभुवो मनुः ऋषिभिस्सह तत्रैत्य ध्रुवं जगाद । (मनुः) हेवत्स ! पापरूपिणा नरकद्वारेण क्रोधेनालं । येन निरपराधान् यक्षान् त्वं हतवान् । एतत्सद्भिर्निन्दितं कर्मास्मत्कुलोचितं नहि । एकस्य यक्षस्य अपराधप्रसङ्गेन त्वया बहवो यक्षा हताः । अयं भगवत्सेवकानां साधूनां मार्गो न भवतिहि । त्वं दुराराधम् हरिं आराध्य विष्णोः परमं पदं लब्ध्वा साधूनां व्रतं शिक्षमाणस्सन् कथं निन्द्यं कर्म कृतवानसि । महत्सु पुरुषेषु सहनशीलतया नीचेषु दयया समेषु मैत्र्याच सर्वात्मा भगवान् प्रसीदति । भगवति प्रसन्ने सति पुरुषो मायागुणेभ्यो मुक्तस्सन् ब्रह्मसुखं प्राप्नोति । हेपुत्र ! एते यक्षाः तव भ्रातृहन्तारो न भवन्तिहि । पुंसः मृत्युजन्मनोः दैवमेव कारणं । भगवानेव स्वमायया विश्वं सृजति अवति हन्तिच । तस्मात् हेपुत्र ! तमेव हरिं सर्वात्मना शरणं व्रज । तस्मिन्ननन्ते भगवति भक्तिं विधाय अविद्याग्रन्थिं भेत्स्यसि । हेध्रुव ! श्रेयसां घातकं क्रोधं सम्यगालोच्य नियच्छ । एवं मनुः

पौत्रं अनुशिष्य तेन वन्दितस्सन् देवैस्सह स्वधाम ययौ । एतस्मिन्नन्तरे कुबेरः तत्रागत्य यक्षवधान्निवृत्तं ध्रुवं उवाच । (कुबेरः) । हेवत्स ! अहं ते सन्तुष्टोऽस्मि । यतस्त्वं मनोरुपदेशेन दुस्त्यजं वैरं त्यक्तवानसि । त्वन्तु यक्षान् नावधीः । नच यक्षास्तवभ्रातरं जघ्नुः, किन्तु कालएव सर्वेषां मृत्युजन्मनोः समर्थोऽस्ति । तस्मात् सर्वदा भगवद्भक्तिः स्थिरा भवतु इति बहून् वरान् दत्वा स्वपुरगमनाय ध्रुवमनुमत्य कुबेरः स्वलोकं जगाम । ततः ध्रुवः स्वपुरमेत्य भूरिदक्षिणैर्यज्ञैरिष्ट्वा ततो हरौ भक्तिं कुर्वन् सर्वभूतेषु आत्मनिच अवस्थितं तमेवहरिं ददर्श । एवं सुशीलं ब्राह्मणभक्तं सर्वदयालुं तं सर्वाः प्रजाः पितृवन्मेनिरे । स क्षितिमण्डलं षट्त्रिंशद्वर्षसहस्रं पालयामास । तदनु अस्थिरमिदं जगदिति मन्यमानः राज्ये स्वपुत्रं अभिषिषेच, स्वयञ्च विषयसुखं नश्वरं ज्ञात्वा बदरिकाश्रमं प्राप । तत्र तीव्रं तपः कुर्वन्नेवाकाशा-दधोऽवतरद्विमानं ददर्श । तस्मिन् विमाने चतुर्भुजौ शङ्खचक्रगदाद्यायुधधरौ सुनन्दनन्दनौ दृष्ट्वा हरेः पार्षदाविति सहसोत्थाय ननाम । तदा सुनन्दनन्दनौ ऊचतुः । आयुष्मन् भगवता प्रेषितमिदं विमानं आरोढुं त्वमर्हसि इति । तदा ध्रुवः विमानं प्रदक्षणीकृत्य भगवत्पादारविन्दयोः स्मृत्वा विमानमारुह्य गच्छन्नेव सुनन्दनन्दनप्रदर्शितां अग्रे विमानेन स्वर्गलोकं गच्छन्तीं स्वमातरं सुनीतिं मनसा प्रणम्य स्वर्गमार्गे स्तुवद्भिः देवैः पुष्पैः विकीर्यमाणो ध्रुवः ग्रहान् सप्तर्षींश्च समतिक्रम्य यत् स्थानं उपरि वर्तते, यत् स्थानं स्वतेजसैव प्रकाशमानं यस्य भासा त्रयो लोकाः प्रकाशन्ते, ये प्राणिषु निर्दयाः ते यत् स्थानं न गच्छन्ति, ये शान्ताः समदृष्टयः ते यत् स्थानं गच्छन्ति, तादृशं विष्णोः पदं जगाम ॥

इति ध्रुवचरितं परिसमाप्तम् ।

## CHAPTER X—*C*.

### तृतीयमञ्जरी ।

# ॥ वेताळकथा ॥

### उपक्रमणिका ।

---

अस्ति गोदावरीतटे प्रतिष्ठानाख्यो जनपदः । तत्र विक्रमसेनस्य भूपतेः पुत्रः शक्रपराक्रमः त्रिविक्रमसेनो नाम विख्यातकीर्तिरभूत् नृपतिः । तस्य सभासीनस्य नृपस्य सेवार्थे प्रत्यहं क्षान्तिशीलोनाम भिक्षुः एकैकं फलं उपानयत् । सोऽपि तदादाय आसन्नचरस्य कोशाधिकारिणो हस्ते प्रतिदिनं न्यक्षिपत् । इत्थं द्वादशवर्षेषु गतेषु एकदा सभागतोऽसौ भिक्षुः राज्ञे यथायथं फलं दत्वा सभागृहान्निरगात् । राजातु तस्मिन्नहनि दैवात्प्रविष्टाय रक्षिणां हस्तच्युताय क्रीडामर्कटपोताय तत्फलं प्रादात् । स मर्कटः यावत् तत्फलमश्नाति तावत् तस्मात् फलात् विदळितात् अनर्घं उत्तमं रत्नं निरगात् । तत् दृष्ट्वा राजा तदादाय तं भाण्डागारिकं पप्रच्छ । भिक्षुणा उपनीतानि यानि फलानि मया तव हस्ते दत्तानि तानि त्वया उपस्थापितानि । तदाकर्ण्य कोशाध्यक्षः सभयस्तं व्याजिज्ञपत्—देव ! मया तानि अखण्डानिच गवाक्षतः क्षिप्तानि । यदि आदिशति देवः, तदा तानि सांप्रतं गवेषये—इत्यूचिवान् । स राज्ञानुमतो गत्वा क्षणादेव प्रत्यावृत्य पुनः व्यज्ञापयत् । देव ! तानि कोशे शीर्णानि फलानि तेषु च रश्मिज्वालाकुलान् रत्नराशीन् पश्यामि । तदाकर्ण्य सन्तुष्टः तान् मणीन् कोशरक्षिणे दत्वा अन्येद्युरागतं तं भिक्षुं पर्यपृच्छत् । भिक्षो कथमेवं धनव्ययेन नित्यं मां सेवसे? यावत्कारणं न वदसि, तावत् ते फलं

नग्रहीष्ये इत्युक्तवन्तं तं नृपं स भिक्षुः विजनं नीत्वा अब्रवीत् । वीर ! किमपि साधनं साचिव्यसापेक्षं अस्ति । तत्र वीरेन्द्रेण त्वया क्रियमाणं साहाय्यं अर्थये । इति श्रुत्वा राजा तथेति तस्य साहाय्याय प्रत्यपद्यत । ततस्सविप्रस्तुष्टः पुनस्तं नृपं अवादीत्—प्रभो ! अस्यां आगामिन्यां कृष्णचतुर्दश्यां निशागमे इतो महाश्मशानं गत्वा वटतरोः अधस्थितस्य मे सकाशं त्वया आगन्तव्यमिति । ततस्तेन राज्ञा बाढमेवं करिष्यामीति अभिहिते स क्षान्तिशीलो भिक्षुः प्रहृष्टः स्वं निलयं ययौ । अथागतायां कृष्णचतुर्दश्यां समहासत्त्वो नरपतिः भिक्षोस्तां प्रार्थनां प्रतिपन्नां स्मरन् प्रदोषे नीलवसनेन समलंकृतशिराः खड्गपाणिरलक्षितः तत् महाश्मशानमगात् । गत्वा ततस्ततोऽन्विष्यन् वटतरोरधः स्थितं तं मन्त्रन्यासं कुर्वाणं भिक्षुं दृष्ट्वा समुपेत्य च जगाद, भिक्षो ! एषोऽस्मि आगतः किं ते करवाणि वद । तदाकर्ण्य सभिक्षुर्नृपं दृष्ट्वा हृष्टः प्रोवाच । राजन् ! यदिप्रसादस्ते कर्तव्यः, तदा इतो दक्षिणाभिमुखं गत्वा एकाकी विदूरे यं शिंशुपातरुं द्रक्ष्यसि, तस्मिन् प्रलंबितो मृतः कोपि तिष्ठति तमिहानीय मे साहाय्यं कुरु। तदाकर्ण्य सवीरो नृपतिस्तथेत्युक्त्वा सत्यसङ्गरः दक्षिणान्दिशमालम्ब्य तत्र प्रययौ। कथञ्चिच्च तेन श्मशानमार्गेण गच्छन् विदूरे तं शिंशुपातरुं प्राप्य तदुपरि लंबमानं शवमेकमद्राक्षीत्। दृष्ट्वा तं तरुमारुह्य छिन्नरज्जुं तं भूमौ अपातयत्। पातितश्च सः अकस्मात् जीवित इव भृशं चक्रन्द । ततोऽसौ राजा अवरुह्य कृपया तज्जीविताकाङ्क्षी यावत् तस्य अङ्गानि परामृशत् । तावत् स शवः अट्टहासमकरोत् ततः स राजा तं वेताळाधिष्ठितं मत्वा—कथं हससि ? एहि, गच्छाव इति निर्भयं यावत् ब्रवीति, तावत् तं वेताळं न भूमौ समवैक्षत ; ऐक्षतच तस्यैव तरोरुपरि यथापूर्वं लम्बमानं । ततो भूयोपि तरुमारुह्य स राजा यत्नतः तं शवमवारोहयत्। वीराणां चित्तं वज्रादपि अकम्प्यं अखण्डितं । ततः

तं वेताळाधिष्ठितं शवं स्कंधमारोप्य मौनेन गन्तुमुपचक्रमे । यान्तं च तं राजानं शवाधिष्ठितो वेताळः अब्रवीत्—राजन् अध्वविनोदाय कथामाख्यामि शृणु । इति ॥

प्रथमकथा ।

अस्ति काळिंदीतटे ब्रह्मस्थलाभिधः कश्चिदग्रहारः । तत्र अग्निस्वामीति समभवत् कश्चिद्वेदपारगोविप्रः । तस्य अतिरूपवती मन्दारवती नाम कन्यका अजनि, यां नवानर्घलावण्यां निर्माय्य विधिर्नियतं निजं स्वर्गनारीपूर्वनिर्माण-कौशलं जुगुप्सते । तस्यां शैशवमतिक्रान्तायां कान्यकुब्जात् समसर्वगुणोपेताः त्रयो ब्राह्मणदारकाः समाययुः । तेषामेकैकः आत्मार्थे तत्पितरं तामयाचत । तत्पिता प्राणव्ययेऽपि तामन्यस्मै दातुं अनिच्छन् तन्मध्ये एकस्मै दातुं मतिमकरोत् । सातु कन्या अन्ययोर्बाधात् भीता कियन्तं कालं न पाणिमग्राहयत् । ते च त्रयोपि तस्यामुखेन्दुनिक्षिप्तदृष्टयः चकोरव्रतमालंम्ब्य दिवानिशं तत्रैव तस्थुः। अथाकस्मात् समुत्पन्नेन ज्वरदाहेन आर्ता सा मन्दारवती पञ्चतामवाप। ततस्ते विप्रकुमाराः तां परासुं दृष्ट्वा शोकार्ताः कृतप्रसाधनां श्मशाने नीत्वा अग्निसादकुर्वन् । ततश्च तेषामेकः तत्र मठं निर्माय तद्भस्मशय्यायां भैक्षेण जीवन्नतिष्ठत् । द्वितीयः अस्थीनि तस्या उपादाय भागीरथ्यां निक्षेप्तुं जगाम । तृतीयस्तु तापसो भूत्वा देशान्तराणि भ्रमितुमगात् । सत भ्राम्यन् तापसः वज्रालोकाभिधं ग्रामं प्राप्य कस्यापि विप्रस्य गृहे अतिथिरभूत् । तेनच गृहपतिना पूजितो यावत् तत्र भोक्तुं प्रावर्तत तावत् तस्य एकः शिशुः रोदिनुं प्रवृत्तोऽभवत् । सच शिशुः सान्त्व्यमानोपि यदा न व्यरंसीत् तदास्य गृहिणी तं बाहावादाय ज्वलदग्नौ क्रुधा प्राक्षिपत् । क्षिप्तएव सतु कोमलाङ्गः तत्क्षणात् भस्मसादभूत् ।

तदवलोक्य स तापसः सञ्जातरोमाञ्चः प्राब्रवीत्। हा धिक् कष्टं ! प्रविष्टोऽहं ब्रह्मराक्षसवेश्मनि । तस्मात् पूर्तं किल्बिषमिदमन्नं, नाधुना भक्षयामि । एवं वादिनं तं अतिथिं स गृहस्थः प्रत्यवादीत्, ब्रह्मन्! पश्य मे पठितसिद्धस्य मृतसञ्जीवनीं शक्तिं इत्युक्त्वा पुस्तकमुद्घाट्य तां विद्यां बहिष्कृत्य अनुवाच्यच तस्मिन् भस्मनि जलमक्षिपत् । क्षिप्तमात्रे च जले सपुत्रस्तथैव जीवन्नुदातिष्ठत्। ततस्सतापसः सुनिर्वृतः तत्र सहर्षं बुभुजे । गृहस्थोपि स नागदन्तके पुस्तकमवस्थाप्य भुक्त्वैत्र तेन तापसेन सह रात्रौ शयनमभजत । अथ सुप्ते गृहपतौ स तापसः स्वैरमुत्थाय शङ्कितः स्वप्रियायाः मन्दारवत्याः जीवनार्थे तां पुस्तिकामग्रहीत् । गृहीत्वैव तस्मान्निर्गत्य रात्रंदिवं व्रजन् शनैस्तच्छ्मशानमासदत्। अद्राक्षीच्च सहसा तं द्वितीयमुपस्थितं; योहि गङ्गांभसि तदस्थि क्षेप्तुमगात् । तत्रस्थं तस्या भस्मनि शायिनं निबद्धमठं तृतीयं प्राप्य सतापसः प्रोवाच, मठिका त्यज्यतां भ्रातः! प्रियां तामहमुत्थापयामि, इति। ततस्ताभ्यां निर्बन्धतः परिपृष्टः पुस्तिकामुद्घाट्य मन्त्रमनुवाच्य मन्त्रपूतानि जलानि तस्मिन् भस्मनि प्राक्षिपत् । क्षिप्तमात्रेषु जलेषु सा मन्दारवती जीवन्ती सहसा समुत्तस्थौ । तदा सा कन्या वह्निं प्रणम्य निष्क्रान्तं पूर्वाधिकद्युति काञ्चनेनेव निर्मितं वपुर्बभार। तादृशीं तां पुनर्जीवितां निशम्य त्रयोपि ते स्मरातुराः तत्प्राप्त्यर्थं अन्योन्यं कलहं चक्रुः । एकेनोक्तं इयं मम मन्त्रबलात् जीविता ममैव भार्या । अपरोऽब्रवीत्—मदीयेन तीर्थभ्रमणपुण्येन इयं जीविता, तदेषा ममैव भार्या । तृतीयेनाभिहितं—मया भस्मानि रक्षितानि। ततएव इयं जीविता तस्मात् इयं ममैव प्रणयिनी—इति। हे महीपते ! तेषां विवादनिर्णये त्वमेव शक्तः, तद्ब्रूहि कन्यासौ कस्य एतेषां भार्या भवितुमर्हति,। यदि जानन् मिथ्यावदिष्यसि, तदा ते मूर्धाविदालिष्यति-इति ।

वेताळादाकर्ण्य स राजा एवमभ्यधात्—यः क्लेशेन मन्त्रमानीय एनामजीवयत् सखलु पितृकार्यकरणात् न पतिः, यश्च तस्याः अस्थीनि गङ्गायां क्षेप्तुं गतः स पुत्रकार्यकरणात् न पतिः, यस्तु तद्भस्मशय्यां समाश्लिष्य तपश्चचार श्मशानएव, स एवास्याः प्रणयिकार्यकरणात् पतिर्भवितुमर्हतीति । इत्थं नृपात् विक्रमसेनात् आकर्ण्य स वेताळः तस्य स्कन्धात् अतर्कितः स्वपदं प्रायात् । राजा च भिक्षुकार्यार्थं पुनस्तं प्राप्तुं मनो बबन्ध । प्राणात्ययेऽपि महासत्त्वाः प्रतिपन्नं अर्थं असाधयित्वा न निवर्तन्ते ॥

॥ इति ॥

---

## CHAPTER X—*D.*

### चतुर्थमञ्जरी ।

---

### द्वितीयकथा ।

अथ राजा पुनः शिंशुपामूलमुपेत्य वेताळञ्च तं तथैव स्कन्धमारोप्य चलितुमुपचक्रमे । वेताळश्च तं पुनरब्रवीत् राजन्! श्रमविनोदाय पुनरहमेकां आख्यायिकां कथयामि शृणु—

पुरा गङ्गाकूले कनकपुरं नाम पुरमेकमासीत्। यस्मिन् धर्मस्य एकोऽपि-पादः कलिना नविहतः तत्राभवत् यशोधराख्यो यथार्थनामा महीपतिः । योहि धीरो वेलाद्रिरिव क्षितिं विप्लवात् ररक्ष । यश्च जगदाह्लादकश्चण्डप्रतापोऽ-खण्डमण्डलश्च विधिना चन्द्रार्काविकीकृत्येव विनिर्मितः । जनः यं पापभीरुं यशोलुब्धं परस्त्रीषु षण्डं शौर्यौदार्यमयं विदन्ति । तस्य राज्ञः पुरे कश्चित् महावणिक् प्रतिवसतिस्म। तस्य उन्मादिनी नाम कन्याभवत् । यस्तामद्राक्षीत् स मदनबाणहतः उन्मादवानेवाभूत् । तस्यां यौवनस्थायां स वणिक् नीति-विज्ञः तं यशोधरं राजानमुपेत्य व्यजिज्ञिपत् । प्रभो! त्रैलोक्यरत्नभूता मे कन्यैका प्रदेयास्ति तां देवस्य अनावेद्य अन्यस्मै न दातुमुत्सहे । अस्मिंश्च भूमण्डले देवएव सर्वरत्नानां प्रभुः, तत् तां स्वीकृत्य मामनुगृह्णातु देवः इति। तस्य वचनमाकर्ण्य स राजा निजान् ब्राह्मणान् तस्या लक्षणानि परीक्षितुं व्यसृजत् । ते ब्राह्मणा गत्वा तां त्रिलोकसुन्दरीं दृष्ट्वा सद्यः क्षोभमगमन् व्यचिन्तयंश्च । यदि राजा इमां परिणयेत् तदा राज्यमवसीदेत्। एतस्यामासक्त-चित्तः स कदापि नहि राज्यमवेक्षिष्यते। तस्मादेषा सुलक्षणेति राज्ञे नास्माभिः

कथनीयेति । इत्येवं मनसि संकल्प्य ते राजान्तिकमाजग्मुः ऊचुश्च देव! सा कुलक्षणेति। तेन च स राजा तां वणिक्सुतां न स्वीचकार । ततस्तदाज्ञया स वणिक् तां कन्यां बलधराख्याय सेनापतये प्रददौ । अथ सा भर्तृगृहे तेन भर्त्रा सुखेनास्थात् ।

अथ गच्छति काले हेमन्तहस्तिनं प्रफुल्लकुन्दलतादन्तं मथिताम्बुजिनीवनं हत्वा लसत्पुष्पमञ्जरीकेसरावलिः चूताङ्कुरनखः कानने क्रीडन् मधुकेसरी समाजगाम । तस्मिंश्च काले वसन्तोत्सवं द्रष्टुं स राजा यशोधरः गजारूढः निर्जगाम । तद्रूपेण संभाव्यविप्लवाः कुलयोषितः अपसारयितुं तदा उद्घुष्य दत्तं डिण्डिमं श्रुत्वा सा उन्मादिनी परित्यागावमानिता स्वगृहहर्म्यतः तस्मै राज्ञे आत्मानमदर्शयत् । सच राजा सन्धुक्षितस्य मधुना मलयानिलैः कामाग्नेः ज्वालामिवोद्गतां तां दृष्ट्वा चुक्षुभे । तस्याश्च रूपं मनोभवो जैत्रमस्त्रमिव हृदये गाढं प्रविष्टं निर्वर्णयन् क्षणात् मोहमगात् । अथ स भृत्यैराश्वासितो राजधानीं प्रविश्य पृष्टेभ्यस्तेभ्यस्तां प्रागुपनतोज्झितां उन्मादिनीं बुबुधे । ततस्सराजा कुलक्षणेयमिति वादिनो विप्रान् देशान्निर्वास्य अनुदिनं तामेव समुत्सुको दध्यौ । अहो जगन्निष्कळङ्के तस्या मुखे सति निर्लज्जो जडात्मा अयं शशी नित्यं उदेति । इत्येवं तामन्ताश्चिन्तयन् राजा कामाग्निपुटपाकेन पच्यमानः दिवानिशं क्षीयतेस्म । ह्रिया निगूहमानश्च पृच्छद्भ्यः आप्तेभ्यः तत्पीडाकारणं आचख्यौ। अलं सन्तापेन स्वाधीनां तां किं न भजसे। इति तैराभिहितस्स धार्मिकः नरपतिः नैवतदनुमेने । ततो बलधरो नाम सेनापतिः तत् विदित्वा उपेत्य च चरणानतः प्रभुमभ्यर्थयामास । देव! दासस्त्री सा तव दास्येव न पराङ्गना अहंच स्वयं प्रयच्छामि तदेनां मे भार्यां गृहाण । अथवाहं तां इह देवकुले त्यजामि तर्हि तस्या ग्रहणे न दोषः ।

इति सेनापतिना निर्बन्धेन अभ्यर्थ्यमानोऽपि सान्तःकोपं तमुवाच । अहं राजा भूत्वा कथमीदृशमधर्मं कुर्याम् । मयि धर्ममतिक्रामति कः स्ववर्त्मनि तिष्ठेत् । भक्तोपि त्वं कथं मां पापे परलोकमहादुःखहेतौ क्षणसुखावहे नियोजयासि । यदि त्वं धर्मपत्नीं विहास्यसि तदा त्वां नक्षमिष्ये मादृशः को हि तादृशं धर्मविप्लवं सहेत । तद्वरं मृत्युरिति उक्त्वा स राजा तं निषिषेध। उत्तमसत्वा हि प्राणानपि त्यजन्ति न सत्पथम् । तथैवार्थयमानान् सर्वानपि पौरजानपदान् मिलितानपि स राजा सुदृढनिश्चयो निराचकार । ततः क्रमेण तेनैव स्मरज्वरभवोष्मणा अभीक्ष्णं प्रक्षीणदेहः स राजा यशोधरः यशश्शेषतां प्रययौ । सेनापतिश्च प्रभोस्तथाविलयमसहिष्णुः अग्निं विवेश । अनिर्वचनीयं हि भक्तचेष्टितं इति कथामाख्याय स्कन्धस्थितो वेताळः तं पप्रच्छ राजन् ! एतयोः सेनापतिमहीभृतोः कोऽधिको मतः त्वया पूर्वदत्त-शापमनुस्मृत्य वक्तव्यम् । राजा अवदत् , अहं राजानमधिकं मन्ये। तदाकर्ण्य वेताळः साक्षेपमब्रवीत् राजन् ! सेनापतिः कथं नाभ्यधिकः यः स्वामिने तथा विधां स्वभार्याम् सुचिरेण ज्ञाततद्भोगसुखास्वादोऽपि समुपानयत् । प्रभौ च पञ्चत्वमागते तद्भक्त्या आत्मानमग्निसादकरोच्च। राजातु अनास्वादिततद्भोगस्तस्य भार्यां जहौ । वेतालेनैवमुक्तः स राजा विहस्य पुनरब्रवीत् । यद्यप्येतत् तदपि नातिचित्रं तत्कुलपुत्रो हि सेनापतिः स भक्त्या यत्तथाकरोत् । प्राणैरपि भृत्यानां स्वामिरक्षणं व्रतं। राजानस्तु मदाध्माता गजा इव निरङ्कुशा विषयोन्मुखा धर्ममर्यादाशृङ्खलाम् छिन्दन्ति । तेषां हि उद्रिक्तचित्तानां अभिषेकाम्बुभिस्समं विवेको विगलति । चलच्चामरमारुतैरुद्धूय तेषां वृद्धोपदिष्टशास्त्रार्थरजांसि उत्क्षिप्यन्त इव । आतपत्रेण च सत्यं सूर्यालोक इव निवर्त्यते विभूतिवात्ययाचोपहता दृष्टिः मार्गं नेक्षते जगद्विजयिनोऽपि ते ते नहुषादयो राजानः

मारमोहितचेतसः तां तां विपदं प्राप्तवन्तः । एष राजा पृथिव्यामेकच्छत्रोऽपि यत्तया उन्मादिन्या चपलया लक्ष्म्या इव विमोहितोऽपि प्राणानपि तत्याज नपुनरमार्गे पदं निदधे । तेनासौ वीरः मे अधिको मतः । इत्याकर्ण्य नृपतेर्वाक्यं स वेताळः स्कन्धवर्ती पुनः स्वमेव पदं मायया प्रायात् । राजापि अचलचित्तस्तं तथैवानुससार । आरब्धे सुदुष्करेऽपि महतां, मध्ये विरामः कुत एव इति ॥

## तृतीयकथा ।

ततः स राजा तां तिमिरश्यामां चिताग्निज्वलितेक्षणां घोरां रजनिराक्षसीमगणयन् वीरः तस्मिन् भीषणे श्मशाने तां शिंशुपां गत्वा तं वेताळं स्कन्धमारोप्य पूर्ववत् प्रातिष्ठत । वेताळोऽपि गच्छन्तं तं नरदेवमुवाच राजन् ! अहं गतागतैर्भृशमुद्विग्नः नपुनस्त्वं, तदेकं मत्तः महाप्रश्नं कथयतः समाकर्णय ।

आसीत्पुरा दक्षिणापथे धर्मोनाम मण्डलेश्वरः साधूनां धुरन्धरः नरपतिः । तस्य चन्द्रावतीनाम माळवदेशभवा भार्या आसीत् । तस्यां कन्यैका प्रसूता । तस्यां च कन्यायां प्रदेयायां स धर्मनरपतिः राष्ट्रभेदिभिर्दायादैः मिलितैरुन्मूलितः पलाय्य सुदृशाभार्यया तया च दुहित्रा सह रात्रौ संग्रहीतरत्नसञ्चयः स्वराष्ट्रात् निरगात् । मालवेषु श्वशुरगृहंप्रति स्वैरं गच्छन् स तया पत्न्या सुतया च सह विन्ध्याटवीमाससाद । तस्यां कथंचित् श्रान्तया भार्यया सुतया च परिखिन्नः निशामनयत् । अथ प्रातः भगवान् विभावसुः करान् प्रसारयन् मागाश्चौराटवीमेतामिति तं राजानं वारयन्निव पूर्वां दिशमारुरोह । ततो राजा पदातिः त्रसन्त्या सुतया जायया च सह कुशकण्डकैः क्षताङ्घ्रिः परेषां प्राण-

सर्वस्वहारिभिः पुम्भिरावृतां धार्मिकजनरहितां कृतान्तनगरीमिव दुर्गां भिल्लानां पल्लीमगच्छत् । तत्रागच्छन्तं वसनाभरणान्वितं तं दूरात् दृष्ट्वैव बहवो दस्यवः सायुधाः मुषितुं प्राधावन् । राजा तानागच्छतो विलोक्य भार्यासुते जगाद म्लेच्छा इमे मा युवां स्पृशन्तु एतत् गहनं वनं विशतम् इति राज्ञाभिहिता राज्ञी तया लावण्यवत्या तनयया सह भयात् वनमध्यं विवेश । वीरस्स-राजा तु अभिमुखायातान् शरवर्षिणस्तान् शबरान् खड्गचर्मधरः बहून् न्यवधीत् । ततः पल्लीपतिनाज्ञप्ताः सर्वे दस्यवः निपत्य प्रहारक्षतसर्वाङ्गं तमेकं नृपं निजघ्नुः । ततः गृहीताभरणे दस्युसैन्ये प्रयाते सा राज्ञी वनगुल्मान्तरस्थिता भर्तारं निहतं दृष्ट्वा सुतया सह विह्वला पलायमाना अन्यद्दूरं गहनमरण्यं विवेश । तत्र मध्याह्नभानुतापितेषु अध्वगेषु शाखिनां छायासु निषण्णेषु एकदेशे कस्याचित् पद्मसरसस्तीरे अशोकतरुतले साराजमहिषी चन्द्रावती सुतया लावण्यवत्या नितरां श्रान्तया भयशोकव्याकुलया सह समुपाविशत् । तावदभ्यर्णनिवासी कोऽपि महामनुष्यः चण्डसिंहोनाम सपुत्रः अश्वारूढः मृगयार्थं तद्वनमभ्यागात् । सः सिंहपराक्रमं नाम पुत्रं तयोः राजभार्यासुतयोः पदपद्धती दृष्ट्वा प्रोवाच, पुत्र एते सुरेखे सुभगे पदपद्धती अनुसृत्य यदि स्त्रियौ आप्नुवः तदा तयोरेकां यथारुचि स्वीकुरुष्व । इत्युक्तवन्तं तं पुत्रः सिंहपराक्रमः प्रोवाच तात यस्याः सूक्ष्मौ पादौ रेखयानया दृश्येते सा भार्या ममैव प्रतिभाति । बृहती या पदपद्धतिः दृश्यते एषा ज्येष्ठवयाः तव योग्या । इति सूनोर्वचनमाकर्ण्य स चण्डसिंहस्तं जगाद पुत्रकैषा कथा तव; जननी तव प्रत्यक्षमेव दिवं गता तादृशे सुकळत्रे गते अन्यभोगवासनामेकैव, तदाकर्ण्य सोऽपि तं पितरमुवाच तात मैवम्, अभार्यं हि गृहपतेः गृहं शून्यं,एतत् पुत्रवचः श्रुत्वा स चण्डसिंहः तथेति प्रतिपद्य ससुतः तां पदपद्धतिं अनुसरन्

शनैर्ययौ। प्राप्य तत् सरस्स्थानं तां श्यामां चन्द्रावतीं राज्ञीं रूपलावण्यविभासिनीं ददर्श, उपाययौ च सकौतुकः सह पुत्रेण तां। सापि तं दृष्ट्वा चोरशङ्किनी वित्रस्ता समुत्तस्थौ, अलं त्रासेन नौ, एतौ चोरौ न, सौम्याकृती सुवेषाङ्कौ कौ चित् आखेटकृते नूनमिहायप्राप्तौ । इति सुतया बुद्धिमत्याभिहिता राज्ञी यावत् डोलायते तावदश्वावतीर्णश्चण्डसिंहः पुरोवर्ती तामुवाच सुन्दरि ! अलं संभ्रमेण, आवां इह मृगयार्थमागतौ, तद्विश्वस्य निराशङ्के वदतं के युवां कथं वा इह अमानुषे वने प्रविष्टेस्थः, इदं हि युवयोर्वपुः रत्नप्रासादवासार्हं, किमिति वराङ्गणविचरणयोग्यौ चरणौ कण्टकिनीमिमां भुवमवतारितौ, चित्रमिदं, एषायुवयोरानने वातोद्धूता धूळिरावयोर्मुखं हृतच्छायं कुरुते भवत्योरङ्गेऽस्मिन् चण्डांशोरुच्चण्डः किरणः पतन् अस्मान् दहति । तदात्मवृत्तान्तं ब्रूत, आवयोर्हृदयं भवत्यौ एतामवस्थां गते दृष्ट्वा भृशं दूयते । अस्मिन् श्वापदावृतेऽरण्ये वां स्थितिं द्रष्टुं नशक्नुवः, इति चण्डसिंहेनोक्ता राज्ञी निश्वस्य लज्जाशोकाकुला शनैः स्वं वृत्तान्तमवर्णयत् । ततश्चण्डसिंहः निस्वामिकां तां मत्वा समाश्वास्य च मधुरैर्वाक्यैरनुरञ्जयन् ससुतां स्वीचकार, सपुत्रीं तां पुत्रस्सः अश्वयोरारोप्य सर्वसमृद्धां निजां पुरीं निनाय । सापि जन्मान्तरगतेव अवशा अनाथा कृच्छ्रपतिता तदनुसरणं अङ्गीचकार किं करोतु तपस्विनी । ततस्तस्याः राज्ञ्याः सूक्ष्मपादत्वात् चण्डसिंहसुतः सिंहपराक्रमः राज्ञीं चन्द्रावतीं भार्यां व्यधात् । तत्सुतां च लावण्यवतीं राजकन्यां पादयोर्बृहत्वात् चण्डसिंहो भार्यां चकार । पूर्वप्रतिज्ञातं हि सत्यं कोऽतिवर्तते एवं पादविपर्यासात् तयोः पितापुत्रयोः ते दुहितामातरौ भार्ये तदा श्वश्रूस्नुषे जाते । कालेन च तयोः ताभ्यां पतिभ्यां द्वयोरेव पुत्रा दुहितरश्च क्रमात् जग्मिरे । इति कथामाख्याय स वेताळः तं नृपं पप्रच्छ राजन्! अनयोर्मातादुहित्रोस्ताभ्यां पितृभ्यां

पितापुत्राभ्यां ये सुताः जाताः ते अन्योन्यं किं सम्बन्धाः भवन्ति यदि राजन् न ब्रवीषि, तदा पूर्वोक्त एव स शापः स्मरणीयः । इति वेताळवचः समाकर्ण्य बहु विमृशन् राजा किमपि वक्तुमशक्नुवन् तूष्णीक एव प्रययौ । ततः स वेताळः तं प्रश्नोत्तरदाने असमर्थं दृष्ट्वा हृदि हसन् समचिन्तयत् अयं राजा अस्मिन् महाप्रश्ने उत्तरं दातुं नहिशक्नोति, तेन तूष्णीं व्रजत्येव, नचायं मां वञ्चयितुं शक्तः शापस्य प्रभावात् । तत्प्रीतोऽस्मि अस्य महासत्वस्य सत्वातिरेकेण, तदद्य तं दुरात्मानं वञ्चयित्वा उपागतां तत्सिद्धिं भाविकल्याणे अस्मिन् राजनि निवेशयामि । इत्यालोच्य स वेताळस्तं नृपमवदत्—राजन् ! कृष्णनिशाघोरेऽस्मिन् श्मशाने गतागतैः क्लिष्टस्त्वं सुखीव दृश्यसे । कोऽपि ते विकल्पो न विद्यते । तदाश्चर्येण धैर्येण च ते तुष्टोऽस्मि, त्वमिमं शवं नीत्वा इदानीं व्रज, अहमतोनिर्गच्छामि, इदं च तव हितं यत् वदामि तत् कुरुष्व । यदर्थे भवता एतत् नृकळेबरं नीयते, कुभिक्षुः सः अद्य मामाहूय अर्चयिष्यति । त्वा च उपहारीचिकीर्षुः भूमौ साष्टाङ्गप्रणामं कुरु इति वक्ष्यति । महाराज ! स दुरात्मा तावत् त्वया एवं वक्तव्यः, नाहं तथा प्रणामं जानामि, प्राक् त्वं दर्शय, ततोऽहं तथा करिष्यामीति । ततो निपत्य भूमौ यावत् स त्वां प्रणामं दर्शयिष्यति तावत्त्वमसिना तस्य शिरःच्छिन्द्याः । ततो विद्याधरैश्वर्य्यसिद्धिर्या तस्य वाञ्छिता, तां त्वमेव प्राप्स्यसि । अन्यथा तु सभिक्षुस्त्वामुपहारीकृत्य स्वेष्टसिद्धिं करिष्यति । एतदर्थं तव एतावान्विलम्बः कृतो मया तत्तेसिद्धिरस्तु गच्छेदानीं, इति उक्त्वा स वेताळः तस्य स्कन्धात् निर्गत्य प्रययौ । अथ स नरपतिः वेताळवचसा तं क्षान्तिशीलं भिक्षुं तथा स्वाहिताय समुद्यन्तं विचिन्त्य तत् नृकळेबरं गृहीत्वा प्रहृष्टः तत् वटतरुतलं प्रतस्थे ॥

(उपसंहारकथा) ।

ततः स राजा त्रिविक्रमसेनः शवं स्कन्धे वहन् क्षांतिशीलस्य श्रमणस्य पार्श्वं प्राप ददर्श च तं मार्गावलोकिनमेकं कृष्णपक्षरात्र्यां श्मशानतरुमध्यगं स राजा असृग्लिप्तस्थले, गैरेण अस्थिचूर्णेन निर्मिते विन्यस्तपूर्णशोणितकुम्भे, महातैलकृतप्रदीपे कृतानलहोमे संभृतोचितसंभारे, कृतेष्टदैवतपूजने मण्डले समुपविष्टं तमुपागात् । भिक्षुश्च तमानीतमृतकं नृपं समुत्थाय प्रोवाच, राजन् त्वया अन्यदुष्करोमहाननुग्रहो मे विहितः त्वादृशाः क्व क्वच इयं चेष्टा क्व चवा ईदृशौ देशकालौ सत्यमेव त्वां कुलभूभुजां मुख्यमाहुः एवमात्मानपेक्षेण येन परार्थः साध्यते एतदेव महतां महत्वमुच्यते प्रतिपन्नादचलनं प्राणानामत्ययेपि । इति ब्रुवन् स भिक्षुः सिद्धार्थमानीतस्य स्कन्धात् तं शवमवतारयामास । ततस्तं स्नापयित्वा बद्धमाल्यं विधाय तस्य मण्डलस्य अन्तःस्थापयामास । ततः भस्मालेपितगात्रः केशयज्ञोपवीती प्रावृतप्रेतवसनः भूत्वा क्षणं ध्याननिभृतः स्थितः अथ ध्यानबलात् तस्मिन् नृकलेबरे प्रविष्टं तं वेताळं स भिक्षुः क्रमेण पूजयामास । प्रथमं तस्मै कपालेन पात्रेण अर्घ्यं दत्वा ततः सुनिर्मलैः पुष्पादिभिः अर्चयित्वा पूजनं यथाविधि समाप्य पार्श्वगं राजानं प्रोवाच । राजन्! इहास्य मन्त्राधिराजस्य कृताविर्भावस्य अष्टाभिरङ्गैः निपत्य भूतले प्रणामं कुरु । येनाभीष्टसिद्धिं तेऽयं वरप्रदो दास्यति । श्रुत्वैतत् स्मृतवेताळवचनः स राजा तं भिक्षुमब्रवीत् । भगवन्! नाहं तादृशं प्रणामं वेद्मि तत्पूर्वं भवान् प्रदर्शयतु ततस्तथाहं करिष्ये इति । ततः स भिक्षुः यावत् तथा प्रणामम् दर्शयितुं भुवि पतितः तावत् स राजा खड्गप्रहारेणास्य शिरः अच्छिनत् । आकर्षचास्य हृत्पद्मं पाटितं ततः तच्छिरः तच्च हृत्पद्मं वेताळाय प्रददौ ततः समन्तोत् भूतगणैः हृष्टैः साधुवादे प्रदत्ते, स

वेताळः परितुष्टः तस्मात् नृकळेबरात् तं नृपमब्रवीत्, राजन्! भिक्षोरस्य यत् विद्याधरेन्द्रत्वं ईप्सितमासीत्, तत्तावत् भूमिसाम्राज्यभोगान्ते ते भविष्यति इत्युक्तवन्तं तं वेताळं स राजा प्रत्यवादीत्, योगीन्द्र त्वंचेत्प्रसन्नः तदा को नाम अभीष्टो वरः न सिद्ध्येत्। तथापि अमोघवचनं त्वां इदमभ्यर्थये, एताः नानाख्यानमनोरमाः प्रश्नकथाः भूतले ख्याताः पूजनीयाश्च भवन्तु। इति तेन राज्ञार्थितो वेताळः प्रत्यभाषत। राजन् एवमस्तु विशेषं च वच्मि श्रुणु। यः कथांशमात्रमपि सादरः कथयिष्यति वा श्रोष्यति, स सद्यो मुक्तपापो भविष्यति। यत्रैषा कथा कीर्त्यते तत्र यक्षराक्षसडाकिनी-वेताळकूश्माण्डराक्षसाद्यो न प्रभविष्यन्ति इत्युक्त्वा स वेताळः तस्मान्नृकळे-बरात् निर्गत्य यथारुचि योगमायया स्वं धाम प्रायात्। ततस्तत्र सर्वैर्देवगणैस्सह सः महेश्वरः परितुष्टः तत्राविरभूत्। प्रणतं च तं नृपमादिशत्। साधु वत्स! यत् त्वयायं विद्याधरमहाचक्रवर्तिताहठकामुकः कूटतापसः निहतः। त्वं मया स्वांशतः विक्रमादित्यः सृष्टः म्लेच्छरूपावतीर्णानां असुराणां शान्तये उद्दामदु-र्वृत्तानां दमनायच। अतः सद्वीपपाताळां महीं वशे स्थापयित्वा विद्याधराणां अधिराजो भविष्यसि। तत्र च चिरं दिव्यान् भोगान् भुक्त्वा स्वेच्छया च तान् त्यक्त्वा अन्ते ममैव सायुज्यं अवाप्स्यसि। एतं च अपराजितं नाम खड्गं मत्तो गृहाण। अस्यैव प्रसादात् यदुक्तं तत् सर्वं ते सेत्स्यति इत्युक्त्वा तं खड्गरत्नं तस्मै दत्वा वाक्पुष्पैश्च तेनार्चितः शंभुः देवैस्सह तिरोदधे॥

॥ इति वेताळकथास्समाप्ताः ॥

---

# CHAPTER X—*E*.

## ॥ सत्राजिच्चरित्रम् ॥

---

### पञ्चममञ्जरी ।

चन्द्रवंशे निघ्न इति कश्चन नृपः आसीत्। निघ्नस्य प्रसेनसत्राजितौ पुत्रौ बभूवतुः । तस्य सत्राजितः भगवानादित्यः सखाऽभवत् । एकदा त्वम्भोनीधितीरसंश्रयस्सूर्यं सत्राजित् तुष्टाव । तन्मनस्कतयाच भास्वानभिष्टूयमानोऽग्रतस्तस्थौ । ततस्त्वस्पष्टमूर्तिधरं चैनमालोक्य सत्राजित् सूर्यमाह यथैव व्योम्नि वह्निपिण्डोपमं त्वामहमपश्यं तथैवाद्याग्रतो गतमप्यत्र भगवता किंचिन्नप्रसादकृतं विशेषमुपलक्षयामीत्येवमुक्ते भगवता सूर्येण निजकण्ठादुन्मुच्य स्यमन्तको नाम महामणिवरः एकान्ते न्यस्तः । ततस्तमाताम्रोज्वलं ह्रस्ववपुषमीषदापिंगळनयनमादित्यमद्राक्षीत्। कृतप्राणिपातस्तवादिकं च स सत्राजितमाह। भगवानादित्यस्सहस्रदीधितिःवरमस्मत्तोऽभिमतं वृणीष्वेति। सच तदेव मणिरत्नमयाचत। सचापि तस्मै तद्दत्वा दीधितिपतिर्वियति स्वधिष्ण्यमारुरोह। सत्राजिदप्यमलमणिरत्नसनाथकण्ठतया सूर्य इव तेजोभिरशेषदिगन्तराण्युद्भासयन् द्वारकां विवेश। द्वारकावासी जनस्तु तमायान्तमवेक्ष्य भगवन्तमादिपुरुषं पुरुषोत्तममवनिभारावतरणायांशेन मानुषरूपधारिणं कृष्णं प्रणिपत्याह । भगवन्! भवन्तं द्रष्टुं नूनमयमादित्य आयातीत्युक्तो भगवानुवाच । (भगवान्) नायमादित्यः सत्राजित् आदित्यदत्तं स्यमन्तकाख्यं महामणिरत्नं बिभ्रदत्रोपयाति। तदेनं विस्रब्धाः पश्यतेत्युक्तास्ते तथैव ददृशुः । स च तं स्यमन्तकमणिमात्मनिवेशने चक्रे। प्रतिदिनं तन्मणिरत्नमष्टौ कनकभारान् स्रवति ।

तत्प्रभावाच्च सकलस्यैव राष्ट्रस्योपसर्गानावृष्टिव्याळाग्नितोयदुर्भिक्षादि भयं न भवति । अच्युतोपि तद्दिव्यं रत्नमुग्रसेनस्य भूपतेर्योग्यमेतदितिं इयेष । गोत्रभेदभयाच्छक्तोऽपि नजहार। सत्राजितोऽप्यच्युतो मामेतद्याचयिष्यतीत्यवगम्य रत्नलोभात् भ्रात्रे प्रसेनाय तद्रत्नमदात् । तच्च शुचिना ध्रियमाणमशेषमेव सुवर्णस्रवादिकं गुणजातमुत्पादयति । अन्यथा धारयन्तमेव हन्तीति अजानन्न-सावपि प्रसेनस्तेन कण्ठासक्तेन स्यमन्तकेनाश्वमारुह्याटव्यां मृगयामगच्छत् । तत्रच सिंहाद्वधमवाप। साश्वं च तं निहत्य सिंहोप्यमलमणिरत्नमास्याग्रेणादाय गन्तुमभ्युद्यतः ऋक्षाधिपतिना जांबवता दृष्टो घातितश्च। जांबवानप्यमलमणि-रत्नमादाय स्वबिलं प्रविवेश । सुकुमारसंज्ञाय बालकाय च क्रीडनकमकरोत् । अनागच्छति तस्मिन् प्रसेने कृष्णो मणिरत्नाभिलाषी जहार । नूनमेतदस्य कर्मेति अखिल एव यदुलोकः परस्परं मिथोऽकथयत् । विदितलोकापवाद-वृत्तान्तश्च भगवान् सर्वयदुसैन्यपरिवारपरिवृतः प्रसेनाश्वपदवीमनुसुसार। ददर्शचाश्वसमवेतं प्रसेनं सिंहेन विनिहतं, अखिलजनमध्ये सिंहपददर्शनकृत-परिशुद्धिः सिंहपदमनुससार । ऋक्षपतिनिहतं च सिंहमप्यल्पे भूमिभागे दृष्ट्वा ततश्च तद्रत्नगौरवादृक्षस्यापि पदान्यनुययौ । गिरितटे च सकलमेव तद्यदुसैन्य-मवस्थाप्य तत्पदानुसारी ऋक्षाबिलं प्रविवेश । अन्तःप्रविष्टश्च धात्र्याः सुकुमारकमुल्लालयन्त्याः वाणीं शुश्राव—

सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक मारोदीस्तव ह्येषस्स्यमन्तकः ॥

इत्याकर्ण्योपलब्धस्यमन्तकोऽन्तःप्रविष्टः कुमारक्रीडनकीकृतं च धात्र्या-हस्ते तेजोभिर्जाज्वल्यमानं स्यमन्तकं ददर्श । तं च स्यमन्तकाभिलषित

चक्षुषमपूर्वपुरुषमागतं समवेक्ष्य धात्री त्रायस्व त्रायस्वेति व्याजहार। तदार्तरव श्रवणानन्तरं चामर्षपूर्णहृदयः स जाम्बवानाजगाम । तयोश्च परस्परमुद्धतामर्षयोर्युद्धमेकविंशतिदिनान्यभवत् । ते च यदुसैनिकाः तत्र सप्ताष्टदिनानि तन्निष्क्रान्तिमुदीक्षमाणास्तस्थुः। अनिष्क्रमणे च मधुरिपुरसाववश्यमत्रबिलेऽत्यन्तं नाशमवाप्तोभविष्यत्यन्यथा तस्य जीवतः कथमेतावन्ति दिनानि शत्रुजये व्याक्षेपो भविष्यतीति कृताध्यवसायाः द्वारकामभ्येत्य हतः कृष्ण इति कथयामासुः। तद्बान्धवाश्च तत्कालोचितमखिलं उत्तरक्रियाकलापं चक्रुः, ततश्चास्य युध्यमानस्यातिश्रद्धादत्तविशिष्टोपपात्रयुक्तान्नतोयादिना श्रीकृष्णस्य बलप्राणपुष्टिरभूत् । इतरस्यानुदिनमतिगुरुपुरुषभेद्यमानस्य अतिनिष्ठुरप्रहारपातपीडिताखिलावयवस्य तस्य निराहारतया बलहानिरभूत्, निर्जितश्च भगवता जाम्बवान् प्रणिपत्य व्याजहार । सुरासुरगन्धर्वयक्षराक्षसादिभिरप्यखिलैर्भवान्नजेतुं शक्यः किमुतावनिगोचरैरल्पवीर्यैर्नरैः नरावयवभूतैश्च तिर्यग्योन्यनुसृतिभिः किं पुनरस्मद्विधैः अवश्यं भगवताऽस्मत्स्वामिना रामेणेव नारायणस्य सकलजगत्परायणस्यांशेन भगवता भवितव्यमित्युक्तस्तस्मै भगवानखिलावनीभारावतरणार्थमात्मनोऽवतरमाचचक्षे । प्रीत्यभिव्यंजितकरतलस्पर्शनेन चैनमपगतयुद्धखेदं चकार । स च प्रणिपत्य पुनरप्येनं प्रसाद्य जांबवतीं नाम कन्यां गृहागतायार्ध्यभूतां ग्राहयामास । स्यमन्तकमणिरत्नमपि प्रणिपत्य तस्मै ददौ । अच्युतोऽप्यतिप्रणतात्तस्मादग्राह्यमपि तन्माणिरत्नमात्मसंशोधनाय जग्राह। सः जांबवत्या सह द्वारकामाजगाम । भगवदागमनोद्भूतहर्षोत्कर्षस्य द्वारकावासिजनस्य कृष्णावलोकनात्तत्क्षणमेव महान्प्रमोदस्समजनि । दिष्ट्यादिष्ट्येति सकलयादवाः स्त्रियश्च सभाजयामासुः । भगवानपि यथानुभूतमशेषं यादवसमाजे यथावदाचचक्षे । स्यमन्तकं च सत्राजिते दत्वा मिथ्याभिशस्तिपरिशुद्धिमवाप ।

जांब्रवतीं चान्तःपुरे निवेशयामास। सत्राजिदपि मयस्मिन्नभूतमलिनमारोपितमिति जातसन्त्रासः स्वसुतां सत्यभामां भगवते भार्यार्थं ददौ। ततः सानुरागस्मितेक्षणः, श्रीवत्सवक्षाः, विलसत्कौस्तुभाबद्धकन्धरः, पृथुदीर्घबाहुः, अरुणाम्बुजलोचनः, वनमाली, स्फुरन्मकरकुण्डलः मत्तमृगेन्द्रोदारविक्रमः, पीताम्बरधरः, श्रियःपतिः, भगवान्, कृष्णः, सर्वाभरणभूषितां, सर्वाङ्गसुन्दरीं सत्यभामां परिणीय सुतरां मुमुदे ॥

इति सत्राजिच्चरित्रं समाप्तम् ।

CHAPTER X—*F*.

# ॥ प्रह्लादचरित्रम् ॥

षष्ठमञ्जरी ।

अथैकदा भुवनत्रयं चरन्तः सनकादिमहर्षयः यदृच्छया श्रीवैकुण्ठं जग्मुः । तत्र जयविजयौ द्वारपालौ तान् पञ्चषवर्षान् नग्नान् शिशून् मत्वा न्यरुन्धाताम्। तदा ते क्रुद्धास्सन्तः शेपुः। हे द्वारपालौ! युवां अत्र वासं कर्तुम् नार्हथः । अतः पापिष्ठां आसुरीं योनिं यातम्। एवं शप्तौ तौ तत्स्थानात्पतन्तौ सन्तौ पुनरपि सानुनयं प्रार्थितैः तैः कृपालुभिर्महर्षिभिः पुनः अवाचिषाताम्। युवां त्रिभिर्जन्मभिः स्वपदं पुनरपि प्राप्नुतम्। इति तौ दितेः पुत्रौ हिरण्यकशिपुहिरण्याक्षौ जातौ । तयोः वराहरूपेण भगवता हिरण्याक्षो हतः । हिरण्यकशिपुस्तु भ्रातृवधेन अतितप्तः सन्दष्टाधरोष्ठः कोपोज्वलद्भ्यां चक्षुर्भ्यां धूम्रमम्बरं निरीक्षमाणः करालदंष्ट्रः सः सदसि शूलमुद्यम्य दानवानिदमब्रवीत्। भोभो दानवदैतेयाः! सर्वे यूयं मद्वचः श्रुणुत, तथैव शीघ्रं क्रियतां, मम शत्रुभिर्देवैश्च हरिणा मे भ्राता घातितः, तस्य मायावराहस्य मच्छूलभिन्नग्रीवस्य मद्भ्रातृघातकस्य हरेः रुधिरेणाहं यदा भ्रातरं तर्पयिष्ये, तदा गतदुःखः स्याम् । तस्मिन् हरौ नष्टे सति विष्णुप्राणाः सर्वे देवाः विनाशम् प्राप्स्यन्त्येव। अतो यावदहं भ्रातरं तर्पयिष्ये तावद्यूयं भुवं यात । तत्र तपोयज्ञादियुतान् द्विजान् विहत, एवं कृते द्विजक्रियामूलो धर्ममयो विष्णुर्नश्येत् तस्माद्यत्रयत्र द्विजा गावो देवा वर्णाश्रमधर्माः विलसन्ति तं तं देशं दहत। इति प्रभोराज्ञां श्रुत्वा ते दैत्याः तथा प्रजानां नाशं चक्रुः । केचित् पुरग्रामादीन्

अदहन् । केचित् कुद्दालादिभिः गोपुरप्राकारादीनि बिभिदुः । केचित् परशुभिः वृक्षान् चिच्छिदुः । एवं दैत्यैरुपद्रुते लोके देवा दिवं त्यक्त्वा गुप्ताः सन्तः भुवि चेरुः । हिरण्यकशिपुः मृतस्य भ्रातुः और्ध्वदैहिकीं क्रियां कृत्वा तस्य शकुनिशंबरकालनाभादीन् पुत्रान् तत्पत्नीं रुषाभानुं जननीं दितिं च मधुरया वाण्या सान्त्वयन् जगाद । (हिरण्यकशिपुः) । हेमातः! हेवधूः! हेपुत्राः! यूयं वीरं हिरण्याक्षं माशोचत। शूराणां रणे वधः इष्ट एव। इह जगति प्राचीनकर्मणा संयोजितानां वियोजितानां सङ्गमः प्रपायामिवास्ति । आत्मातु शुद्धो अव्ययो नित्यश्चास्ति । तस्य अविद्याकृतः शरीरोपाधिकः संसारो भवति । यथा चञ्चलेन प्रवाहोदकेन तीरस्था वृक्षा अपि चञ्चला इव दृश्यन्ते, तथात्रिभिर्गुणैर्मनसि भ्राम्यमाणे सति परिपूर्णोऽपि पुरुषः तत्साम्यं प्राप्नोति। एवं दैत्यपतेः वाक्यं सस्नुषा दितिः श्रुत्वा पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तं दधार । एवं स्थिते हिरण्यकशिपुः आत्मानमजेयमजरामरं शत्रुहीनं कर्तुमैच्छत् । स ऊर्ध्वबाहुः नभोदृष्टिः पादाङ्गुष्ठेन पृथिवीमाश्रितस्सन् मन्दराचले तीव्रं तपस्तेपे । बहुकालकृतेनतपसा तस्य मूर्ध्नः सधूमोऽग्निः समुत्तस्थौ । तेन त्रैलोक्यं तेपे । समुद्राः चुक्षुभिरे। द्वीपपर्वतैस्सह भूः चेले । दिशो जज्वलुः । ग्रहताराः अपप्तन् । तेनाग्निना तप्ता देवा दिवं त्यक्त्वा ब्रह्मलोकं गत्वा धात्रे विज्ञापयामासुः । हे देव! हिरण्यकशिपुतपसा तप्तावयं स्वर्गे स्थातुं नशक्नुमः । तीव्रंतपःकुर्वतस्तस्यायं सङ्कल्पः, असुरान् स्वर्गे देवान् नरके च स्थापयित्वा जगति धर्माधर्मस्थितिं वैपरीत्येन करिष्यामि इति, एवं त्वत्पदग्रहणेऽपि तस्य सङ्कल्पं वयं शुश्रुम । अतोऽत्र यद्योग्यं तद्विचार्यताम् एवं देवैर्विज्ञापितो ब्रह्मा भृगुदक्षादिभिस्सह तस्याश्रमं ययौ । तत्र वल्मीकतृणकीचकैर्गुप्तं तं प्रथमं न ददर्श पश्चात्पिपीलिकाभिः भक्षितमेदस्त्वङ्मांसशोणितं

तं दैत्यं कथञ्चिदालक्ष्य विस्मितस्सन्प्रहस्य जगाद । (ब्रह्मा ।) हे काश्यप ! त्वं उत्तिष्ठोत्तिष्ठ । त्वं तपसा सिद्धोऽसि, अहं वरदः प्राप्तोऽस्मि । अतः अभीष्टं वरं वृणु । हे दितिनन्दन ! तपोनिष्ठेन त्वया जितोऽहं, मद्दर्शनं ते निष्फलं न भविष्यति । एवमुक्त्वा ब्रह्मा कमण्डलुजलेन पिपीलिकादिभिर्भक्षिताङ्गं तं प्रोक्षितवान् । ततः सः सर्वावयवसंपन्नो युवा तप्तसुवर्णसदृशः वल्मीकात् समुत्थितस्सन् आकाशे स्थितं ब्रह्माणं दृष्ट्वा शिरसा भूमौ ननाम। ततः उत्थाय हर्षाश्रुपूर्णाक्षः कृताञ्जलिस्सन् गद्गदया गिरा तुष्टाव । (हिरण्यकशिपुः) य इदं सर्वं जगत् त्वमेव सृजसि पासि नाशयसिच । तस्मै तुभ्यं नमः, हे विभो ! अनन्त ! येन त्वया अव्यक्तरूपेण इदं विश्वं व्याप्तं, तस्मै अचिन्त्यैश्वर्याय ते नमः, हे वरदोत्तम ! त्वं मे यदि ईप्सितान् वरान् दास्यसि तर्हि त्वत्सृष्टेभ्यः भूतेभ्यो मृत्युर्मे माभूत्। तथा अन्तः बहिः दिवा, नक्तं आयुधैः भूमौ आकाशे मनुष्यैः मृगैः सप्राणैः अप्राणैः सुरासुरमहोरगैश्च मे मृत्युर्माभूत् । युद्धे अप्रतिद्वंद्वतां देहिनां एकाधिपत्यं मे देहि, इति । (ब्रह्मा ।) हे तात ! यद्यपीमे वराः लोकानां दुर्लभाः तथापि तांस्ते ददामि । इत्युक्त्वा ब्रह्मा वरान् दत्वा तेन पूजितस्सन् सत्यलोकं जगाम । एवं प्राप्तवरो दैत्यः सुवर्णमयं शरीरं बिभ्रन् भ्रातुर्वधं स्मरन् भगवति द्वेषं चकार । ततो लोकत्रयं देवासुर-मनुष्येन्द्रान् गन्धर्वादींश्च जित्वा लोकपालानां स्थानानिच तेजसा सह जहार । देवोद्यानशोभायुक्तं स्वर्गमध्यगात् यत्र, प्रवाळानां मालाः, वैदूर्याणां स्तंभपङ्क्तयः, मुक्तासमूहयुक्तानि वितानानि, पयःफेननिभाः शय्याः स्वर्णमयाः परिच्छदाश्च सन्ति तस्मिन् महेन्द्रभवने सुरादिभिर्वन्दितचरणः स हिरण्यकशिपूरेमे, । मद्येन मत्तं तं हिरण्यकशिपुं ब्रह्मविष्णुरुद्रैर्विना इन्द्रादयो देवाः उपायनयुक्त-हस्ताः उपासत । तस्योग्रदण्डेन इन्द्रादयो अष्टौ दिक्पालाः उद्विग्नास्सन्तः अच्युतं

हरिं शरणं जग्मुः । यत्र सर्वदुःखहर्ता हरिरस्ति यत्र च ज्ञानिनो गत्वा न निवर्तन्ते तस्यै दिशो नमोऽस्तु । एवमेकाग्रबुद्ध्या गतनिद्राः वायुभोजनास्ते देवा हरिं तुष्टुवुः । (हरिः ।) यदाऽसौ देववेदगोविप्रसाधुधर्मेषु मयि च द्वेषं करिष्यति, तदा शीघ्रं नङ्क्ष्यति । तत्रापि निर्वैराय शान्ताय स्वसुताय मद्भक्ताय प्रह्लादाय यदा द्रुह्येत् तदा प्राप्तवरमपि तं हनिष्यामि इति नारायणस्य उक्तिं निशम्य प्रणम्यच तं दैत्यं हतं मेनिरे । एवं स्थिते तस्य दैत्यपतेः चत्वारः पुत्रा आसन् । तेषु प्रह्लादो वयसा कनिष्ठोऽपि गुणैर्महानासीत् । यः ब्रह्मण्यः सत्यप्रतिज्ञः सर्वप्रियः जितेन्द्रियः, यस्मात् ज्ञानिनोऽपि सद्गुणान् गृह्णन्ति, शत्रवोऽपि विद्वत्सभायां यं प्रह्लादं दृष्टान्तं कुर्वन्ति, यस्य वासुदेवे भगवति अविच्छिन्ना भक्तिर्विद्यते, यो बालोऽपि त्यक्तक्रीडनकस्सन् भगवदेक-चित्तत्वेन जगदपि न वेद, यः आसीनः पर्यटन् शयानः प्रपिबन्नपि भगवदा-सक्तचेतास्सन् तानि कर्माणि नानुसंधत्ते, क्वचित् भगवत्सेवालाभेन रोदिति, क्वचित् गोविन्दाद्भुतकर्मणा हसति, क्वचित् कमलापतिगुणान् गायति, क्वचि-द्विलज्जस्सन् नृत्यति, क्वचित् भगवदानन्देन निमीलितेक्षणः तूष्णीमास्ते। एवं प्रह्लादो भगवद्भक्त्या आत्मनः सुखं विस्तारयन् अन्यस्यापि मनसः शान्तिं चकार । तदा असुरैः पौरोहित्याय शुक्रो वृतः। तस्य पुत्रौ चण्डामर्कौ राजगृहसमीपे न्यवात्ताम्। तौ राज्ञा प्रापितं प्रह्लादं अन्यान् दैत्यबालकान्प्रति राजनीत्यादीन् पाठयामासतुः। ताभ्यां प्रोक्तं शास्त्रं प्रह्लादः अध्यैष्ट, परन्तु मनसा तत्साधु न मेने । एकदा हिरण्यकशिपुः पुत्रं प्रह्लादमङ्कमारोप्य पप्रच्छ । हे वत्स ! त्वं यत्साधु मन्यसे तत्कथय इति। (प्रह्लादः) हे दैत्यश्रेष्ठ ! आत्मनोऽधःपातनिमित्तमोहप्रापकं गृहं हित्वा वनं गतस्सन् हरिमाश्रयेतेति यत् तत्साधु मन्ये । हिरण्यकशिपुः पुत्रगिरः श्रुत्वा प्रहसन् गुरू जगाद । अस्य बुद्धिः

वेषान्तरेण गुप्तैः भगवद्भक्तैः यथा न भिद्येत तथा भवद्भ्यां स्वगृहे बालस्य रक्षणं कार्यम्। ततो दैत्यगुरू प्रह्लादं गृहमानीय प्रशस्य तं पप्रच्छतुः। हे प्रह्लाद! सत्यं कथय, बालानतिक्रम्य ते बुद्धिविपर्ययः कुतो जातः? ईदृशबुद्धिभेदः परकृतस्स्वतएव वा जातः। (प्रह्लादः) यदा हरिरनुकूलस्स्यात् तदा पुंसां स्वः परः इति भेदबुद्धिर्नश्यति। यं ज्ञातुं प्रवृत्ता ब्रह्मादयोऽपि मुह्यन्ति, सः श्रियः-पतिः मे बुद्धिं विकासयति यथा लोहचुम्बकस्य सान्निध्यात् लोहं भ्रमति तथा चक्रपाणेः सन्निधौ मे चेतो भ्राम्यति। एवमुक्त्वा विरराम। तदा तयोरेकः कुपितस्सन् तं निर्भर्त्स्य जगाद। अस्माकमयशस्करोऽयं दुर्बुद्धिर्दण्डयोग्योऽस्ति। दैत्यरूपे चन्दनवनेऽयं कण्टकवृक्षो जातः। दैत्यवनमूलच्छेदने परशुस्थानीयस्य विष्णोरयं दण्डरूपः सहकारी जातः। एवं तं भीषयन् धर्मार्थकाम-प्रतिपादकं शास्त्रमध्यापयामास। ततो गुरुरेनं अधीतविद्यं ज्ञात्वा मात्रा वस्त्रा-लङ्कारादिभूषितं बालं दैत्येन्द्रं दर्शयामास। ततो हिरण्यकशिपुः पादयोः पतितं बालमालिङ्ग्यानन्दं प्राप। ततोङ्कमारोप्य मूर्ध्न्यवघ्राय प्रेम्णा पप्रच्छ। (हिरण्य-कशिपुः) पुत्र! एतावता कालेन गुरोर्यत्त्वया स्वधीतं तदुच्यताम्। (प्रह्लादः) हे तात! विष्णोः श्रवणं कीर्तनं स्मरणं पादसेवनं अर्चनं वन्दनं दास्यं सख्यं स्वदेहसमर्पणं, इति नवविधभक्तिः विष्णावर्पितैव सती क्रियतेचेत्तर्हि तदुत्तममधीतं मन्ये। एवं पुत्रवचः श्रुत्वा क्रोधेन स्फुरिताधरो हिरण्यकशिपुः गुरु-पुत्रं जगाद हे ब्राह्मणाधम! एतत्त्वया किं कृतं। हे दुर्मते! मामनादृत्य पुत्रोऽसारं किमिति ग्राहितः। अस्मिन् लोके कपटवेषधारिणः असाधवो बहवस्सन्ति। तेषां मनसि स्थितं दुर्जनत्वं कालान्तरे उदयं प्राप्नोति। (गुरुपुत्रः ब्रूते) हे इन्द्रशत्रो! तव पुत्रः मत्कथितं परकथितं च न वदति। अस्येयं स्वाभाविकी बुद्धिः। अतो मयि क्रोधं माकार्षीः। एवं गुरुभाषणं श्रुत्वा असुरः पुत्रं जगाद। हे सुत!

इयं ते बुद्धिर्गुरुवाक्यजनिता नचेत्तर्हि कुतः प्राप्ता ? हे पितः ! विषयासक्तानां पुंसां श्रीकृष्णे बुद्धिः परतः स्वतोवा अन्योन्यतोवा नोत्पद्यते । विषयासक्तैः गुरुभिः शिक्षिताः ये विषयिणस्ते साधुगृह्यं विष्णुं न जानन्ति । यथा अन्धैः नीयमानाः अन्धाः पन्थानं न जानन्ति तद्वत् । यावत्साधूनां चरणरजोऽभिषेकं जनाः न प्राप्नुवन्ति, तावत्तेषां कृष्णे मतिर्नोपजायते । इत्युक्त्वोपरतं प्रह्लादं हिरण्यकशिपुः क्रोधेन स्वोत्सङ्गान्महीतले विसृज्य, राक्षसानुवाचच । हे राक्षसाः ! अयं जाल्मः वध्यतां नगरान्निस्सार्यतां वा, यो हिरण्याक्षहन्तुः विष्णोः पादौ दासवत्पूजयति । योऽयं पञ्चवर्षोऽपि बालकः आवयोः पित्रोः सौहृदं जहौ । शत्रुरपि हितकृच्चेत्तर्हि सुतो ज्ञेयः । स्वदेहजोऽपि पुत्रो हितकृन्नोचेत्तर्हि रोगवद्वातुको ज्ञेयः । यतो देहावयवोऽपि हस्तादिः सर्पदंशादिना दूषितश्चेत्तर्हि छेद्यः, येन विना शेषं शरीरं सुखं जीवति । अतोऽयं भोजनशयनासनादिषु बहुभिरुपायैर्हन्तव्यः । एवं भर्त्राज्ञापितास्ते राक्षसाः नदन्तः च्छिन्द्धि भिन्धीति वादिनस्सन्तः आसीनं प्रह्लादं शूलैः सर्वमर्मसु जघ्नुः । तथापि महाभागवते भगवच्चरणारविन्दार्पिताचित्ते तस्मिन्प्रह्लादे तेषां प्रहाराः निष्फलाः आसन् । किङ्कराणां प्रयासे व्यर्थे सति क्रूरकर्माणस्सेवकाः हिरण्यकशिपोराज्ञया दिग्गजैः पर्वतपातनैः शम्बरनिर्मितमायाभिः विषदानैः उपोषणैः अग्निदाहाद्युपायैः निष्पापं सुतं हन्तुं यदा न शेकुः, तदा स दीर्घां चिन्तां प्राप्तस्सन्नाह—अयं मे समीपे वसन् बालोऽपि शत्रुत्वं न विस्मरति, अयममरोऽस्ति किम् ? अस्य विरोधेन मे मृत्युर्भविष्यति किम् ? इति चिन्तयन्तमधोमुखं हिरण्यकशिपुं चण्डामर्कावेकान्ते ऊचतुः । हे नाथ ! त्वयैकेन जगत्त्रयं जितमस्ति । तस्य तव चिन्त्यं किमपि न पश्यामः । अतः शिशोर्गुणदोषौ न चिन्तनीयौ । राजा तथेत्युक्त्वा जगाद — अस्य राज्ञां धर्माः उपदेष्टव्या इति । तदा गुरू धर्मार्थकामप्रतिपादकं शास्त्रं

दैत्यबालकैः सह तमध्यापयामासतुः । प्रह्लादस्तद्गुरुशिक्षितं साधु न मेने । यदा आचार्यो गृहकर्मसु गतः तदा प्राप्तावसरैः बालकैः क्रीडार्थमाहूतः प्रह्लादस्स्वयमेव कृपया तानाहूय जगाद । ते बालाः प्रह्लादस्य गुरुत्वात्त्यक्तक्रीडास्सन्तः तं पर्युपासत । ततो महाभागवतो दयाळुः प्रह्लादस्तानाह । (प्रह्लादः) हे बालकाः ! प्राज्ञः पुरुषः कौमार एव भगवद्धर्मानाचरेत् । संसारं प्राप्तः पुमान् यावच्छरीरं न नश्येत् तावत् क्षेमाय यत्नं कुर्यात् । पुंसः वर्षशतं आयुः तस्यार्धं रात्रौ निद्रया निष्फलं गच्छति । मूढस्य बाल्ये कौमारेच क्रीडतः सतः विंशतिः समाः यान्ति । जरया ग्रस्तदेहस्य विंशतिहायनानि यान्ति । शेषं दुष्पूरेण कामेन मोहेन च गृहे सक्तस्य गच्छति । यतः स दुरन्तमोहः पुरुषः कुटुम्बपोषणार्थं क्षीयमाणं स्वकीयमायुः विहतं पुरुषार्थंच न मन्यते । तस्मात् हे दैत्यबालकाः ! विषयात्मकेषु दैत्येषु सङ्गं त्यक्त्वा श्रियःपतिं नारायणं शरणमधिगच्छत । यतः स नारायण एव शरण्यः तस्माद्यूयमासुरं भावं विसृज्य सर्वभूतेषु दयां सौहृदं च कुरुत,यया दयया हरिस्तुष्येत् । भगवत्संस्मरणमेव संसारानिवर्तकं मोक्षप्रदं च बुधाः विदुः । अतो हृदये ईश्वरं भजध्वम् । असुराणां हरिभजने अनधिकार इति न वाच्यम् । यतः देवो वा मनुष्यो वा असुरो वा यः कोऽप्यस्तु, सः मुकुन्दचरणकमलभजनं कुर्वन् स्वास्तिमान् स्यात् । एवं उपदिष्टास्सन्तः दैत्यसुताः प्रह्लादवाक्यमेव जगृहुः, गुरुशिक्षितं नैव जगृहुः । ततः आचार्यसुतः प्रह्लादवचनश्रवणेन दैत्यबालानां विष्णौ विवर्धमानां भक्तिं दृष्ट्वा भीतस्सन् शीघ्रं राज्ञे न्यवेदयत् । दैत्यस्तद्विप्रियं श्रुत्वा क्रोधावेशेन चलद्गात्रः पुत्रं प्रह्लादं हन्तुं मनो दधे । तदा कठोरवाण्या शशाप । पादाहतस्सर्प इव श्वसन् जनकः बद्धाञ्जलिं पुत्रं जगाद । हे दुरात्मन् ! मच्छासनपराङ्मुखं त्वामद्य यमालयं नेष्यामि । यस्य मम क्रोधात् त्रयो लोकाः

कम्पन्ते तस्य मे शासनं कस्य बलेन त्वं त्यक्तवान्? तदुच्यतां। (प्रह्लादः) श्रीभगवच्चरणारविन्दभजनमेव मम बलं नान्यत्। (हिरण्यकशिपुः)। मन्दात्मन्! मर्तुकामोऽसि । यतस्त्वममर्यादं विकत्थसे । मरणोन्मुखानां अनन्विता वाचः स्युः । हे मूढ! त्वया मदन्यो यो जगदीश्वरः उक्तः सः क्वास्ति। (प्रह्लादः) स सर्वत्रास्ति । (हिरण्यकशिपुः) यदिसर्वत्रास्ति तर्हि एतस्मिन् स्तम्भे कस्मान्न· दृश्यते। प्रह्लादस्तदा तं स्तम्भं निरीक्ष्य प्रणमन्नाह दृश्यत इति। हिरण्यकशिपुस्त मपश्यन्नाह । विपरीतं ब्रुवाणस्य तव शिरो हरामि। त्वां हरिरद्य रक्षतु । एवं दुरुक्तैस्सुतं पीडयन् सन् खड्गं प्रगृह्य सिंहासनादुत्पत्य स्वमुष्टिना स्तम्भं प्रजहार। ततस्तम्भे भीषणश्शब्दो जातः । तं श्रुत्वा ब्रह्मादयः स्वस्थाननाशं मेनिरे । पुत्रवधेप्सुर्दैत्यः सभामध्ये नादं श्रुत्वा तस्याश्रयं न ददर्श । येन नादेन सर्वे दैत्याः त्रासं प्रापुः । तदा भगवान् भक्तभाषणं धातुर्वरञ्च सत्यं कर्तुं अद्भुतं मृगमानुषरूपम् धारयन् सभायां स्तम्भं विदार्याऽदृश्यत । स दैत्यः स्तम्भमध्यात् निर्गतं नृमृगेन्द्रयोर्मिश्रं रूपं दृष्ट्वा नायं मृगो नापि नरः अहो किमेतदिति विचारं अकरोत् । एवं भयानकं तन्नृसिंहरूपं मीमांसमानस्य तस्याग्रतो नृसिंहरूपो हरिः प्रादुरभूत्। तदा तप्तसुवर्णलोचनं जृम्भिताननं कराळदंष्ट्रं क्षुरधारावत् तीक्ष्णजिह्वं शङ्कुवदूर्ध्वकर्णं गिरिगुहावत् व्यात्तमुखं दिविस्पृक्कायं, ह्रस्वग्रीवं विशालवक्षस्थलं कृशोदरं नखायुधं चन्द्रकिरण-वद्गौरैः रोमभिर्व्याप्तं ईदृशं नृसिंहं दृष्ट्वा जगाद । अहो महामायिना हरिणायं मम वधोपयो निश्चितः । एवं ब्रुवन् दैत्यकुञ्जरो नृसिंहमभ्यपतत्। तदा सं नृसिंहतेजांसि दिनदीपवन्न ददृशे। ततो दैत्यो रुषा गदया नृसिंहं जघान। तदा नृसिंहेन गरुडेन पन्नग इव स दैत्यो गृहीतः, कथमपि हस्ताद्विनिस्सृतः। तदा हरिरुच्चस्वरेण अट्टहासं कृत्वा मीलिताक्षं दैत्यं गृहीत्वा सर्पः आखुमिव सभायां

द्वार्यूरौ निपात्य तस्य हृदयं सन्ध्यायां नखैर्विददार । तदा गजवधेन सिंह इव क्रोधावेशेन दुष्प्रेक्षनेत्रो हरिः स्वजिह्वया मुखप्रान्तौ विलिहन् आन्त्रमाली असृग्लवाक्तारुणकेसराननो बभूव । ततो मृतं दैत्यं विसृज्य धृतायुधान् सहस्रशस्तस्यानुचरान् नखायुधैरवधीत् । तदा तस्य सटाभिः कम्पिताः मेघा व्यशीर्यन्त । तद्दृष्ट्या ग्रहा निष्प्रभा अभवन् । श्वासहतास्समुद्राः चुक्षुभुः । तत्पादपीडिता मही चचाल । तस्य वेगेन शैलाः उत्पेतुः । तत्तेजसा खं दिशो न रेजिरे । ततः सभायां नृपासने स्थितं उपसंहृततेजसमपि विभुं श्रियःपतिम् भयात्कोऽपि नादर्शत् । तदा हरिणा त्रिलोकशत्रुं हतं दृष्ट्वा हर्षिताः सुरस्त्रियः पुष्पैर्हरिं ववृषुः । विमानपङ्क्तिभिराकाशं व्याप्त-मासीत् । देवैर्वादिताः दुन्दुभयो नेदुः । गन्धर्वाः जगुः । अप्सरसो ननृतुः । तदा ब्रह्मेन्द्रादिदेवाः ऋषयश्च बद्धाञ्जलिपुटाः दूरादेव नृहरिं पृथक् पृथक् तुष्टुवुः । (ब्रह्मा) हे भगवन्! अनन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे ते नमोऽस्तु । (श्रीरुद्रः) हे भगवन्! ते कोपकालः युगान्तोऽस्ति, अयन्तु अल्पो दैत्यो हतः । तस्मात् तत्सुतं स्वभक्तं पाहि । (पितरः) अस्माकं पुत्रादिभिः श्रद्धया दत्तानि पिण्डतिलोदकादीनि यो बलवद्बुभुजे । तस्य निहन्त्रे परमपुरुषाय ते नमः । एवं दूरतः स्थित्वा स्तुवन्तः ब्रह्माद्याः देवाः तत्समीपं गन्तुं नाशकन् । तदा देवैर्नमस्कृता प्रेषिता लक्ष्मीस्तदद्भुतं रूपं दृष्ट्वा शङ्कितासती समीपं न जगाम । ततो ब्रह्मा भगवत्समीपे स्थितं विनीतं बद्धाञ्जलिं प्रह्लादं जगाद— हे वत्स ! तव पित्रे कुपितं प्रभुं प्रशमय । इत्युक्त्वा तं देवसमीपं प्रेषयामास । प्रह्लादस्तथेत्युक्त्वा शनैस्समीपं गत्वा कृताञ्जलिस्सन् भुवि साष्टाङ्गपातं प्रणनाम । नृहरिः स्वपादमूले पतितं आनन्दाश्रुपरिपूर्णनयनं बालं विलोक्य कृपया तमुत्थाप्य तन्मस्तके कराम्बुजं निदधौ । तदा भगवत्करस्पर्शात् गतसर्वपापः

प्राप्तज्ञानः पुलकाङ्किततनुः अश्रुलोचनः तच्चरणकमलं हृदये दधौ । ततः एकाग्रमनसा तन्न्यस्तहृदयेक्षणः प्रेमगद्गदया वाचा हरिं तुष्टाव । (प्रह्लादः) ब्रह्मादयः सुरगणाः बहुभिर्ज्ञानादिगुणैरपि यमाराधयितुमशक्ताः स हरिः असुरजातेः मम कथं सन्तोषं प्राप्तुमर्हति । तपश्शान्तिप्रतापादिगुणाः ईश्वराराधनाय न भवन्तीत्येवमहं मन्ये । यतः केवलभक्त्यैव हरिर्गजेन्द्राय तुष्टोऽभूत् । समस्तगुणयुक्तादपि भगवच्चरणारविन्दभक्तिरहितात् विप्रात् भक्तियुक्तं चण्डालमपि श्रेष्ठमहं मन्ये । हे हृषीकेश ! अस्मादतिभयंकरादपि ते रूपात् अहं न बिभेमि । कदानु खलु प्रीतस्सन् तव चरणकमलसेवायै आह्वयसि । हे सर्वोत्तम ! त्वत्कथामृतमग्नचित्तोऽहं वैतरणीसकाशान्न बिभेमि । किन्तु त्वत्कथाविमुखान् मूढान् जनान् शोचामि । अस्य जनस्य त्वत्तोऽन्यं रक्षकमहं न पश्यामि । अतः प्राक् प्रार्थितं त्वच्चरणारविन्ददास्यमेव देहि । एवं प्रह्लादेन स्तुतः प्रीतो नृसिंहः शान्तक्रोधस्सन् तमभाषत । (श्रीभगवान् ।) हे प्रह्लाद ! भद्रमस्तु, अहं ते प्रीतोऽस्मि, त्वमभीष्टं वरं वृणीष्व, अभक्तस्य मद्दर्शनं दुर्लभं, लोके देही मां दृष्ट्वा पुनरपूर्णकामत्वेन शोचितुं नार्हति । (प्रह्लादः ।) तद्वरप्रदानादिकं भक्तियोगस्य विघ्नकरं ज्ञात्वा नृसिंहं प्रत्याह । हे नृहरे ! अहं मुमुक्षुस्त्वामुपाश्रितः । अतो मां वरैर्मास्मप्रलोभयः । हे भगवन् ! त्वं भक्तलक्षणपरीक्षार्थं संसारबीजेषु कामेषु भक्तं योजयसि । यः सेवकः त्वत्तः कामान् वाञ्छति स सेवको न, किन्तु वणिक् । यः स्वामी भृत्यात्सेवामिच्छन् तस्मै धनादि ददाति, स स्वाम्यपि नहि, किन्तु व्यापारी । अहं निष्कामस्त्वद्भक्तः, त्वं च मत्सेवाभिलाषरहितः स्वामी । अतः आवयोः राजसेवकयोरिव प्रयोजनं नास्ति । हे वरदर्षभ ! यदि मे वरान् दास्यसि तर्हि मम हृदि कामानामनुत्पत्तिं भवतो वरं वृणे । कामोत्पत्त्या सत्यधर्मादिगुणाः नश्यन्ति ।

(श्रीभगवान् ।) हे प्रह्लाद ! त्वया कृतमिदं स्तोत्रं त्वां च मांच मच्चरितं च यः स्मरति कीर्तयेत्, सः कर्मबन्धान्मुच्यते । (प्रह्लादः ।) हे हरे ! मम पिता तवैश्वरं तेजोऽजानन् त्वामनिन्दत्, हिरण्याक्षवधात् त्वयि द्वेषकर्ता मयि च द्रोहकर्ता स मे पिता पूतो भवतु । इममन्यं वरं वृणे । (हरिः) वत्स ! तव पितैकविंशत्या पितृभिस्सह पूतः, यतस्तस्य कुले महाभागवतोत्तमस्त्वं जातः । अतो मद्भक्तानां मध्ये त्वं श्रेष्ठोऽसि । हे वत्स ! मदङ्गस्पर्शनेन पूतस्य तव पितुः प्रेतकार्याणि त्वं कुरु । पितुः सिंहासनञ्चातिष्ठ । ततो मत्परस्सन् कर्माणि कुरु । ततः प्रह्लादः भगवदादेशेन पितुरौर्ध्वदैहिकं चक्रे । सकलवेदवेदाङ्गतत्त्वज्ञैः द्विजवरैः सः भगवद्भक्तः प्रह्लादः राज्येऽभिषिक्तः । तदानीं ब्रह्मादिदेवैरभिपूजितो हरिः तत्रैवान्तर्दधे । ततः प्रह्लादः ब्रह्मरुद्रादिदेवान् संपूज्य ववन्दे । ततो ब्रह्मा शुक्रादिभिर्मुनिभिः दैत्यदानवानां पतिं प्रह्लादं चकार । ततो ब्रह्मादयो देवाः प्रह्लादायाशिषो दत्वा तेन पूजितास्सन्तः स्वधामानि ययुः । प्रह्लादोऽपि चिरं महीम् नीत्या परिपाल्य अन्ते श्रीभगवच्चरणारविन्दं प्राप । यः एतां नृसिंहलीलां हिरण्यकशिपुवधं प्रह्लादचरितं च पठति सः वैकुण्ठं प्राप्नोति । तस्य सर्वभद्रमपि स्यात् ॥

॥ इति प्रह्लादचरितं समाप्तम् ॥

---

CHAPTER XI—*A.*

# ॥ गृध्रजम्बुकसंवादः ॥

---

प्रथममञ्जरी ।

श्रुणु राजन् यथावृत्तं इतिहासं पुरातनम् ।
गृध्रजम्बुकसंवादं योवृत्तो नैमिशे पुरा ॥ १ ॥

कस्यचिद्ब्राह्मणस्यासीत् दुःखलब्धस्सुतो मृतः ।
बाल एव विशालाक्षो बालग्रहनिपीडितः ॥ २ ॥

दुःखिताः केचिदादाय बालमप्राप्तयौवनम् ।
कुलसर्वस्वभूतं वै रुदन्तश्शोकविह्वलाः ॥ ३ ॥

बालं मृतं गृहीत्वाथ श्मशानाभिमुखास्स्थिताः ।
अङ्केनैवच संगृह्य रुरुदुर्भृशदुःखिताः ॥ ४ ॥

शोचन्तस्तस्य पूर्वोक्तान् भाषितांश्चासकृत्पुनः ।
तं बालं भूतले क्षिप्य प्रतिगन्तुं नशक्नुयुः ॥ ५ ॥

तेषां रुदितशब्देन गृध्रोऽभ्येत्य वचोब्रवीत् ।

गृध्रः—

एकात्मजमिमम् लोके त्यक्त्वा गच्छत माचिरं ।
इह पुंसां सहस्राणि स्त्रीसहस्राणि चैव हि ॥ ६ ॥

समानीतानि कालेन हित्वा वै यान्ति बान्धवाः ।
संपश्यत जगत्सर्वं सुखदुःखैरधिष्ठितम् ॥ ७ ॥

संयोगो विप्रयोगश्च पर्यायेणोपलभ्यते ।
गृहीत्वा ये च गच्छन्ति ये तु यान्ति च तान् मृतान् ॥ ८ ॥

तेष्वायुषः प्रमाणेन स्वेन गच्छन्ति जन्तवः ।
अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसंकुले ॥ ९ ॥

कङ्कालबहुळे रौद्रे सर्वप्राणिभयङ्करे ।
न पुनर्जीवितः कश्चित् कालधर्ममुपागतः ॥ १० ॥

प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ।
सर्वेण खलु मर्तव्यं मर्त्यलोके प्रसूयता ॥ ११ ॥

कृतान्तविहिते मार्गे मृतं को जीवयिष्यति ।
कर्मान्तविरते लोके अस्तं गच्छति भास्करः ॥ १२ ॥

गम्यतां स्वमधिष्ठानं सुतस्नेहं विसृज्य वै ।
ततो गृध्रवचश्श्रुत्वा प्राक्रोशन्तस्तदा वने ॥ १३ ॥

बान्धवास्तेष्यगच्छंस्तं पुत्रमुत्सृज्य भूतले ।
विनिश्चित्य तदा सर्वे विक्रोशन्त इतस्ततः ॥ १४ ॥

मृतमित्येव गच्छन्तो निराशास्तस्य दर्शने ।
निश्चितार्थांश्च ते सर्वे सन्त्यजन्तस्स्वमात्मजम् ॥ १५ ॥

निराशा जीविते तस्य मार्गमावृत्य संस्थिताः ।
अत्रान्तरे नीलवर्णः बिलान्निस्सृत्य जम्बुकः ॥ १६ ॥

गच्छमानांश्च तानाह निघृणाः खलु बान्धवाः ।

जम्बुकः—

नादित्योयं स्थितो मूढाः, स्नेहं कुरुत माभयम् ॥ १७ ॥

बहुरूपो मुहूर्तश्च जीवत्यपि कदाचन ।
यूयं भूमौ विनिक्षिप्य पुत्रस्नेहविनाकृताः ॥ १८ ॥

श्मशाने सुतमुत्सृज्य कस्माद्गच्छत निर्घृणाः ।
नवोऽस्त्यस्मिन् सुते स्नेहः यादृशः पशुपक्षिणां ॥ १९ ॥

तादृशस्नेहमालम्ब्य तिष्ठेयुर्भुविमानवाः ।
इमं कुलकरं पुत्रम् त्यक्त्वा क्वनु गमिष्यथ ॥ २० ॥

चिरं मुञ्चत बाष्पं च चिरं स्नेहेन पश्यत ।
एवं विधानि हीष्टानि दुस्त्यजानि विशेषतः ॥ २१ ॥

सर्वस्य दयिताः प्राणाः सर्वस्स्नेहं च विन्दति ।
तिर्यग्योनिष्वपि सतां स्नेहं पश्यत यादृशम् ॥ २२ ॥

त्यक्त्वा कथं गच्छथेमं पद्मलोलायतेक्षणम् ।
यदा नवोद्वाहकृतं स्नानमाल्यविभूषितम् ॥ २३ ॥

जम्बुकस्य वचश्श्रुत्वा कृपणं परिदेवतः ।
न्यवर्तन्त तदा सर्वे शवार्थं ते स्म मानुषाः ॥ २४ ॥

एतस्मिन्नंतरे गृध्रः समागत्य वचोऽब्रवीत् ।

गृध्रः —

अहो बत नृशंसेन जम्बुकेनाल्पबुद्धिना ।
क्षुद्रेणोक्ता हीनसत्वा मानुषाः किं निवर्तथ ॥ २५ ॥

पञ्चभूतपरित्यक्तं शून्यं काष्ठत्वमागतम् ।
कस्माच्छोचथ तिष्ठन्तं आत्मानं किं न शोचथ ॥ २६ ॥

तपः कुरुत वै तीव्रं मुच्यध्वं येन किल्बिषात् ।
तपसा लभ्यते सर्वं विलापः किं करिष्यति ॥ २७ ॥

न कर्मणा पितुः पुत्रः पिता वा पुत्रकर्मणा ।
मार्गेणान्येन गच्छन्ति बद्धास्सुकृतदुष्कृतैः २८ ॥

शोकं त्यजत वै दैन्यं सुतस्नेहविनाकृताः ।
त्यज्यतामयमाकाशे ततश्शीघ्रं निवर्तथ ॥ २९ ॥

यत्करोति शुभं कर्म तथा कर्म सुदारुणम् ।
तत्कर्तैव समश्नाति बान्धवानां किमत्रहा ॥ ३० ॥

इह त्यक्त्वा न तिष्ठन्ति बान्धवा बान्धवं प्रियं ।
स्नेहमुत्सृज्य गच्छन्ति बाष्पपूर्णाकुलेक्षणाः ॥ ३१ ॥

प्राज्ञो वा यदि वा मूर्खः सधनो निर्धनोपि वा ।
सर्वः कालवशं याति शुभाशुभसमन्वितः ॥ ३२ ॥

किं करिष्यथ शोचित्वा मृतं किमनुशोचथ ।
सर्वस्यहि प्रभुः कालः धर्मतस्समदर्शनः ॥ ३३ ॥

यौवनस्थांश्च बालांश्च वृद्धान् गर्भगतानपि ।
सर्वानाविशते मृत्युः, एवं भूतं इदं जगत् ॥ ३४ ॥

अद्य वर्षसहस्रं मे साग्रं जातस्य मानुषाः ।
न च पश्यामि जीवन्तं मृतं स्त्रीपुन्नपुंसकम् ॥ ३५ ॥

मृता गर्भेषु जायन्ते जातमात्रा म्रियन्ति च ।
सङ्क्रमन्तो म्रियन्ते च यौवनस्थास्तथापरे ॥ ३६ ॥

इष्टदारवियुक्ताश्च पुत्रशोकान्वितास्तथा ।
दह्यमानास्तु शोकेन गृहं गच्छन्ति नित्यशः ॥ ३७ ॥

त्यज्यतामेषनिस्तेजाः शून्यः काष्टत्वमागतः ।
अन्यदेहविषक्तोयं तस्मात् गच्छथ मानुषाः ॥ ३८ ॥

चक्षुर्भ्यां न च कर्णाभ्यां संश्रृणोति समीक्षते ।
तस्मादेनं समुत्सृज्य गृहान् गच्छत माचिरं ॥ ३९ ॥

मृतस्योत्सृष्टदेहस्य पुनर्देहो न विद्यते ।
शक्यं जीवयितुं नायं बालो वर्षशतैरपि ॥ ४० ॥

अयं प्रेतसमाकीर्णः यक्षराक्षससेवितः ।
दारुणः काननोद्देशः कैशिकैरभिनादितः ॥ ४१ ॥

अस्मिन् शवं परित्यज्य प्रेतकार्याण्युपासत ।
गृध्रस्य वचनं श्रुत्वा जम्बुको वाक्यमब्रवीत् ॥ ४२ ॥

जम्बुकः—

अहो मन्दीकृतस्नेहो गृध्रेणेहाल्पमेधसा ।
पुत्रस्नेहाभिभूतानां युष्माकं शोचतां भृशम् ॥ ४३ ॥

अद्य शोकं विजानमि मानुषाणां महीतले ।
स्नेहं हि कारणं कृत्वा ममाप्यश्रूण्यथापतत् ॥ ४४ ॥

अनिर्वेदस्सदाकार्यः निर्वेदाच्च कुतस्सुखं ।
प्रयत्नात्प्राप्यते ह्यर्थः तस्माद्गच्छथ निर्दयाः ॥ ४५ ॥

इमं कनकवर्णाभं भूषणैस्समलङ्कृतम् ।
गृध्रवाक्यात् कथं पुत्रं त्यजध्वं पितृपिण्डदं ॥ ४६ ॥

श्रूयते शम्बुके शूद्रे हते ब्राह्मणदारकः ।
जीवितो धर्ममासाद्य रामात्सत्यपराक्रमात् ॥ ४७ ॥

तदा श्वेतस्य राजर्षेः बालो दिष्टान्तमागतः ।
श्वेतेन धर्मनिष्ठेन मृतस्सञ्जीवितः पुनः ॥ ४८ ॥

तथा कश्चिद्भवेत्सिद्धः मुनिर्वा देवतापिवा ।
कृपणानामनुक्रोशं कुर्याद्यो रुदतामिह ॥ ४९ ॥

इत्युक्तास्तेन्यवर्तन्त शोकार्ताः पुत्रवत्सलाः ।
अङ्के शिरस्समाधाय रुरुदुः बहुशश्चिरं ॥ ५० ॥

स्थीयतां नेह भेत्तव्यम् यावत्तपति भास्करः ।
तावदस्मिन् सुते स्नेहात् अनिर्विण्णा भवन्त्विह ॥ ५१ ॥

गृध्रश्च जम्बुकश्चैव स्वकार्यनिरतौ तदा ।
मृतस्य तं परिजनं ऊचतुस्तौ क्षुधान्वितौ ॥ ५२ ॥

तयोर्विज्ञानविदुषोः द्वयोर्मृगपतत्रिणोः ।
वाक्यैरमृतकल्पैस्तैः प्रतिष्ठन्ति व्रजन्ति च ॥ ५३ ॥

तथा तयोर्विवदतोः विज्ञानविदुषोर्द्वयोः ।
बान्धवानां स्थितानां चाप्युपातिष्ठत शङ्करः ॥ ५४ ॥

देव्या प्रचोदितो देवः कारुण्यार्द्रीकृतेक्षणः ।
ततस्तानाह मनुजान् वरदोऽस्मीति शङ्करः ॥ ५५ ॥

ते प्रत्यूचुरिदं वाक्यं दुःखिताः प्रणताः स्थिताः ।
एकपुत्रविहीनानां सर्वेषां जीविताथिनाम् ॥ ५६ ॥

पुत्रस्य नोर्जीवदानात् जीवितं दातुमर्हति ।
एवमुक्तस्स भगवान् वारिपूर्णेन चक्षुषा ॥ ५७ ॥

जीवितं च कुमाराय प्रादात् वर्षशतानिच ।
तदा गोमायुगृध्राभ्यां प्राददत्क्षुद्विनाशनम् ॥ ५८ ॥

वरं पिनाकी भगवान् सर्वभूतहिते रतः ।
ततः प्रणम्य ते देवं सर्वे हर्षसमन्विताः ॥ ५९ ॥

कृतकृत्याः सुखं हृष्टाः प्रातिष्ठन्त तदा नराः ।
महादेवप्रसादाच्च क्षिप्रं फलमवाप्यते ॥ ६० ॥

पश्यताल्पेन कालेन निश्चयान्वेषणेन च ।
प्रसादं शङ्करात्प्राप्य दुःखिताः सुखमाप्नुवन् ॥ ६१ ॥

ते विस्मिताः प्रहृष्टाश्च पुत्रसञ्जीवनात्पुनः ।
बभूवुर्मुदितास्सर्वे प्रसादात् शङ्करस्यच ॥ ६२ ॥

ततस्ते त्वरितास्सर्वे त्यक्त्वा शोकं शिशूद्भवम् ।
विविशुः पुत्रमादाय नगरं हृष्टमानसाः ॥ ६३ ॥

शङ्करस्तु वरं दत्वा पार्वतीसहितस्तदा ।
कैलासमगमच्छीघ्रं भक्तरक्षणलोलुपः ॥ ६४ ॥

इति गृध्रजम्बुकसंवादस्समाप्तः ।

## CHAPTER XI—*B.*

# ॥ शकुन्तलोपाख्यानम् ॥

द्वितीयमञ्जरी ।

दुष्यन्तो नाम राजर्षिः चन्द्रवंशसमुद्भवः ।
वनं जगाम गहनं प्रभूतबलवाहनः ॥ १ ॥

आसीज्जनमहाशब्दः तस्मिन् गच्छति पार्थिवे ।
ददृशुस्तं स्त्रियस्तत्र शूरमात्मयशस्करम् ॥ २ ॥

शक्रोपममभित्रघ्नं परवारणवारणम् ।
पश्यन्तः स्त्रीगणास्तत्र वज्रपाणिं स्म मेनिरे ॥ ३ ॥

स प्रविश्य वनं घोरं मृगयासक्तमानसः ।
मृगान् विव्याध सुबहून् प्रवृद्ध इव केसरी ॥ ४ ॥

मालिनीमभितो रम्यां नदीं पुण्यां सुखोदकाम् ।
तत्र व्याळमृगान् सौम्यान् पश्यन् प्रीतिमवाप सः ॥ ५ ॥

तस्यास्तीरे भगवतः काश्यपस्य महात्मनः ।
आश्रमप्रवरं रम्यं महर्षिगणसेवितम् ॥ ६ ॥

चकाराभिप्रवेशाय मतिं स नृपतिस्तदा ।
अतीव गुणसंपन्नं अनिर्देश्यं च वर्चसा ॥ ७ ॥

महर्षिं काश्यपं द्रष्टुं अथ कण्वं तपोधनम् ।
ध्वजिनीमश्वसंबाधां पदातिगजसंकुलाम् ॥ ८ ॥

अवस्थाप्य वनद्वारि सेनामिदमुवाच सः ।
मुनिं विरजसं द्रष्टुं गमिष्यामि तपोधनम् ॥ ९ ॥

काश्यपं स्थीयतामत्र यावदागमनं मम ।
तद्वनं नन्दनप्रख्यं आसाद्य मनुजेश्वरः ॥ १० ॥

क्षुत्पिपासे जहौ राजा मुदं चावाप पुष्कलाम् ।
सामात्यो राजलिङ्गानि सोऽपनीय नराधिपः ॥ ११ ॥

पुरोहितसहायश्च जगामाश्रममुत्तम् ।
ततोऽगच्छन्महाबाहुः एको भृत्यान् विसृज्य तान् ॥ १२ ॥

नापश्यच्चाश्रमे तस्मिन् तमृषिं शंसितव्रतम् ।
सोऽपश्यमानस्तमृषिं शून्यं दृष्ट्वा तदाश्रमम् ॥ १३ ॥

उवाच क इहेत्युच्चैः वनं सन्नादयन्निव ।
श्रुत्वाथ तस्य तं शब्दं कन्या श्रीरिव रूपिणी ॥ १४ ॥

निश्चक्रामाश्रमात्तस्मात् तापसी वेषधारिणी ।
सा तं दृष्ट्वैव राजानं दुष्यन्तमसितेक्षणा ॥ १५ ॥

स्वागतं त इति क्षिप्रं उवाच प्रतिपूज्य च ।
आसनेनार्चयित्वा च पाद्येनार्घ्येन चैवहि ॥ १६ ॥

पप्रच्छानामयं साध्वी कुशलं च नराधिपम् ।
उवाच स्मयमानेव किं कार्यं क्रियतामिति ॥ १७ ॥

तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम् ।
दृष्ट्वा चैवानवद्यांगीं यथाविधि सुपूजितः ॥ १८ ॥

आगतोऽहं महाभागं ऋषिं कण्वमुपासितुम् ।
क्वगतो भगवान् भद्रे तन्ममाचक्ष्व शोभने ॥ १९ ॥

नृपस्य वचनं श्रुत्वा प्रत्युवाच शकुन्तळा ।
गतः पिता मे भगवान् फलान्याहर्तुमाश्रमात् ॥ २० ॥

मुहूर्तं संप्रतीक्षस्व द्रष्टास्येनमुपासितुम् ।
अपश्यमानस्तमृषिं तथाचोक्तस्तया च सः ॥ २१ ॥

तां दृष्ट्वाच वरारोहां श्रीमतीं चारुहासिनीम् ।
विभ्राजमानां वपुषा तपसा च दमेनच ॥ २२ ॥

रूपयौवनसंपन्नां इत्युवाच महीपतिः ।
का त्वं कस्यासि तन्वंगि किमर्थं चागता वनम् ॥ २३ ॥

एवं रूपगुणोपेता कुतस्त्वमसि शोभने ।
दर्शनादेवहि शुभे त्वयामेऽपहृतं मनः ॥ २४ ॥

इच्छामि त्वामहं ज्ञातुं तन्ममाचक्ष्व शोभने ।
एवमुक्ता तु सा कन्या तेन राज्ञा तमाश्रमे ॥ २५ ॥

उवाच हसती वाक्यं इदं सुमधुराक्षरम् ।
कण्वस्याहं भगवतो सुप्रिया दुहिता मता ॥ २६ ॥

शकुन्तळावचश्श्रुत्वा दुष्यन्तो वाक्यमब्रवीत् ।
ऊर्ध्वरेता महाभागः भगवान् लोकपूजितः ॥ २७ ॥

चलेद्धि वृत्ताद्धर्मोऽपि न चलेत् शंसितव्रतः ।
कथं त्वं तस्य दुहिता सम्मता वरवर्णिनि ॥ २८ ॥

संशयो मे महानत्र तन्मे च्छेत्तुमिहार्हसि ।
इति तस्य वचश्श्रुत्वा प्राह तन्वी सुलोचना ॥ २९ ॥

यथायमागमो मह्यं यथा चेदमभूत्पुरा ।
शृणु राजन् यथातत्वं यथास्मि दुहिता मुनेः ॥ ३० ॥

ऋषिः कश्चिदिहागम्य मम जन्माचोदयत् ।
तस्मै प्रोवाच भगवान् यथा तच्छृणु पार्थिव ॥ ३१ ॥

विश्वामित्रो महातेजाः तपस्तेपे सुदारुणम् ।
भीतः पुरन्दरस्तस्मात् मेनकामिदमब्रवीत् ॥ ३२ ॥

श्रेयो मे कुरु कल्याणि यथा वक्ष्यामि तच्छृणु ।
असावादित्यसंकाशः विश्वामित्रो महातपाः ॥ ३३ ॥

स मां न च्यावयेत् स्थानात् तं वै गत्वा प्रलोभय ।
इन्द्रस्य वचनं श्रुत्वा मेनका वाक्यमब्रवीत् ॥ ३४ ॥

विश्वामित्रो महातेजाः शपेदिति मतिर्मम ।
त्वमप्युद्विजसे यस्य नोद्विजेयं अहं कथम् ॥ ३५ ॥

शक्रेण चोदिता बाला प्रतस्थे कौशिकाश्रमम् ।
अथापश्यद्वरारोहा विश्वामित्रं महामुनिम् ॥ ३६ ॥

अभिवाद्य तपोभीता प्राक्रीडदृषिसन्निधौ ।
तस्या रूपगुणान् दृष्ट्वा सतुविप्रर्षभस्तथा ॥ ३७ ॥

चकार भावं संसर्गात् तया कामवशं गतः ।
न्यमन्त्रयत सोऽप्येनां साचाप्यैच्छदृषिं तदा ॥ ३८ ॥

तौ तत्र सुचिरं कालं उभौ व्यहरतां तदा ।
जनयामास मुनिः मेनकायां शकुन्तलाम् ॥ ३९ ॥

प्रस्थे हिमवतो रम्ये मालिनीपरिशोभिते ।
जातमुत्सृज्य तं गर्भं मेनका मालिनीमनु ॥ ४० ॥

कृतकार्या ततस्तूर्णमगच्छच्छक्रसंसदम् ।
तं वने विजने गर्भं सिंहव्याघ्रसमाकुले ॥ ४१ ॥

दृष्ट्वा शयानं शकुनाः समन्तात्पर्यवारयन् ।
नेमां हिंस्युर्वने बालाः क्रव्यादाः मांसगृद्धिनः ॥ ४२ ॥

पर्यरक्षंश्च तांस्तत्र शकुन्ताः मेनकात्मजाम् ।
उपस्प्रष्टुं गतश्चाहं अपश्यं शयितामिमाम् ॥ ४३ ॥

निर्जने विपिने रम्ये शकुन्तैः परिवारिताम् ।
आनयित्वा ततश्चैनां दुहितृत्वे न्यवेशयम् ॥ ४४ ॥

शरीरकृत् प्राणदाता यस्यचान्नानि भुञ्जते ।
क्रमेणैते त्रयोप्युक्ताः पितरो धर्मशासने ॥ ४५ ॥

निर्जने तु वने यस्मात् शकुन्तैः परिवारिता ।
शकुन्तळेति नामास्याः कृतं चापि ततो मया ॥ ४६ ॥

एवं दुहितरं विद्धि मम विप्र शकुन्तळाम् ।
शकुन्तळापि पितरं मन्यते मां अनिंदिता ॥ ४७ ॥

इति ब्रुवाणे जनके तस्याहं पार्श्वतः स्थिता ।
सुतां कण्वस्य मामेवं विद्धि त्वं मनुजाधिप ॥ ४८ ॥

कण्वं हि पितरं मन्ये पितरं स्वमजानती ।
इति ते कथितं राजन् यथावृत्तं श्रुतं मया ॥ ४९ ॥

इति तस्या वचश्श्रुत्वा नृपो वाक्यमभाषत ।
सुव्यक्तं राजपुत्रीत्वं यथा कल्याणि भाषसे ॥ ५० ॥

भार्या मे भव तन्वङ्गि ब्रूहि किं करवाणि ते ।
गान्धर्वेण च मां भीरु विवाहेनैव सुंदरि ॥ ५१ ॥

शकुन्तळा तस्य वचः श्रुत्वा वाक्यमभाषत ।
फलाहारी गतो राजन् पिता मे इत आश्रमात् ॥ ५२ ॥

मुहूर्तं संप्रतीक्षस्व स मां तुभ्यं प्रदास्यति ।
अपिचा मयि चोत्पन्नं पुत्रं राज्येऽभिषेचय ॥ ५३ ॥

इति तस्या वचश्श्रुत्वा दुष्यन्त इदमब्रवीत् ।
तथैवेति प्रतिश्रुत्य जग्राह विधिवत्करं ॥ ५४ ॥

तया सङ्गम्य कुतुकी विश्वास्यैनां ययौ पुरं ।
तस्मिन्मुहूर्ते याते तु कण्वोऽप्याश्रममागमत् ॥ ५५ ॥

शकुन्तळा च पितरं ह्रिया नोपजगाम तम् ।
विज्ञायाथ च तां कण्वः दिव्येन स्वेन चक्षुषा ॥ ५६ ॥

उवाच भगवान् प्रीतः अन्तर्वत्नीं सुतां मुनिः ।
त्वयाद्य भद्रे रहसि मामनादृत्य यः कृतः ॥ ५७ ॥

पुंसा सह समायोगः न स धर्मोपघातकः ।
कस्यचित्त्वथ कालस्य प्रासूत तनयं वने ॥ ५८ ॥

ततस्सभगवान् कण्वः षड्वर्षेण सुतेन च ।
शिष्यैस्तां प्रेषयामास दुष्यन्तनगरं प्रति ॥ ५९ ॥

शिष्यास्तां तु समानीय दुष्यन्ते विनिवेद्यच ।
पुनर्जग्मुः काश्यपस्य पर्णशालां दृढव्रताः ॥ ६० ॥

पूजयित्वा यथान्यायं पतिमाह शकुन्तळा ।
अयं पुत्रस्त्वया राजन् यौवराज्येऽभिषिच्यताम् ॥ ६१ ॥

त्वयाह्ययं सुतो राजन् मय्युत्पन्नस्सुरोपमः ।
सोऽथ श्रुत्वैव तद्वाक्यं तस्या राजा स्मरन्नपि ॥ ६२ ॥

अब्रवीन्नस्मरामीति कस्य त्वं दुष्टतापसि ।
गच्छ वा तिष्ठ वा कामं यद्वापीच्छसि तत्कुरु ॥ ६३ ॥

सा मुहूर्तमिव ध्यात्वा दुःखामर्षसमन्विता ।
भर्तारमभिसंप्रेक्ष्य क्रुद्धा वचनमब्रवीत् ॥ ६४ ॥

जानन्नपि महाराज कस्मादेवं प्रभाषसे ।
न जानामीति निश्शङ्कं यथान्यः प्राकृतो जनः ॥ ६५ ॥

अत्र ते हृदयं वेद सत्यस्यैवानृतस्यच ।
कल्याणं वद निश्चित्य मात्मानमवमन्यथाः ॥ ६६ ॥

मन्यते पापकं कृत्वा नकश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥ ६७ ॥

स्वयं प्राप्तेति मामेवं मावमंस्थाः पतिव्रताम् ।
अर्चार्हां नार्चयसि मां स्वयं भार्यामुपस्थिताम् ॥ ६८ ॥

यदि मे याचमानायाः वचनं न करिष्यसि ।
दुष्यन्त शतधा मूर्ध्ना ततस्तेद्य स्फुटिष्यति ॥ ६९ ॥

पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः ।
तस्मात्पुत्र इति प्रोक्तस्स्वयमेव स्वयंभुवा ॥ ७० ॥

सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ ७१ ॥

अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमस्सखा ।
भार्या मूलं त्रिवर्गस्य भार्या मूलं तरिष्यतः ॥ ७२ ॥

भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः ।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः ॥ ७३ ॥

सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥ ७४ ॥

कान्तारेष्वपि विश्रामः जनस्याध्वनिकस्य वै ।
यस्सदारः स विश्वास्यः तस्माद्दाराः परागतिः ॥ ७५ ॥

संसरन्तमपि प्रेतं विषमेष्वेकपातिनम् ।
भार्यैवान्वेति भर्तारं सततं या पतिव्रता ॥ ७६ ॥

प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते ।
पूर्वं मृतं च भर्तारं पश्चात्साध्व्यनुगच्छति ॥ ७७ ॥

एतस्मात्कारणाद्राजन् पाणिग्रहणमिष्यते ।
यदाप्नोति पतिर्भार्यां इह लोके परत्रच ॥ ७८ ॥

आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः ।
तस्माद्भार्यां नरः पश्येत् मातृवत्पुत्रमातुरम् ॥ ७९ ॥

भार्यायां जनितं पुत्रं आदर्शेष्विव चाननम् ।
ह्लादते जनिता प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत् ॥ ८० ॥

दह्यमाना मनोदुःखैः व्याधिभिश्चातुरा नराः ।
ह्लादन्ते स्वेषु दारेषु घर्मार्तास्सलिलेष्विव ॥ ८१ ॥

सुसंरब्धोऽपि रामाणां नकुर्यादप्रियं नरः ।
रतिं प्रीतिं च धर्मं च तास्वायत्तमवेक्ष्यहि ॥ ८२ ॥

प्रतिपद्य पदा सूनुः धरणीरेणुकुण्ठितः ।
पितुराश्लिष्यतेंगानि किमस्त्यभ्यधिकं ततः ॥ ८३ ॥

स त्वं स्वयमभिप्राप्तं साभिलाषमिमं सुतं ।
प्रेक्षमाणं कटाक्षेण किमर्थमवमन्यसे ॥ ८४ ॥

अण्डानि बिभ्रति स्वानि न भिन्दन्ति पिपीलिकाः ।
न भरेथाः कथंनु त्वं धर्मज्ञस्सन् स्वमात्मजम् ॥ ८५ ॥

न वाससां न रामाणां नापां स्पर्शस्तथाविधः ।
शिशोरालिंग्यमानस्य स्पर्शस्सूनोर्यथा सुखः ॥ ८६ ॥

ब्राह्मणो द्विपदां श्रेष्ठः गौर्वरिष्ठा चतुष्पदां ।
गुरुर्गरीयसां श्रेष्ठः पुत्रस्स्पर्शवतां वरः ॥ ८७ ॥

स्पृशतु त्वां समाश्लिष्य पुत्रोऽयं प्रियदर्शनः ।
पुत्रस्पर्शात्सुखकरः स्पर्शो लोके न विद्यते ॥ ८८ ॥

त्रिषु वर्षेषु पूर्णेषु प्रजाताहं अरिन्दम ।
इमं कुमारं राजेन्द्र तव शोकविनाशनम् ॥ ८९ ॥

आहर्ता वाजिमेधस्य शतसंख्यस्य पौरव ।
इति वागन्तरिक्षे मां सूतकेऽभ्यवदत्पुरा ॥ ९० ॥

ननु नामाङ्कमारोप्य स्नेहाद्ग्रामान्तरं गताः ।
मूर्ध्नि पुत्रानुपादाय प्रतिनन्दन्ति मानवाः ॥ ९१ ॥

वेदेष्वपि वदन्तीमं मन्त्रग्रामं द्विजातयः ।
जातकर्मणि पुत्राणां तवापि विदितं तथा ॥ ९२ ॥

अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि सजीवशरदश्शतम् ॥ ९३ ॥

जीवितं त्वदधीनं मे सन्तानमपि चाक्षयम् ।
तस्मात्त्वं जीव मे पुत्र सुसुखी शरदां शतम् ॥ ९४ ॥

त्वदङ्गेभ्यः प्रसूतोयम् पुरुषात्पुरुषोपरः
सरसीवामलेन्मानं द्वितीयं पश्य वै सुतम् ॥ ९५ ॥

यदाह्यावहनीयोग्निः गार्हपत्यात्प्रणीयते ।
तथा त्वत्तः प्रसूतोऽयं त्वमेकस्सन् द्विधाकृतः ॥ ९६ ॥

मृगावकृष्टेन पुरा मृगयां परिधावता ।
अहमासादिता राजन् कुमारी पितुराश्रमे ॥ ९७ ॥

किं नु कर्माशुभं पूर्वं कृतवत्यन्यजन्मानि ।
यदहं बान्धवैस्त्यक्ता बाल्ये संप्रति च त्वया ॥ ९८ ॥

कामं त्वया परित्यक्ता गमिष्यामि स्वमाश्रमम् ।
इमन्तु बालं सन्त्यक्तुं नार्हस्यात्मजमात्मनः ॥ ९९ ॥

इत्युक्तस्स नृपो धीमान् इदं वचनमब्रवीत् ।
न पुत्रमभिजानामि त्वयि जातं शकुन्तळे ॥ १०० ॥

असत्यवचना नार्यः कस्ते श्रद्धास्यते वचः ।
मेनकाप्सरसां श्रेष्ठा महर्षीणां पिता च ते ॥ १०१ ॥

तयोरपत्यं कस्मात्त्वं पुंश्चलीव प्रभाषसे ।
अश्रद्धेयमिदं वाक्यं कथयन्ती न लज्जसे ॥ १०२ ॥

विशेषतो मत्सकाशे दुष्टतापसि गम्यताम् ।
क्व महर्षिस्सचैवाग्र्यः साप्सराः क्व च मेनका ॥ १०३ ॥

क्व च त्वमेवं कृपणा तापसीवेषधारिणी ।
अतिकायश्च ते पुत्रः बालोऽतिबलवानयम् ॥ १०४ ॥

कथमल्पेन कालेन सालस्तम्भ इवोद्गतः ।
सर्वमेतत्परोक्षं मे यत्त्वं वदसि तापसि ॥ १०५ ॥

नाहं त्वामभिजानामि यथेष्टं गम्यतां त्वया ।
क्षिताक्टासि राजेन्द्र अन्तरिक्षे चराम्यहम् ॥ १०६ ॥

आवयोरन्तरं पश्य मेरुसर्षपयोरिव ।
स्वयमुत्पाद्य सदृशं पुत्रं वै योऽवमन्यते ॥ १०७ ॥

तस्य देवाः श्रियं घ्नन्ति नच लोकानुपाश्नुते ।
स त्वं नृपतिशार्दूल पुत्रं न त्यक्तुमर्हसि ॥ १०८ ॥

आत्मानं सत्यधर्मौ च पालयन् पृथिवीपते ।
नरेन्द्रसिंह कपटं न वोढुं त्वमिहार्हसि ॥ १०९ ॥

वरं कूपशताद्वापि वरं वापीशतात्क्रतुः ।
वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरं ॥ ११० ॥

अश्वमेधसहस्रं च सत्यं च तुलया धृतं ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ १११ ॥

नास्ति सत्यसमो धर्मः न सत्याद्विद्यते परं ।
न हि तीव्रतरं किञ्चित् अनृतादिह विद्यते ॥ ११२ ॥

त्वया विनापि दुष्यन्त शैलराजावतंसिकां ।
चतुरन्तामिमां उर्वीम् पुत्रो मे पालयिष्यति ॥ ११३ ॥

एतावदुक्त्वा राजानं प्रातिष्ठत शकुन्तळा ।
अथान्तरिक्षाद्दुष्यन्तं वागुवाचाशरीरिणी ॥ ११४ ॥

भरस्व पुत्रं दुष्यन्त मावमंस्थाश्शकुन्तळाम् ।
जाया जनयते पुत्रं आत्मनोङ्गद्विधाकृतं ॥ ११५ ॥

तस्माद्भरस्व दुष्यन्त पुत्रं शाकुन्तळं नृप ।
तच्छ्रुत्वा पौरवो राजा व्याहृतं त्रिदिवौकसाम् ॥ ११६ ॥

पुरोहितममात्यांश्च सम्प्रहृष्टोऽब्रवीदिदम् ।
श्रृण्वंत्वेतद्भवन्तोऽस्य देवदूतस्य भाषितम् ॥ ११७ ॥

अहं चाप्येवमेवैनं जानामि स्वयमात्मजम् ।
तं विशोध्य तदा राजा देवदूतेन बुद्धिमान् ॥ ११८ ॥

हृष्टः प्रमुदितश्चापि प्रतिजग्राह तं सुतं ।
ततस्तस्य तदा राजा पितृकर्माणि सर्वशः ॥ ११९ ॥

कारयामास मुदितः प्रीतिमानात्मजस्य वै ।
मूर्ध्नि चेममुपाघ्राय सस्नेहं परिषस्वजे ॥ १२० ॥

सभाज्यमानो विप्रैश्च स्तूयमानश्च वन्दिभिः ।
स मुदं परमां लेभे पुत्रसंस्पर्शजां नृपः ॥ १२१ ॥

ताञ्चैव भार्यां दुष्यन्तः पूजयामास धर्मतः ।
अब्रवीच्चैव तां राजा सान्त्वपूर्वमिदं वचः ॥ १२२ ॥

कृतो लोकपरीक्षोयं संबन्धोऽयं त्वया सह ।
तस्मादेतन्मया देवि त्वच्छुद्ध्यर्थं विचारितं ॥ १२३ ॥

तामेव मुक्त्वा राजर्षिः दुष्यन्तो महिषीं प्रियाम् ।
वासोभिरन्नपानैश्च पूजयामास सुन्दरीम् ॥ १२४ ॥

भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत् ।
स विजित्य महीपालान् चकार वशवर्तिनः ॥ १२५ ॥

स राजा चक्रवर्त्यासीत् सार्वभौमः प्रतापवान् ।
ईजे च बहुभिर्यज्ञैः यथा शक्रो मरुत्पतिः ॥ १२६ ॥

याजयामास तं कण्वो विधिवद्भूरिदक्षिणं ।
यस्मिन् सहस्रं पद्मानां कण्वाय भरतो ददौ ॥ १२७ ॥

भरताद्भारती कीर्तिः येनेदं भारतं कुलं ।
लेभे स पुत्रो नृपतिः सभार्यः परमां मुदम् ॥ १२८ ॥

एतदाख्यानमायुष्यं सर्वशोकविनाशनम् ।
पठन्ति ये नरास्तेषां सौख्यं चेह परत्रच ॥ १२९ ॥

इति शकुन्तलोपाख्यानं परिसमाप्तम् ।

## CHAPTER XI—*C*.

# नीतिश्लोकाः ।

---

### तृतीयमञ्जरी ।

चिन्तयामि हरिमेव सन्ततम् मन्दमन्दहसिताननाम्बुजम् ।
नन्दगोपतनयं परात्परं नारदादिमुनिबृन्दवन्दितम् ॥ १ ॥

न वैराग्यात्परं भाग्यं, नबोधादपरं सुखम् ।
न हरेरपरस्त्राता, न संसारात्परो रिपुः ॥ २ ॥

लुब्धानां याचकश्शत्रुः चोराणां चन्द्रमा रिपुः ।
जारस्त्रीणां पतिश्शत्रुः मूर्खाणां बोधको रिपुः ॥ ३ ॥

यस्य न ज्ञायते वीर्यं न कुलं न विचेष्टितम् ।
न तेन सङ्गतिं कुर्यादित्युवाच बृहस्पतिः ॥ ४ ॥

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ ५ ॥

अपृष्टोऽपि हितं ब्रूयात् यस्य नेच्छेत्पराभवम् ।
एवमेतत्सतां धर्मः विपरीतमतोऽन्यथा ॥ ६ ॥

क्षणे रुष्टाः क्षणे तुष्टाः सन्तुष्टाश्च क्षणेक्षणे ।
अव्यवस्थितचित्तानां प्रसादोऽपि भयङ्करः ॥ ७ ॥

शर्वरीदीपकश्चन्द्रः प्रभातोद्दीपको रविः ।
त्रैलोक्यदीपको धर्मः सुपुत्रः कुलदीपकः ॥ ८ ॥

गावो गन्धेन पश्यन्ति वेदेनैव द्विजातयः ।
चारैः पश्यन्ति राजानः चक्षुर्भ्यामितरे जनाः ॥ ९ ॥

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थं नोपलक्षये ॥ १० ॥

एक एव न भुञ्जीत यदीच्छेद्वृद्धिमात्मनः ।
द्वित्रैर्वा बन्धुभिस्सार्धं भुञ्जीयान्मतिमान्नरः ॥ ११ ॥

अयं निजः परो वेति विकल्पो लघुचेतसाम् ।
पुनस्तूदारचित्तानां वसुधैव कुटुम्बिनी ॥ १२ ॥

क्षिप्रमायमनालोच्य व्ययं कुर्वन् स्ववाञ्छया ।
परिक्षीयत एवासौ धनी वैश्रवणोपमः ॥ १३ ॥

अधोधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्वएव दरिद्रति ॥ १४ ॥

न विषं विषमित्याहुः ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥ १५ ॥

अभ्रच्छाया खलप्रीतिः सिद्धमन्नं च योषितः ।
किञ्चित्कालोपभोग्यानि यौवनानि धनानि च ॥ १६ ॥

यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥ १७ ॥

यथाच्छायातपौ नित्यं सुसंबद्धौ परस्परम् ।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ॥ १८ ॥

अर्थार्थी यानि दुःखानि मूढोऽयं सहते जनः ।
शतांशेनापि मोक्षार्थी तानि चेन्मोक्षमाप्नुयात् ॥ १९ ॥

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सिह्मस्य सुप्तस्य प्रविशन्ति मुखे मृगाः ॥ २० ॥

यत्रोत्साहसमारम्भः यत्रालस्यविहीनता ।
नयविक्रमसंयोगः तत्र श्रीरचला ध्रुवम् ॥ २१ ॥

अकृत्यं मन्यते कृत्यं कृत्यं चापि न मन्यते ।
अभक्ष्यं मन्यते भक्ष्यं स्त्रीवाक्यप्रेरितो जनः ॥ २२ ॥

अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम् ।
रतिपुत्रफला दाराः दत्तभुक्तफलं धनम् ॥ २३ ॥

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति गौरवम् ॥ २४ ॥

न ह्यस्ति ताळवृन्तस्य कचित्पवनसंग्रहः ।
उदारगुणशीलस्य संग्रहो न कदाचन ॥ २५ ॥

अपायसन्दर्शनजां विपत्तिं उपायसन्दर्शनजां च सिद्धिं ।
मेधाविनो नीतिविधिप्रयुक्तां पुरः स्फुरन्तीमिव दर्शयन्ति ॥ २६ ॥

अश्वप्लुतं वासवगर्जितञ्च स्त्रीणाञ्चचित्तं पुरुषस्य भाग्यं ।
अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो मनुष्यः ॥ २७ ॥

असंभवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
प्रायस्समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥ २८ ॥

# CHAPTER XI—*D*.

## चतुर्थमञ्चरी ।

नीतिश्लोकाः—*Continued*.

दातव्यं भोक्तव्यं धनविषये सङ्ग्रहो न कर्तव्यः ।
पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ॥ १ ॥

न हि भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्नेन ।
करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति ॥ २ ॥

आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानां आत्मन्यप्रत्ययं चेतः ॥ ३ ॥

हस्त इव भूतिमलिनो यथा यथा लङ्घयति खलस्सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलछायम् ॥ ४ ॥

अतिमलिने कर्तव्ये भवति खलानां अतीव निपुणा धीः ।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः ॥ ५ ॥

गुणिनामपि निजरूपप्रतिपत्तिः परत एव सम्भवति ।
स्वमहिमदर्शनमक्ष्णोः मुकुरतले जायते यस्मात् ॥ ६ ॥

वारयति वर्तमानां आपदमागामिनीश्च सत्सङ्गः ।
तृष्णां च हरति पीतं गङ्गाया दुर्गतिश्च सद्योम्भः ॥ ७ ॥

प्रतिवाचमदत्त केशवः शपमानाय नचेदि भूभुजे ।
अनुहुङ्कुरुते घनध्वनिं न हि गोमायुरुतानि केसरी ॥ ८ ॥

कनकभूषणसंग्रहणोचितः यदि मणिस्त्रपुणि प्रणिधीयते ।
न स विरौति न चापि न शोभते भवति योजयितुर्वचनीयता ॥ ९ ॥

काके शौचं कामुके सत्यवाक्यं क्लीबे शौर्यं मद्यपे तत्वचिन्ता ।
सर्पे शान्तिः स्त्रीषु कामोपशान्तिः राज्ञां मित्रं केन दृष्टं श्रुतं वा ॥१०॥

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेळा नराणाम् ।
सलिलममृतकल्पं दद्युराजीवितान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ॥ ११ ॥

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
भवति तदनृतं वै भाषणं सज्जनानाम् ॥ १२ ॥

तृष्णां च्छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान्मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान्गुणान्
कीर्तिं पालय दुःखिते कुरु दयां एतत्सतां लक्षणम् ॥ १३ ॥

एह्यागच्छ समाश्रयासनमिदं कस्माच्चिराद्दृश्यसे
का वार्ता किमु दुर्बलोऽसि कुशलं प्रीतोऽस्मि ते दर्शनात् ।
एवं ये समुपागतान् प्रणयिनः प्रह्लादयन्त्यादरात्
तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तुं सदा ॥ १४ ॥

जिह्वैकैव सतामुभे फणवतां स्रष्टुश्चतस्रश्च ताः
तास्सप्तैव विभावसोर्नियमिताः षट्कार्तिकेयस्यच ।
पौलस्त्यस्य दशाभवन् फणिपतेः जिह्वासहस्रद्वयं
जिह्वालक्षशतैककोटिनियमो नो दुर्जनानां मुखे ॥ १५ ॥

क्षीरेणात्मगतोदकाय हि गुणाः दत्ताः पुरा तेऽखिलाः
क्षीरोत्तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुद्गतं तदभवद्दृष्ट्वा स्वमित्रापदं
युक्तं तेन जलेन शाम्यति सतां वृत्तिः पुनस्त्वीदृशी ॥ १६ ॥

नागो भाति मदेन खं जलधरैः पूर्णेन्दुना शर्वरी
शीलेन प्रमदा जवेन तुरगः नित्योत्सवैर्मन्दिरम् ।
वाणी व्याकरणेन हंसमिथुनैर्नद्यस्सभा पण्डितैः
सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना ॥ १७ ॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतः
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननंप्रत्युद्यमः कीदृशः ॥ १८ ॥

सन्तप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नळिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते ॥ १९ ॥

कान्तं प्राह कपोतिकाकुलतया नाथान्तकालेऽधुना
व्याधोऽधो धुतचापसंयतकरः श्येनः परिभ्राम्यति ।
दष्टस्सोऽप्यहिना हतस्स इषुणा तुष्टाविमौ दम्पती
लेभाते परमां मुदं पुनरहो दैवी विचित्रा गतिः ॥ २० ॥

श्वानस्सन्त्यभितोऽपि दन्तमुकुळव्यावर्तनोद्घाटितैः
स्वैरोत्तानितविड्वराहपृथुकाः किं तैस्स्थितैर्वामृतैः ।

वस्तव्यं गिरिराजमौळिषु विहर्तव्यं पुनस्स्वेच्छया
हन्तव्याः करिणः मृगेन्द्र इति च प्राप्तव्यमुच्चैर्यशः ॥ २१ ॥

रात्रिर्गमिष्यति भविष्यति च प्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नळिनीं गज उज्जहार ॥ २२ ॥

मा गर्वमुद्वह बिडाल महीपतीनां
अन्तःपुरे मणिमये वसतिर्ममेति ।
पट्टाभिषेकसमये खलु भूपतीनां
द्वारिस्थितस्य कलभस्य हि मण्डनश्रीः ॥ २३ ॥

अच्छं करोषि नखजालमधः
प्रदेशे पुच्छं वहस्यवयवाधममुत्तमाङ्गे ।
तत्त्वं विचारय मृगेन्द्र ततस्ततो वा
मत्तेभकुम्भकरटत्रुटनप्रथा ते ॥ २४ ॥

चन्द्रः क्षयी प्रकृतिवक्रतनुः कळङ्की
दोषाकरः स्फुरति मित्रविपत्तिकाले ।
मूर्ध्ना तथापि सततं ध्रियते हरेण
नैवाश्रितेषु महतां गुणदोषचिन्ता ॥ २५ ॥

यज्जीवति क्षणमपि प्रथितैर्मनुष्यः
विज्ञानशौर्यविभवादिगुणैस्समेतः ।
तत्तस्य जीवितफलं प्रवदन्ति सन्तः
काकोऽपि जीवति चिराय बलिञ्च भुङ्क्ते ॥ २६ ॥

पापान्निवारयति योजयते हितानि
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं न च जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ २७ ॥

वरं वनं व्याघ्रगजादिसेवितं द्रुमालयं पक्कफलाम्बुभोजनम् ।
तृणानि शय्या परिधानवल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥ २८ ॥

धनेन किं यो न ददाति नाश्नुते बलेन किं यश्च रिपून्नबाधते ।
श्रुतेन किं यो न च धर्ममाचरेत् किमात्मना यो न जितेन्द्रियो भवेत्॥२९॥

भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धतास्सत्पुरुषास्समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥ ३० ॥

त्रिलोकेशश्शार्ङ्गी शबरशरलक्ष्यत्वमगमत्
विधाता लोकानां अलभत शिरःकृन्तनविधिम् ।
प्रयातौ तौ राहोः दिनकरशशाङ्कौ कबलतां
प्रभुर्नग्नश्शम्भुः शिरसि लिखितं लङ्घयति कः ॥ ३१ ॥

कुत्रायोध्या क्व रामो दशरथवचनाद्दण्डकारण्यमागात्
क्वासौ मारीचनामा क्व च जनकसुता कुत्र सीतापहारः ।
सुग्रीवे राममैत्री क्व च जनकसुतान्वेषणे प्रेषितोऽहं
कोऽर्थोऽसंभावनीयः तमपि घटयते क्रूरकर्मा विधाता ॥ ३२ ॥

## CHAPTER XII—*A*.

---

### प्रथममञ्जरी ।

### लोकोक्तिः—Proverbs.

१. सतां सद्भिस्सङ्गः कथमपि हि पुण्येन भवति ।

२. यशोधनानां हि यशो गरीयः ।

३. तेजसां हि न वयस्समीक्ष्यते ।

४. विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ।

५. किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।

६. हेम्नस्संलक्ष्यते ह्यग्नौ विशुद्धिश्श्यामिकापि वा ।

७. अभ्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ।

८. क्रियासिद्धिस्सत्त्वे भवति महतां नोपकरणे ।

९. रिक्तस्सर्वो भवति हि लघुः पूर्णता गौरवाय ।

१०. सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।

११. याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।

१२. रतिमुभयप्रार्थना कुरुते ।

१३. मन्दायन्ते न खलु महतां अभ्युपेतार्थकृत्याः ।

१४. न वसन्त्येकत्र सर्वे गुणाः ।

१५. न हि सर्वस्सर्वं जानाति ।

१६. आपन्नार्तिप्रशमनफलास्संपदो ह्युत्तमानाम् ।

१७. एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।

१८. न सुखाल्लभ्यते सुखम् ।

१९. नानृतात्पातकं किञ्चित् ।

२०. क्रिया हि वस्तूपहिता प्रसीदति ।

२१. अतिस्नेहः पापशङ्की ।

२२. ऋद्धं हि राज्यं पदमैन्द्रमाहुः ।

२३. अपुत्रस्य गतिर्नास्ति ।

२४. लवणवणिजः कर्पूरार्घं किमित्यभिमन्यते ।

२५. पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ।

२६. वसुमत्या हि नृपाः कळत्रिणः ।

२७. शरीरमाद्यं खलु धर्मसाधनम् ।

२८. न हि कस्तूरिकामोदश्शपथेन निवार्यते ।

२९. न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ।

३०. सत्सङ्गतिः कथय किं न करोति पुंसाम् ।

३१. पदं हि सर्वत्र गुणैर्निधीयते ।

३२. वाताशनोऽहमिति किं विनतासुतस्य श्वासानिलायभुजगस्स्पृहयालु-तालुः ।

३३. गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ।

३४. सिद्धमप्यभिलषन्ति न सन्तः का प्रसक्तिरपि साधयितव्ये ।

३५. गुणानां सामग्र्यं क्वचन नहि सर्वत्र जगति ।

३६. शास्त्रं सुनिश्चितधियां क्व न सिद्धिमेति ।

३७. रम्याणां विकृतिरपि श्रियं तनोति ।

३८. निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ।

३९. विक्रीते करिणि किमङ्कुशे विवादः ।

४०. संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ।

४१. आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।

४२. राजसेवामनुष्याणां असिधारावलेहनम् ।

४३. राजानमनुवर्तन्ते ; यथा राजा तथा प्रजाः ।

४४. राजा कालस्य कारणम् ।

४५. सेव्यजनश्चेत्कुपितः कथं नु दासो निरपराधः ।

४६. मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः ।

४७. प्रतिबध्नाति हि श्रेयो पूज्यपूजाव्यतिक्रमः ।

४८. अभितप्तमयोऽपि मार्दवं भजते ; कैव कथा शरीरिषु ।

४९. सर्वः प्रियःखलु भवत्यनुरूपचेष्टः ।

५०. दुष्करं किं महात्मनाम् ।

## CHAPTER XII–*B*.

### द्वितीयमञ्जरी ।

---

**छन्दस्सूची—Elements of Prosody.**

1. काव्यं गद्यं पद्यं चेति द्विधा विभज्यते । पद्यन्तु बहुशः पादचतुष्टयसमन्वितम् । पादस्तु अक्षरगणैर्वा मात्रागणैर्वा संयुज्यते । एकः अच् वा, हल्विशिष्ट-अच् वा, अनुस्वारविसर्गान्यतरविशिष्टो अच् वा, अक्षरमित्युच्यते । सः अच् , ह्रस्वदीर्घप्लुतभेदेन त्रेधा भवति ।

Sanskrit composition is of two kinds; prose, and poetry in the form of stanzas; stanzas consist generally of 4 lines or quarters each. A line or quarter in Sanskrit poetry is made up of *ganas* or groups of syllables or groups of syllabic instants. A syllable is a vowel with or without a consonant, an *anusvara*, or a *visarga*. A vowel is either short, or long, or prolated.

2. (*a*) ऊकालोऽज्ह्रस्वदीर्घप्लुतः ।

प्रातः श्रूयमाणे कुक्कुटध्वनौ आदौ श्रूयमाणः यः ध्वनिः तत्सदृशः एकमात्रः अच् ह्रस्वः। मध्यमध्वनिसदृशः अच् द्विमात्रः दीर्घः, चरमध्वनिसदृशः अच् त्रिमात्रः प्लुतः । इत्येवं प्रत्येकं अचः यथासम्भवं विभज्यन्ते ।

तथाच—

एकमात्रो भवेद्ध्रस्वः द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयः व्यञ्जनं त्वर्धमात्रकम् ॥

अर्धमात्रकं व्यञ्जनं छन्दश्शास्त्रे नोपयुज्यते ।

The crowing of the cock heard in the early morning may be seen to be composed of three parts. The vowel which resembles the first part thereof is called short and is said to consist of one *mātrā* or instant (in time).

The vowel resembling the middle part of the crowing of the cock is called long and consists of two instants. The vowel resembling in sound the last portion thereof is called *Pluta* or prolated and consists of three instants. Thus each of the vowels अ, इ, उ and ऋ has three forms, ऌ has two forms (the short and the prolated), and ए, ऐ, ओ and औ have two forms each (the long and the prolated). A consonant is said to be half a *mātrā* in time. In Prosody this half *mātrā* of consonants is not taken into account.

(*b*) संयुक्तान्तं दीर्घं सानुस्वारं विसर्गसंयुक्तम् ।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥

A syllable with a short vowel is called *laghu* or light; and that which has a long vowel is *guru* or heavy. In Sanskrit Prosody the short vowel followed by a conjunct consonant or an *anusvara* or a *visarga* is also *guru* or heavy. In similar circumstances the syllable at the end of a quarter is considered to be light or heavy according to the exigencies of the metre.

3. (*a*) गणास्त्रिस्त्रीण्यक्षराणि वर्णच्छन्दासि कीर्तिताः ।
मयौ रसतजा भो नो गणा इत्यष्ट ते क्रमात् ॥
आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवे ॥

आदिलघुर्यो मध्यलघू रश्चान्तलघुस्तश्चादिगुरुर्भः ।
मध्यगुरुर्जस्त्वन्तगुरुस्सः सर्वगुरुर्मस्सर्वलघुर्नः ॥

त्र्यक्षरसमुदायः वर्णछन्दसि गण इत्युच्यते ।

A syllabic *gana* is a group of three syllables which may be light or heavy. There are 8 varieties of *ganas* depending on the arrangement of the light and the heavy syllables therein. Their characteristics are made out in any of the ways mentioned in the last two stanzas above.

3. (*b*). केचित् अनेन पथा पश्यन्ति गणान् ।
यमाताराजभानसलगम् ।

They are also made out thus in the above passage:—

| | | |
|---|---|---|
| यगण | light, heavy, heavy | यमाता |
| मगण | heavy, heavy, heavy | मातारा |
| तगण | heavy, heavy, light | ताराज |
| रगण | heavy, light, heavy | राजभा |
| जगण | light, heavy, light | जभान |
| भगण | heavy, light, light | भानस |
| नगण | light, light, light | नसल |
| सगण | light, light, heavy | सलगम् |

ल—लघु light ; गम्—गुरु heavy.

4. तादृशगणसमुदायविन्यासविशेषेण क्वचित् गणैस्सह एकद्विवर्णात्मक-गुरुलघुयोजनेन च पादः भवति । पादाक्षरसंख्याभेदेन छन्दोविशेषसंज्ञा भवति । तेषु छन्दस्सु गणविन्यासविशेषनियमितानि वृत्तानि ।

A line of poetry or quarter of a stanza is made up of a number of such *ganas* arranged in particular ways and

in some cases associated with one or two light or heavy syllables. The number of syllables in a quarter determines what is called its *chhandas ;* and the position of the various *ganas* comprising the quarter determines its *vritta.* For instance, a quarter containing 12 syllables is said to be in जगती *chhandas*, and a quarter with 14 syllables in शक्करी *chhandas.* But द्रुतविलम्बित and वंशस्थ are two वृत्त varieties of the जगती *chhandas*, each of them having 12 syllables to a quarter. Similarly वसन्ततिलका and पथ्या are two वृत्त varieties of the शक्करी *chhandas.*

5. एवंविधपादचतुष्टयविशिष्टं पद्यं, पादानां चतुर्णां गणविन्यासरीतेः एकविधत्वे सति समवृत्तं, प्रथमतृतीयपादयोः द्वितीयचतुर्थपादयोश्च एकरूपत्वे सति अर्धसमवृत्तं, पादानां चतुर्णां भिन्नभिन्नविधत्वे सति विषमवृत्तं, इति कथ्यते ।

तथा च—

समम‍र्धसमं वृत्तं विषमं च त्रिधा मतम् ।
अङ्घ्रयो यस्य चत्वारः तुल्यलक्षणलक्षिताः ।
तच्छन्दश्शास्त्रतत्त्वज्ञाः समवृत्तं प्रचक्षते ॥

प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥

यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दश्शास्त्रविशारदाः ॥

A stanza consisting of four quarters is called समवृत्त, when all the four quarters are in the same वृत्त *i.e.*, are similarly constituted in regard to the number, arrangement and nature of the syllables contained therein.

When the first and the third quarters are similarly constituted in these respects and the second and the fourth are likewise similar in themselves but differ from the first and the third, the stanza is called अर्धसमवृत्त. When all the four quarters are dissimilar and differ from each other in their वृत्त, the stanza is then said to be विषमवृत्त.

6. श्लोकेषु नियतस्थानं पदच्छेदं यतिं विदुः ।

यति is the name given to the pause which may be made in reciting the quarters of a stanza, and it corresponds to the cæsura in English Poetry.

7. ह्रस्वः अच् एकमात्रकः, दीर्घः अच् द्विमात्रकः इति उक्तपूर्वमेव । तस्मात् लघ्वक्षरं एकमात्रकं गुर्वक्षरं द्विमात्रकमिति अवगन्तव्यम् । मात्राछन्दसि एकैको गणः चतुर्मात्रः ; स च द्व्यक्षरः, त्र्यक्षरः, चतुरक्षरो वा भवति ।

It has already been explained that a short vowel has one *mātrā* or instant, and a long vowel two *mātrās* or instants. It follows, therefore, that a light syllable has one syllabic instant, and that a heavy syllable has two syllabic instants. A मात्रागण or a group of syllabic instants has 4 *mātrās* or instants and may consist of 2, 3 or 4 syllables.

8. एकादशभागे तृतीयचतुर्थमञ्जरीस्थितपद्यानां वृत्तलक्षणानि अधः निरूप्यन्ते; तत्रत्यपद्यसंख्याप्रदर्शनरूपेण उदाहरणानि संलक्ष्यन्ते ।

The names of the *vrittas* of stanzas occurring in the third and the fourth sections of the 11th Chapter are mentioned hereunder together with their characteristics. Examples in illustration of the *vrittas* thus specified are indicated by the numbers of the stanzas in those sections.

| छन्दोनाम Name of *chhandas* | प्रतिपादमक्षरसंख्या No. of syllables in each quarter. | वृत्तनाम Name of *vritta*. | वृत्तलक्षणम् Characteristics of the *vritta*. | यतिस्थानम् Position of the cæsural pause. | उदाहरणपद्यसंख्या No. of the illustrative stanza in the 3rd and the 4th sections of the XI Ch. |
|---|---|---|---|---|---|
| | | | अक्षरछन्दसि समवृत्तानि | | |
| अनुष्टुभ् | 8 | श्लोक | पञ्चमं लघुसर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरु विजानीयादेतच्छ्लोकस्य लक्षणम् ॥ In each of the quarters (Pādas) the fifth syllable is short, and the sixth long; and in the second and the fourth quarters the 7th is short. | पादान्ते At the end of the quarter. | 3rd sec., stanzas 2—25. |
| त्रिष्टुभ् | 11 | रथोद्धता | रान्नराविह रथोद्धता लगौ । Ganas :—र, न, र, ल, ग. | Do. | 3rd sec., 1st stanza. |
| त्रिष्टुभ् | 11 | इन्द्रवज्रा | स्यादिन्द्रवज्रा यदि तौ जगौ गः। Ganas :—त, त, ज, ग, ग. | do. | 3rd sec., 27th stanza first-half. |
| Do. | 11 | उपेन्द्रवज्रा | उपेन्द्रवज्रा जतजास्ततो गौ । Ganas :—ज, त, ज, ग, ग. | do. | 3rd sec., 26th stanza first-half. |
| do. | 11 | शालिनी | शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः । Ganas :—म, त, त, ग, ग. | After the 4th and the 11th syllables. | 4th sec., 10th stanza |
| जगती | 12 | द्रुतविलम्बितम् | द्रुतविलम्बितमाह नभौ भरौ । Ganas :—न, भ, भ, र. | At the end of the quarter. | 4th sec., 9th stanza. |

| छन्दोनाम Nama of *chhandas* | प्रतिपादमक्षरसंख्या No. of syllables in each quarter. | वृत्तनाम Name of *vritta*. | वृत्तलक्षणम् Characteristics of the *vritta*. | यतिस्थानम् Position of the cæsural pause. | उदाहरणपद्यसंख्या No. of the illustrative stanza in the 3rd and the 4th sections of the XI Ch. |
|---|---|---|---|---|---|
| जगती | 12 | वंशस्थम् | जतौ तु वंशस्थमुदीरितं जरौ । Ganas :—ज, त, ज, र. | At the end of the quarter. | 4th sec., stanzas 28 to 30. |
| शक्करी | 14 | वसन्ततिलका | उक्ता वसन्ततिलका तभजा जगौ गः । Ganas :—त,भ,ज,ज,ग,ग. | do. | 4th sec., stanzas 22 to 27. |
| अतिशक्करी | 15 | मालिनी | ननमयययुतेयं मालिनी भोगिलोकैः । Ganas :—न,न,म,य,य. | After the 8th and the 15th syllables. | 4th sec., stanzas 11 and 12. |
| अत्यष्टि | 17 | शिखरिणी | रसै रुद्रैच्छिन्ना यमनसभला गः शिखरिणी । Ganas:—य,म,न,स,भ,ल,ग | After the 6th and the 17th syllables. | 4th sec., stanza 31. |
| अतिधृति | 19 | शार्दूलविक्रीडितम् | सूर्याश्वैर्मसजाः स्ततः सगुरवः शार्दूलविक्रीडितम् । Ganas:--म,स,ज,स,त,त,ग. | After the 12th and the 19th syllables. | 4th sec., stanzas 13 to 21. |
| प्रकृति | 21 | स्रग्धरा | म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् । Ganas:--म,र,भ,न,य,य,य. | After the 7th, the 14th and the 21st syllables. | 4th sec., stanza 32. |
| | | | अक्षरछन्दसि अर्धसमवृत्तानि । | | |
| पङ्क्ति त्रिष्टुभ् | 1st and 3rd, 10; 2nd and 4th, 11. | वियोगिनी | विषमे ससजा गुरुः समे सभरालोऽथगुरुर्वियोगिनी । Ganas :—1st & 3rd स,स,ज,ग 2nd & 4th स,भ,र,ल,ग. | At the end of the quarters. | 4th sec., stanza 8. |

| छन्दोनाम Name of *chhandas.* | प्रातिपादमक्षरसंख्या No. of syllables in each quarter. | वृत्तनाम Name of *vritta.* | वृत्तलक्षणम् Characteristics of the *vritta.* | यतिस्थानम् Position of the cæsural pause. | उदाहरणपद्यसंख्या No. of the illustrative stanza in the 3rd and the 4th sections of the XI Ch. |
|---|---|---|---|---|---|
| त्रिष्टुभ् | 11 | उपजाति | इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनेन उपजातिवृत्तं भवति । Ganas :—त, त, ज, ग,ग ; ज,त,ज,ग,ग. A stanza containing any combination of the quarters in इन्द्रवज्रा and उपेन्द्रवज्रा is said to be in the उपजाति metre. | At the end of the quarter. | 3rd sec., stanzas 26 to 28. |
| | | | मात्राछन्दसि । | | |
| | | आर्या | यस्याः पादे प्रथमे द्वादश मात्राः तथा तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या॥ The stanza in which the first and the third quarters contain 12 syllabic instants, the second 18 instants and the fourth 15 instants, is said to be in the *Āryā* metre. | | 4th sec., stanzas 1 to 6. |
| | | गीति | गीतेस्तु तुरीयपादः अष्टादशमात्रकः; शेषास्तु आर्यावत् । A stanza in which the first three quarters are as in the *Āryā* metre and the fourth contains 18 syllabic instants, is said to be in the *Gīti* metre. | | 4th sec., stanza 7. |

यश्श्रीपद्मपरिभ्रमद्भ्रमरभाः कारुण्यकल्लोलिनी-
कान्तस्तस्य रघूत्तमस्य रुचिरापाङ्गानुषङ्गेण च ।
ख्याताहोबिलनाथभक्तयतिराडाशीर्भिरुद्दामभिः
पूर्तिं प्रापदनाविलाकृतिरियं निर्विघ्नलेशोदयम् ॥

वीक्षारण्यपुराणपूरुषपदाम्भोजैकसेवारतः
विद्वद्भिर्गतमत्सरैरभिमतः सूरेश्शठारेस्सुतः ।
श्रीमत्कैरविणीपुरीविलसितश्री "हिन्दुहैस्कूलि" ति
प्रख्याताङ्गलपाठमन्दिरमहागीर्वाणभाषागुरुः ॥

दुरसामीति प्रथितः श्रीशैलार्यापराभिधानोऽयम् ।
श्रीधातुरूपमुक्तावळीमकार्षीदिमां ललिताम् ॥

श्रीपार्थसारथिर्नः कलयतु कल्याणसन्ततीरेषः ।
यस्य कृपया कृतिरियं परिपूर्तिमगादविघ्नेन ॥

द्वितीयमुद्रणं चास्य कृपया पार्थसारथेः ।
परिपूर्तिमगादेतत्तनोतु विदुषां मुदम् ॥

इति धातुरूपमुक्तावळी परिसमाप्ता ।

# ERRATA.

| *Page.* | *Line.* | *For* | *Read* |
|---|---|---|---|
| 82 | 14 | स्तुवै—स्तुवावहै—स्तुवामहै | स्तवै—स्तवावहै—स्तवामहै |
| 83 | 26 | जजागरतः | जजागरतुः |
| 189 | 8 | गरीयात् | गीर्यात् |
| 189 | 34 | अहर्यात् | अर्ह्यात् |
| 212 | 12 | संहजांय | सहजाय |
| 212 | 16 | क्रियान्वयी | क्रियान्वायि |
| 216 | 20 | परिपन्थी न भविष्यामि | परिपन्थी भविष्यामि |
| 220 | 14 | च्छुत्वा | च्छूत्वा |
| 224 | 12 | षड्त्रिंशद्वर्ष | षट्त्रिंशद्वर्ष |
| 230 | 8 | निर्माप्य | निर्माय |
| 230 | 19 | सत | सतु |
| 231 | 3 | पूर्तं | मूर्तं |
| 231 | 10 | रात्रंदिवं | रात्रिंदिवं |
| 240 | 5 | गैरेण | गौरेण |
| 240 | 22 | आकर्षेचा | आचकर्षेचा |
| 247 | 19 | स्थापयित्व | स्थापयित्वा |
| 250 | 12 | प्रंतिपादकं | प्रतिपादकं |
| 253 | 10 | ब्रह्यादयः | ब्रह्मादयः |
| 255 | 3 | D₀. | Do. |
| 266 | 22 | जन्माचोदयत् | जन्माभ्यचोदयत् |
| 267 | 17 | जनयामास मुनिः | जनयामास तु मुनिः |
| 267 | 20 | मगच्छ | [illegible] |
| 271 | 4 | प्रतीक्षसे | प्रतीक्षते |
| 283 | 19 | क्रकर्मा | क्रूरकर्मा |
| 285 | 8 | मन्यते | मन्वते |